# संस्कृतभाषा

## कक्षा ७

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# संस्कृतभाषा

कक्षा ७

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति। विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते। शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति। शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम्। एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते। तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः। एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते। इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतभाषाविषयकपाठ्यक्रमस्याधारेण सप्तम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते।

इदं पुस्तकं सहप्रा. ध्रुवप्रसादः भट्टराई, उपप्रा. रोहिणीराजः तिमिल्सिना, शिवराजः लामिछाने, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति। अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति। अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने,

प्रा.डा. नुरापतिः पोखरेल, निश्चलः अधिकारी, पर्वतराजः घिमिरे, गणेशः तिमिल्सिना, केशवः भट्टराई, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य टङ्कणं रूपसज्जा चेत्यादिकं खडोस सुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**


पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः | सूर्यवन्दना | १ |
| द्वितीयः | बलपरीक्षणम् | १५ |
| तृतीयः | संस्कृतिमयं कर्णालीक्षेत्रम् | ३० |
| चतुर्थः | कार्यालयीयपत्रम् | ४२ |
| पञ्चमः | समाजसेविका अङ्गूरबाबा | ५६ |
| षष्ठः | त्यागी कः ? | ७४ |
| सप्तमः | मातृपञ्चकम् | ८७ |
| अष्टमः | नारीशिक्षा | १०५ |
| नवमः | यात्रावृत्तान्तः | १२३ |
| दशमः | जीवनोत्सर्गिणी राजेश्वरी | १३४ |
| एकादशः | काव्यात्मकपद्यानि | १४५ |
| द्वादशः | दृढप्रतिज्ञा | १५५ |
| त्रयोदशः | सम्पत्संरक्षणम् | १७१ |

प्रथमः पाठः

# सूर्यवन्दना



आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥ १ ॥

प्रवर्तयति सालोकं लोकं यज्ञादिकर्मसु ।
यन्मुहूर्ताकरोद्यानं वन्देऽर्कं कालमीश्वरम् ॥ २ ॥

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने ॥ ३ ॥

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ ४ ॥

प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च ।
वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥ ५ ॥

**प्रथमः श्लोकः**

**अन्वयः–** हे आदिदेव ! तुभ्यं नमः । हे दिवाकर ! तुभ्यं नमः । हे प्रभाकर ! ते नमः अस्तु । हे भास्कर ! (त्वम्) मम (कृते) प्रसीद ।

**सरलार्थः–** हे सूर्य ! त्वम् आदिदेवः असि, दिवाकरः असि, प्रभाकरः असि, भास्करश्च असि । अहं त्वां वारं वारं नमस्करोमि । त्वं मयि प्रसन्नो भव ।

**द्वितीयः श्लोकः**

**अन्वयः–** यन्मुहूर्ताकरोद्यानं लोकं सालोकं यज्ञादिकर्मसु प्रवर्तयति । (अहं तम्) कालम् ईश्वरम् अर्कं प्रणमामि ।

**सरलार्थः–** यस्य मुहूर्तानाम् आकरस्य उद्यानं संसारमेव प्रकाश्य सांसारिकान् जनान् यज्ञादिषु प्रवृत्तान् करोति, तादृशं सकलकालरूपं संसारशासकं सूर्यम् अहं प्रणमामि ।

**तृतीयः श्लोकः**

**अन्वयः–** जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने सवित्रे नमः ।

**सरलार्थः–** भगवान् सूर्यः संसारस्यैव चक्षुरस्ति । स जगतः सृष्टेः, स्थितेः, संहारस्य च कारणमस्ति । ऋग्वेदः, यजुर्वेदः, सामवेदश्चेति त्रयो वेदाः सूर्यमेव वन्दन्ते । सूर्यः सत्त्वम्, रजः, तमश्चेति त्रीनेव गुणान् धारयति । सूर्य एव ब्रह्मणः, विष्णोः, शङ्करस्य च स्वरूपं धारयित्वा संसारस्य नियमनं करोति । अतः अहं सूर्यं प्रणमामि ।

**चतुर्थः श्लोकः**

**अन्वयः–** (अहम्) जपाकुसुमसङ्काशं महाद्युतिं तमोऽरिं सर्वपापघ्नं काश्यपेयं दिवाकरं प्रणतः अस्मि ।

**सरलार्थः–** भगवतः सूर्यस्य वर्णः जपापुष्पस्य वर्ण इव रक्तो वर्तते । महता प्रकाशेन युक्तः सूर्यः अन्धकारस्य शत्रुः वर्तते । स च सूर्यः प्रणन्तुः सर्वान् पापान् च नाशयति । अतः अहं कश्यपपुत्रं सूर्यं प्रणमामि ।

**पञ्चमः श्लोकः**

**अन्वयः–** ब्रह्मेन्द्रपूर्वकसुरैः नुतम् अर्चितं च वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं तरणिम् (अहम्) तनुवाङ्मनोभिः प्रातः नमामि ।

**सरलार्थः-** ब्रह्मेन्द्रादयो देवाः सूर्यं प्रणमन्ति अर्चन्ति च । सूर्योः वृष्टेरपि कारणमस्ति । अतः स वृष्टेर्मोचनं निग्रहं च करोति । त्रिभिर्गुणैर्युक्तो भगवान् सूर्यः त्रीन् एव लोकान् पालयति । अतः अहं कायेन वाचा मनसा भगवन्तं सूर्यं प्रणमामि ।

### शब्दार्थाः

| | |
|---|---|
| आदिदेवः | पहिलो देवता |
| प्रसीद | खुसी होऊ |
| प्रवर्तयति | संलग्न गराउँछ |
| सालोकम् | प्रकाशले सहित |
| आकरः | खानी |
| अर्कः | सूर्य |
| प्रसूतिः | जन्म |
| विरञ्चिः | ब्रह्मा |
| जपाकुसुमम् | बाह्रमासे फूल |
| तमः | अँध्यारो |
| तरणिः | सूर्य |
| प्रमोचनम् | छोड्ने काम |

### अभ्यासः

#### श्रवणं भाषणं च

१. **पाठस्य श्लोकान् शिक्षकात् श्रुत्वा गतियतिसंयोजनेन अनुवाचयत ।**

२. **अधोलिखितान् शब्दान् शुद्धमुच्चारयत**

नमस्तुभ्यम्, नमोऽस्तु, यज्ञादिकर्मसु, यन्मुहूर्ताकरोद्यानम्, जगत्प्रसूतिस्थितिनाशहेतवे, त्रिगुणात्मधारिणे, जपाकुसुमसङ्काशम्, सर्वपापघ्नम्, तनुवाङ्मनोभिः, त्रैलोक्यपालनपरम् ।

३. **अधोलिखितानां पदानाम् अर्थं वदत**

प्रसीद, ते, सालोकम्, अर्कम्, सवित्रे, विरञ्चिः, काश्यपेयः, तमोऽरिः, नुतम्, विनिग्रहः ।

४. **पाठस्य प्रथमं पद्यं सप्रणामम् उच्चारयत ।**

५. **पाठस्य द्वितीयपद्यस्य अन्वयं कथयत ।**

६. **पाठस्य चतुर्थपद्यं तदर्थं च शिक्षकात् श्रुत्वा प्रदत्तान् प्रश्नान् उत्तरयत**

(क) सूर्यस्य वर्णः कीदृशोऽस्ति ?

(ख) सूर्यः केन युतो वर्तते ?

(ग) सूर्यः कस्य अरिः वर्तते ?

(घ) सूर्यः किं विनाशयति ?

(ङ) सूर्यः कस्य पुत्रोऽस्ति ?

७. **भूमिवन्दनात्मकम् एकं श्लोकम् अन्विष्य कक्षायां श्रावयत, तदर्थविषये च कक्षायां परामर्शं कुरुत ।**

८. **श्लोकं पठित्वा एकेन वाक्येन उत्तरं वदत**

ॐकारं विन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥

(क) के ध्यायन्ति ?

(ख) योगिनः कं ध्यायन्ति ?

(ग) योगिनः ॐकारं कदा ध्यायन्ति ?

(घ) ध्यातः ॐकारः किं किं ददाति ?

(ङ) कस्मै नमः अस्ति ?

९. **चतुर्थे प्रश्ने प्रदत्तस्य पद्यस्य सरलार्थं वदत ।**

## पठनम्

१. **पाठस्य तृतीयपञ्चमौ श्लोकौ सलयं पठत ।**

२. **पाठस्य पञ्चमश्लोकस्य मौनपठनं विधाय स्वभाषया तत्सरलार्थं प्रकाशयत ।**

३. **पाठस्य प्रथमं श्लोकं पठित्वा तस्मिन् श्लोके प्रयुक्तान् सूर्यवाचकान् शब्दान् कथयत ।**

४. **पाठस्य चतुर्थश्लोकस्य पठनेन तदन्वयं प्रदर्शयत ।**

५. **पाठस्य तृतीयं श्लोकं तत्सरलार्थं च मौनेन पठित्वा प्रदत्तान् प्रश्नान् उत्तरयत**

(क) कः संसारस्य चक्षुरस्ति ?

(ख) सूर्यः केषां कारणमस्ति ?

(ग) के सूर्यं वन्दन्ते ?

(घ) त्रयो गुणाः के ?

(ङ) सूर्यः कथं संसारस्य नियमनं करोति ?

६. **अधस्तनम् अनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

सूर्यः तापं प्रकाशं च प्रयच्छति । सूर्यस्य मासानुसारेण मित्रः, वरुणः, धाता, अर्यमा, विवस्वान्, इन्द्रः, विष्णुः, त्वष्टा, पूषा, भगः, अरुणः, भानुश्चेति द्वादशनामानि सन्ति ॥ सूर्यः स्वाकर्षणशक्त्या सर्वान् ग्रहान् धारयति । अतो ग्रहाः सूर्यं परितो भ्रमन्ति । सूर्यः अनेकैः किरणैः युक्तः अस्ति । सूर्यस्य किरणात् शक्तिं प्राप्य एव प्राणिनो जीवन्ति । अत एव उक्तमस्ति-

**तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम् ।**
**महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥**

(क) कः तापं प्रयच्छति ?

(ख) मासानुसारेण सूर्यस्य कति नामानि सन्ति ?

(ग) सूर्यः केन ग्रहान् धारयति ?

(घ) प्राणिनः कुतः शक्तिं प्राप्नुवन्ति ?

(ङ) के सूर्यं परितो भ्रमन्ति ?

(च) प्रदत्ते पद्ये 'सूर्यम्' इति पदस्य विशेषणपदानि कनि ?

(छ) प्रदत्तस्य पद्यस्य अन्वयं प्रदर्शयत ।

(ज) प्रदत्ते पद्ये कीदृशः सूर्यः प्रणतोऽस्ति ?

७. **अधस्तनीं वन्दनां सस्वरं वाचयत**

**असतो मा सद्गमय ।**

**तमसो मा ज्योतिर्गमय ॥**

**मृत्योर्मा अमृतं गमय ।**

**तन्मे मनः शिवसंकल्पमस्तु ।**

८. **प्रदत्ते श्लोके कस्य प्रार्थना वर्तते ? तत्र प्रार्थकः किं किं याचते ? श्लोकं पठित्वा कथयत**

आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ।

ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते! ॥

९. **अधस्तनस्य श्लोकस्य मौनपठनेन तत्सरलार्थं सम्यक् प्रकाशयत**

ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।

विषमस्थानसम्भूतां पीडां दहतु मे रविः ॥

## लेखनम्

१. **शुद्धं कृत्वा लिखत**

प्रसिद, दीवाकर, यज्ञादिकर्मषु, सवीत्रे, त्रयिमयाय, महाद्यूतिम्, शर्वपापघ्नम्, तरणीम्, वृस्टिः ।

२. **अधस्तनानां पदानाम् अर्थं लिखत**

तुभ्यम्, प्रवर्तयति, वन्दे, चक्षुः, त्रिगुणम्, महाद्युतिम्, तमः, प्रातः, अर्चितम्, विनिग्रहः ।

३. **अधस्तनस्य पद्यस्य अन्वयं प्रकाशयत**

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।

तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

४. **पाठस्य तृतीयस्य पद्यस्य सरलार्थं लिखत ।**

## ५. एकपदेन उत्तरयत

(क) आदिदेवः कः अस्ति ?

(ख) कः कालरूपो वर्तते ?

(ग) गुणाः कति सन्ति ?

(घ) सूर्यस्य वर्णः कस्य पुष्पस्य वर्ण इव वर्तते ?

(ङ) वृष्टेः कारणं कः अस्ति ?

## ६. एकवाक्येन उत्तरयत

(क) प्रभाकरः कस्य नाम वर्तते ?

(ख) किं सांसारिकान् जनान् यज्ञादिषु प्रवृत्तान् कारयति ?

(ग) सूर्यः कान् गुणान् धारयति ?

(घ) के सूर्यम् अर्चन्ति प्रणमन्ति च ?

(ङ) सूर्यः कान् पालयति ?

## ७. सूर्यस्य महिमानं प्रदर्श्य एकम् अनुच्छेदं लिखत ।

## ८. पाठान्तर्गतस्य पञ्चमश्लोकस्य तात्पर्यं विशदीकुरुत ।

## ९. रिक्तस्थानं पूरयत

(क) सूर्यः ........... अस्ति । (दिवाकरः, निशाकरः)

(ख) अहं ........ सूर्यं प्रणमामि । (संसारनाशकम्, संसारशासकम्)

(ग) सूर्यः ......... चक्षुः अस्ति । (संसारस्य, अन्धकारस्य)

(घ) सूर्यः .......... प्रकाशेन युक्तो वर्तते । (लघुना, महता)

(ङ) सूर्यः ........ कारणम् अस्ति । (वृष्टेः, भृष्टेः)

## १०. प्रदत्तानि पदानि प्रयुज्य प्रतिपदम् एकैकं वाक्यं रचयत

तुभ्यम्, कर्मसु, वन्दे, नमः, सवित्रे, प्रणतः, प्रातः, नमामि ।

## ११. परस्परं मेलयत

| | |
|---|---|
| आदिदेव नमस्तुभ्यम् | काश्यपेयं महाद्युतिम् । |
| यन्मुहूर्ताकरोद्यानम् | त्रिगुणात्मकं च । |
| त्रयीमयाय | प्रसीद मम भास्कर । |
| जपाकुसुमसङ्काशं | वन्देऽर्कं कालमीश्वरम् । |
| त्रैलोक्यपालनपरम् | त्रिगुणात्मधारिणे । |

## १२. अधस्तनम् अनुच्छेदं पठित्वा उत्तराणि लिखत

गुरुः छात्रान् पृच्छति, "घटं को निर्माति ?" छात्राः उत्तरयन्ति, "घटं कुम्भकारः निर्माति ।" एवं क्रमेण वयं वक्तुं शक्नुमः यत् कविः काव्यं रचयति, जननी सन्ततिं जनयति, कृषकः धान्यम् उत्पादयति, रथी रथं चालयति इति । यदि कोऽपि अस्मान् पृच्छेत्, "जगत् कः रचयति, चालयति, पालयति, नाशयति ?" तदा वयं विचारशीलाः भवामः । तस्योत्तरं सरलं न भवेत् । एतद् जगत् कार्यमस्ति । कार्यं कारणस्य परिणामः मन्यते । जगतः कारणं किमिति विषये विदुषां नैकमतं वर्तते । अत्र अस्माभिः विचारणा कर्तव्या । मानवाः अन्ये प्राणिनश्च जगत् निर्मातुं न क्षमाः । जगत् तेषां सृष्टिर्नास्ति प्रत्युत ते एव जगतः सृष्टिरूपाः वर्तन्ते । अत एतत् स्पष्टं भवति यद् जगतः कारणं परब्रह्म एव । परब्रह्म सर्वं स्रष्टुं शक्नोति परं न कोऽपि परब्रह्मणः सृष्ट्यै क्षमोऽस्ति । अत्र वादविवादो नोचित इति दार्शनिकानां सम्मतिः वर्तते ।

**प्रश्नाः**

(क) कः काव्यं रचयति ?

(ख) जगत् किमस्ति ?

(ग) के जगत् निर्मातुं क्षमाः न सन्ति ?

(घ) जगतः कारणं किम् ?

(ङ) परब्रह्म किं स्रष्टुं शक्नोति ?

(च) कुत्र वादविवादः उचितो न भवति ?

### व्याकरणबोधः

**अकारान्तपुंलिङ्गेषु सूर्यशब्दस्य रूपाणि–**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सूर्यः | सूर्यौ | सूर्याः |
| द्वितीया | सूर्यम् | सूर्यौ | सूर्यान् |

| | | | |
|---|---|---|---|
| तृतीया | सूर्येण | सूर्याभ्याम् | सूर्यैः |
| चतुर्थी | सूर्याय | सूर्याभ्याम् | सूर्येभ्यः |
| पञ्चमी | सूर्यात्, सूर्याद् | सूर्याभ्याम् | सूर्येभ्यः |
| षष्ठी | सूर्यस्य | सूर्ययोः | सूर्याणाम् |
| सप्तमी | सूर्ये | सूर्ययोः | सूर्येषु |
| सम्बोधनम् | हे सूर्य ! | हे सूर्यौ ! | हे सूर्याः ! |

**अकारान्तपुंलिङ्गेषु शिवशब्दस्य रूपाणि–**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | शिवः | शिवौ | शिवाः |
| द्वितीया | शिवम् | शिवौ | शिवान् |
| तृतीया | शिवेन | शिवाभ्याम् | शिवैः |
| चतुर्थी | शिवाय | शिवाभ्याम् | शिवेभ्यः |
| पञ्चमी | शिवात्, शिवाद् | शिवाभ्याम् | शिवेभ्यः |
| षष्ठी | शिवस्य | शिवयोः | शिवानाम् |
| सप्तमी | शिवे | शिवयोः | शिवेषु |
| सम्बोधनम् | हे शिव ! | हे शिवौ ! | हे शिवाः ! |

राम-कृष्ण-श्याम-बालक-दिवाकर-गणेश-माधव-लोकनाथ-महेश-परमेश्वर-छात्र-वृक्ष-भुजगेन्द्रप्रभृतीनाम् अकारान्तपुंलिङ्गिनां नामशब्दानां रूपाणि एवमेव भवन्ति ।

१. **गोपालशब्दस्य रूपावलिं लिखित्वा कक्षायां श्रावयत ।**

२. **रिक्तस्थानं पूरयत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | ................ | नरेशौ | ................ |
| द्वितीया | नरेशम् | ................ | ................ |
| तृतीया | ................ | ................ | नरेशैः |
| चतुर्थी | ................ | नरेशाभ्याम् | ................ |

| | | | |
|---|---|---|---|
| पञ्चमी | ................ | ................ | नरेशेभ्यः |
| षष्ठी | नरेशस्य | ................ | ................ |
| सप्तमी | ................ | नरेशयोः | ................ |
| सम्बोधनम् | ................ | ................ | हे नरेशाः ! |

## ३. रूपावलिं लिखत

**राम-शब्दस्य रूपावलिः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | ................ | ................ |
| द्वितीया | ................ | ................ | ................ |
| तृतीया | ................ | ................ | ................ |
| चतुर्थी | ................ | ................ | ................ |
| पञ्चमी | ................ | ................ | ................ |
| षष्ठी | ................ | ................ | ................ |
| सप्तमी | ................ | ................ | ................ |
| सम्बोधनम् | ................ | ................ | ................ |

**कृष्ण-शब्दस्य रूपावलिः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ................ | ................ | ................ |
| द्वितीया | ................ | ................ | ................ |
| तृतीया | ................ | ................ | ................ |
| चतुर्थी | ................ | ................ | ................ |
| पञ्चमी | ................ | ................ | ................ |
| षष्ठी | ................ | ................ | ................ |
| सप्तमी | ................ | ................ | ................ |
| सम्बोधनम् | ................ | ................ | ................ |

## अनुप्रयोगः

१. **पाठे प्रदत्तान् श्लोकान् विहाय आत्मभिः ज्ञाताम् एकाम् चन्द्रवन्दनां लिखत ।**

२. **उचितशब्देन रिक्तस्थानं पूरयत**

(क) ........... न प्रमदितव्यम् । (सत्यात्, असत्यात्)

(ख) ........... न प्रमदितव्यम् । (धर्मात्, अधर्मात्)

(ग) ........... न प्रमदितव्यम् । (कुशलात्, अकुशलात्)

(घ) ........... न प्रमदितव्यम् । (स्वाध्यायप्रवचनाभ्याम्, क्रीडाभ्रमणाभ्याम्)

(ङ) ........... देयम् । (संविदा, असंविदा)

## कोषानुशीलनम्

### अथ धीवर्गः

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपत्ज्ञप्तिचेतना ॥
प्रतिभा धीःस्फूर्तिमती पण्डा सैव विवेकिनी ।
धीर्धारणावती मेधा सङ्कल्पः कर्म मानसम् ।
अवधानं समाधानं प्रणिधानं तथैव च ॥
चित्ताभोगो मनस्कारश्चर्चा सङ्ख्या विचारणा ।
विमर्शो भावना चैव वासना च निगद्यते ॥
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः ।
सन्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥
मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥
संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥
मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥

मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् ।
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।
कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ॥

## पदानुशीलनी

**लिङ्गव्यवस्था** - अत्र शब्दानाम् अव्ययत्वे (०), पुंलिङ्गत्वे(१), स्त्रीलिङ्गत्वे(२), नपुंसकलिङ्गत्वे(३), पुंस्त्रीलिङ्गत्वे(४), पुंनपुंसकलिङ्गत्वे(५) स्त्रीनपुंसकलिङ्गत्वे(६), पुंस्त्रीनपुंसकलिङ्गत्वे(७) इति सङ्केतः प्रदत्तो वर्तते ।

**बुद्धेर्नामानि** - (अत्र सर्वाणि नामानि स्त्रीलिङ्गे सन्ति)

बुद्धिः, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः, प्रेक्षा, उपलब्धिः, चित्, संवित्, प्रतिपत्, ज्ञप्तिः, चेतना ।

**धारणावती बुद्धिः** - मेधा २

**मनसः कर्म** - सङ्कल्पः १

**मनसः प्रेरणा** - अवधानम् ३, समाधानम् ३, प्रणिधानम् ३

**मनसः स्थितिः** - चित्ताभोगः १, मनस्कारः १, चर्चा २, सङ्ख्या २, विचारणा २

**अनुभवस्य स्मरणम्** - विमर्शः १, भावना २, वासना ३

**तर्कस्य नामानि** - अध्याहारः १, तर्कः १, ऊहः १

**सन्देहस्य नामानि** - विचिकित्सा २, संशयः १, सन्देहः १, द्वापरः १

**निर्णयस्य नामानि** - निर्णयः १, निश्चयः १

**नास्तिकबुद्धेर्नामानि** - मिथ्यादृष्टिः २, नास्तिकता २

**द्रोहचिन्तनस्य नामानि** - व्यापादः १, द्रोहचिन्तनम् ३

**सिद्धान्तस्य नामानि** - सिद्धान्तः १ राद्धान्तः १

**भ्रमस्य नामानि** - भ्रान्तिः २, मिथ्यामतिः २, भ्रमः १

**प्रतिज्ञायाः नामानि** - संविद् २, आगूः २, प्रतिज्ञानम् ३, नियमः १, आश्रवः १, संश्रवः १, अङ्गीकारः १, अभ्युपगमः १, प्रतिश्रवः १, समाधिः १

**मोक्षदा बुद्धिः** - ज्ञानम् ३

**कलात्मिका बुद्धिः** - विज्ञानम् ३

**मोक्षस्य नामानि** - मुक्तिः २, कैवल्यम् ३, निर्वाणम् ३, श्रेयः३, निसःश्रेयः ३, अमृतम् ३, मोक्षः १, अपवर्गः १

**अज्ञानस्य नामानि** - अज्ञानम् ३, अविद्या २, अहम्मतिः २,

**विषयभेदानां नामानि** - रूपम् ३, शब्दः १, गन्धः १, रसः १, स्पर्शः १,

**विषयाणां नामानि** - विषयः १, गोचरः १, इन्द्रियार्थः १,

**चक्षुरादीन्द्रियाणां नामानि** - हृषीकम् ३, विषयिन् ३, इन्द्रियम् ३,

**हस्तादि** - कर्मेन्द्रियम् ३,

**चक्षुरादि** - धीन्द्रियम् ३,

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत**

मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम् ।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥
संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥

२. **बुद्धेः सप्त नामानि पृथक् पृथग् लिखत ।**

३. **उदाहरणानुसारेण श्रेयशशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | श्रेयः | श्रेयसी | श्रेयांसि |
| द्वितीया | ........... | ........... | ........... |
| तृतीया | श्रेयसा | ........... | ........... |
| चतुर्थी | ........... | श्रेयोभ्याम् | ........... |

| | | | |
|---|---|---|---|
| पञ्चमी | ........... | ........... | श्रेयोभ्यः |
| षष्ठी | श्रेयसः | ........... | ........... |
| सप्तमी | ........... | ........... | ........... |
| सम्बोधनम् | हे श्रेयस् ! | ........... | ........... |

४. **"संश्रवः"इति कस्य नाम ?**

५. **संवित्शब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

अध्याहारस्तर्क.............।

...................निर्णनिश्चयौ ॥

७. **धीशब्दस्य रूपावलिं लिखत ।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

संशयः, उपलब्धिः, समाधिः, अङ्गीकारः, श्रेयः ।

९. **पर्यायान् परस्परं मेलयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| नियमः | संशयः |
| मोक्षः | संश्रवाः |
| सन्देहः | मुक्तिः |
| प्रज्ञा | निश्चयः |
| निर्णयः | बुद्धिः |

# बलपरीक्षणम्

द्वादशवर्षस्य वनवासं व्यत्येतुं पाण्डवा वनं गताः आसन् । ते सुन्दरमाश्रमं निर्माय वने स्थिता आसन् । तेषां तपस्विनामिव दिनचर्या प्रचलति स्म । वनवासस्य समये द्रौपद्यपि पाण्डवान् अनुगताऽसीत् । एकदा द्रौपदी आश्रमस्य प्राङ्गणे वृक्षच्छायायां स्थित्वा इतस्ततः पश्यन्ती आसीत् । आश्रमं परितः प्रकृतिः मनोहारिणी आसीत् । लताः, वृक्षाश्च पुष्पिता आसन्, धीरः समीरो वहति स्म । पक्षिणां कलरवैः समुद्भूतं सङ्गीतं मनो हरति स्म । मृगशावकानां शशकानाञ्च क्रियाकलापान् दृष्ट्वा द्रौपदी राजप्रासादस्यापि ऐश्वर्यं विस्मरति स्म । तदैव सुन्दरमेकं पुष्पं वायौ उड्डीय तस्याः पार्श्वेऽपतत् । द्रौपदी सहसा तत् पुष्पं हस्ते समुत्थाप्य अवलोकितवती ।

तस्य पुष्पस्य सौन्दर्येण सुगन्धेन च विमुग्धा द्रौपदी त्वरितं धावन्ती भीमसेनस्य समीपम् अगच्छत् । तत्र गत्वा सा उक्तवती, "आर्य ! पश्यतु एतस्य पुष्पस्य सौन्दर्यम् । आघ्राय चैतस्यामृतमयं सुगन्धमनुभवतु । पुष्पमेतद् महाराजाय युधिष्ठिराय समर्पयितुं वाञ्छामि । किं भवान् मम कृते एतादृशमन्यं पुष्पमानेतुं शक्नोति वा ? एतादृशस्य पुष्पस्य वाटिका यदि अस्माकमाश्रमे भवेत्तर्हि स्वर्गसमानो भवेदाश्रमः ।"

प्रियाया द्रौपद्या मनोरथं पूरयितुं भीमस्तानि पुष्पाण्यन्वेष्टुं निरगच्छत् । पुष्पस्य सुगन्धं जिघ्रन् स पूर्वां दिशं निरन्तरं प्राचलत् । अनेके वन्याः हिंस्रकाः पशव आक्रमणाय तस्य निकटे आगच्छन् । स्वस्य बलेन तान् सर्वान् पराजित्य सोऽग्रे गच्छन्नासीत् । बहुकालानन्तरं भीमो विशालस्य पर्वतस्य निकटे सम्प्राप्तः । तत्र कदलीनां विशालमुद्यानं दृष्ट्वा भीमो हृष्टो बभूव । उद्यानं प्रविष्टो भीमः मध्ये एकं वृद्धवानरमपश्यत् । स्वकीयेन लाङ्गूलेन मार्गमवरुध्य स्थितः स वानरः शरीरेण रुग्ण आसीत् । तस्य वर्णश्च रक्त आसीत् । किन्तु तस्य शरीरात् तेजोपुञ्जं व्यापृतम् आसीत् । तं दृष्ट्वा भीमः उच्चैः स्वरेण तमतर्जयत् ।

भीमस्य तर्जनेन सुप्तः स वानरो जागरितोऽभूत्। स किञ्चिदविगणय्य भीममवदत्, "मम स्वास्थ्यमधुना समीचीनं नास्ति। अहमत्र विश्रामं कुर्वन्नासम्। किन्तु मम विश्रामं त्वम् अवरुद्धवान्। निद्रितः कश्चन नैव उत्थापनीय इति न जानीषे ? कुतो गतस्ते विवेकः ? वयन्तु पशवोऽस्माकं विवेको नास्ति। त्वादृशानां विवेकिनां तु एतन्नोचितम्। वद कोऽसि ? कुत्र गन्तुमिच्छसि ? इतोऽग्रे गन्तुं बलिनोऽपि वीरा न पारयन्ते। मार्गोऽयं देवलोकाय वर्तते। सामान्याः मनुजाः इतोऽग्रे गन्तुं नैव समर्थाः।"

वानरस्य तादृशमुपदेशं श्रुत्वा भीमोऽतीव क्रुद्धोऽभवत्। सोऽवदत्, "अहं कोऽस्मीति त्वमवश्यं ज्ञास्यसि, प्रथमं त्वं वद, कोऽसि ? वानरः सन्नपि मनुष्यवत् शास्त्राणां वार्तां कुरुषे। जानासि कोऽहम् ? अहमस्मि कुरुवंशीयः कुन्तीसूनुर्वायुपुत्रः पाण्डवप्रवरो वीरो भीमाभिधेयः। शीघ्रं मार्गादपसर ! अहमग्रे चलिष्यामि। अहमग्रे गन्तुं समर्थोऽसमर्थो वेति मम पराक्रमस्य विषयः। न तव वानरस्य चिन्ताविषयः।"

भीमस्य तादृशं दृप्तं वचनं श्रुत्वा वानरः पुनः अवदत्, "सत्यमहं वानरः। किन्तु तवैव हिताय वदन्नस्मि, अग्रे मा याहि। परिणतिर्दुःखदायिनी भविष्यति।"

भीमः ततोऽपि क्रुद्धः सञ्जातः। क्रोधेन रक्तनयनः स उवाच, "अहं नैव पृच्छन्नस्मि अग्रे गन्तव्यं न गन्तव्यं वेति। अहं तु मार्गादपसर्तुं त्वामादिशन् अस्मि। कथमहं गमिष्यामीति मे विषयः।" इति।

वानरोऽवदत्, "अस्तु भ्रातः ! कनीयान् एव मे प्रतिभासि। अहं वृद्धोऽस्मि। रुग्णोऽस्मि। दौर्बल्यात् स्थातुमुत्थातुं च नैव शक्नोमि। मम वचनं तिरस्कृत्याग्रे गन्तुं वाञ्छसि चेन्मामुल्लङ्घ्य गच्छ।"

भीमः प्रावोचत्, "कस्यापि जन्तोरुल्लङ्घनं नोचितमिति शास्त्रेषु निर्दिष्टमस्ति। अत एव अहमत्रावरुद्धोऽस्मि। यथा हनूमान् समुद्रमुल्लङ्घ्य लङ्कां प्राविशत् तथैवाहं त्वामपि उल्लङ्घ्य अग्रे गन्तुं समर्थोऽस्मि।" तच्छ्रुत्वा वानरोऽवदत्, "तर्हि वद मां हनूमतः वृत्तान्तम्, कोऽस्ति सः ?"

भीमः प्रत्यवदत्, "मूर्खोऽसि, यतः वानरोऽसि। वानरो भूत्वा वानरराजं महावीरं हनूमन्तमपि न जानीषे ? यो भगवतः श्रीरामस्य परमभक्तो वीर आसीत्। श्रीरामस्य धर्मपत्नीं मातरं सीतामन्वेष्टुं शतयोजनमितं समुद्रमुल्लङ्घ्य सहसैव लङ्कां प्राविशत्। स हि हनूमान् मम ज्येष्ठभ्राता वर्तते। बलेन अहमपि तादृश एवास्मि। मार्गाद् दूरमपसर, अन्यथा मृत्युलोकं प्राप्स्यसि।" बलेन दृप्तं भीमस्य वचनं श्रुत्वा वानरः सकरुणम् उदतरत्, "हे वीर ! शान्तो

भव । वार्धक्यादहं चलितुं नैव शक्नोमि । मम उल्लङ्घनं यदि समुचितं न मन्यसे, तर्हि मम लाङ्गूलमपसार्य अग्रे याहि ।"

वानरस्य वचनं श्रुत्वा भीमस्तमुपाहसत् । सोऽचिन्तयत्, "मूर्खस्यैतस्य वानरस्य पुच्छमित्थं कठोरतया गृह्णामि, येन स व्यथितो भवेत् ।" इत्थं विचिन्त्य भीमो वानरस्य पुच्छं स्वस्य कठोरहस्ताभ्यां बलेन अगृह्णात्, परं वानरस्य पुच्छं चालयितुमपि असमर्थोऽभूत् । बहुवारं स पुच्छमपसारयितुं प्रायतत, तथापि पुच्छं नाचलत् । बलेन दृप्तस्य भीमस्य शरीरात् स्वेदधारा अपतन्, कर्णौ रक्तौ अभवताम् । भूयो भूयस्तेन विहिताः यत्नाः निष्फला अभवन् । अन्त्ये स श्रान्तोऽभवत्, तस्य गर्वो निराकृतः । भूमौ उपविश्य स चिन्तितवान्, "कोऽसौ मत्तोऽपि बलवत्तरो वानरः ?"

विनयान्वितः सन् भीमो मधुरस्वरेणापृच्छत्, "क्षम्यताम् महाभाग ! कोऽस्ति भवान् ? भवतः शिष्यो भवितुं वाञ्छामि ।"

वानरोऽवदत्, "भीम ! अहमेव तवाग्रजो वायुपुत्रो हनूमान् । अनुज ! अयं देवलोकस्य मार्गो वर्तते । मार्गेऽस्मिन् यक्षरक्षोगन्धर्वा विचरन्ति । एतस्मिन् मार्गे विपद आपतिष्यन्तीति विचार्य तव मार्गो मयावरोधितः । मनुष्याणामत्र सुरक्षा नास्ति । त्वं यत्पुष्पम् अन्विषन्नत्र सम्प्राप्तोऽसि, तदत्रैव निकटे सरोवरस्य समीपस्थे उपवने लभ्यते । यथेच्छमादाय आश्रमं प्रतिगच्छ ।"

हनूमतो वचनं श्रुत्वा भीमः शान्तोऽभवत् । स हनूमतः तद् रूपं द्रष्टुमैच्छत्, येन रूपेण हनूमान् समुद्रं लङ्घितवान् आसीत् । भीमस्य अनुरोधं स्वीकृत्य हनूमान् अपि पर्वतशिखरम् आरुह्य स्वस्य तदेव रूपं दर्शितवान् ।

हनूमतः शरीरात् सूर्यस्य इव प्रभा चतुर्षु दिक्षु व्याप्ता अभवत् । हनूमान् भीमम् आह, "वत्स ! बलेन दृप्तो मा भूः । इतोऽपि विशालं शरीरं ते दर्शयितुं शक्नोमि, तथापि अधुना समुचितः समयो नास्ति ।"

भीमः हनूमन्तं प्राणमत् । ततश्च पुष्पाण्यादाय आश्रमं प्रत्यागच्छत् ।

**शब्दार्थाः**

| मूलशब्दः | संस्कृतेऽर्थः | नेपालिभाषार्थः |
|---|---|---|
| व्यत्येतुं | यापयितुं | बिताउन |
| दिनचर्या | दैनन्दिनी | दैनिकी |
| कलरवैः | मधुरध्वनिभिः | चिरबिरले |

| | | |
|---|---|---|
| अन्वेष्टुम् | अन्वेषणं विधातुम् | खोजी गर्न |
| लाङ्गूलेन | पुच्छेन | पुच्छरले |
| अविगणय्य | अविचार्य | वास्ता नगरी |
| मनुष्यवत् | मानववत् | मान्छेले झैँ |
| परिणतिः | परिणामः | नतिजा |
| शतयोजनमितम् | शतयोजनेषु विस्तीर्णम् | सय योजन फैलिएको |
| उदतरत् | उत्तरितवान् | उत्तर दिए |
| प्रायतत | यत्नं विहितवान् | प्रयत्न गरे |
| भूयो भूयः | वारं वारम् | पटक-पटक |
| मा भूः | मा भव | नहोऊ |

**अभ्यासः**

**श्रवणम्**

१. **पाठस्य सर्वान् अनुच्छेदान् एकैकशः पठत । एकस्य पठने जाताः त्रुटीरन्ये निराकुरुत ।**

२. **पाठस्यैकादशम् अनुच्छेदं शिक्षकात् श्रुत्वाऽभ्यासपुस्तिकायां लिखत ।**

३. **अधोलिखितानां पदानां शुद्धोच्चारणं कृत्वा सन्धिविच्छेदं च कुरुत**

तपस्विनामिव, क्रियाकलापान्, चैतस्यामृतमयम्, पुष्पाण्यन्वेष्टुम्, किञ्चिदविगणय्य, कुन्तीसूनुर्वायुपुत्रः, परिणतिर्दुःखदायिनी, तिरस्कृत्याग्रे, समुद्रमुल्लङ्घ्य, भीमस्तमुपाहसत्, मधुरस्वरेणापृच्छत्, यक्षरक्षोगन्धर्वाः ।

४. **अधोलिखितानि वाक्यानि नेपाल्यामनूद्य वदत**

(क) आश्रमं परितः प्रकृतिः मनोहारिणी आसीत् ।

(ख) सुन्दरमेकं पुष्पं वायौ उड्डीय तस्याः पार्श्वेऽपतत् ।

(ग) अनेके वन्याः हिंस्रकाः पशव आक्रमणाय तस्य निकटे आगच्छन् ।

(घ) कुतो गतस्ते विवेकः ?

(ङ) मार्गाद् दूरमपसर, अन्यथा मृत्युलोकं प्राप्स्यसि ।

(च) भूयो भूयस्तेन विहिताः यत्नाः निष्फला अभवन् ।

(छ) भीमः हनूमन्तं प्राणमत् । ततश्च पुष्पाण्यादाय आश्रमं प्रत्यागच्छत् ।

## ५. अधस्तनस्य कथनस्य कथयिता कः ? वदत

(क) आर्य ! पश्यतु एतस्य पुष्पस्य सौन्दर्यम् ।

(ख) निद्रितः कश्चन नैव उत्थापनीय इति न जानीषे ?

(ग) शीघ्रं मार्गादपसर ! अहमग्रे चलिष्यामि ।

(घ) अस्तु भ्रातः ! कनीयान् एव मे प्रतिभासि ।

(ङ) वत्स ! बलेन दृप्तो मा भूः ।

## ६. एकवाक्येन उत्तराणि वदत

(क) पाण्डवानां वनवासस्यावधिः कति वर्तते स्म ?

(ख) द्रौपदी कुत्र स्थिता आसीत् ?

(ग) भीमः पुष्पमन्वेष्टुं कां दिशं प्राचलत् ?

(घ) मार्गे कस्य फलस्योपवनम् आसीत् ?

(ङ) वानरराजः कः ?

(च) स वानरः क आसीत् ?

## ७. अधस्तनीं लघुकथां श्रुत्वा समुचितं शीर्षकं निर्धारयत

श्रीकृष्णस्य निर्वाणस्य समाचारं श्रुत्वा पाण्डवानां मनसि वैराग्यम् उत्पन्नम् अभवत् । तेषु जीवनेच्छा समाप्ता । अभिमन्योः पुत्रं परीक्षितं राजसिंहासने नियोज्य पञ्च पाण्डवाः द्रौपद्या सह तीर्थयात्रार्थं प्रस्थानस्य निश्चयम् अकुर्वन् । हस्तिनापुराद् निर्गतास्ते विविधानि तीर्थस्थलानि गत्वा अन्ते हिमालयस्य आधारभूमौ सम्प्राप्ताः । तैः सह एकः शुनकोऽपि चलन् आसीत् । हिमालयस्य आरोहणक्रमे द्रौपदी, भीमः, अर्जुनः, नकुलः सहदेवश्च क्रमशः प्राणान् अत्यजन् । सत्यविद् युधिष्ठिरः किञ्चिदपि विचलितो नाभवत् । स धैर्येण अग्रे गच्छन् आसीत् । किन्तु अधुनाऽपि शुनकः तस्य पश्चात् मित्ररूपेण चलन् आसीत् । वस्तुतः स शुनको युधिष्ठिरस्य धर्म एव आसीत् ।

## पठनम्

१. **पाठं पठित्वा दश भिन्नानि क्रियापदानि अन्विष्य तेषां धातुं च लिखत ।**

२. **पाठस्य तृतीयमनुच्छेदं पठित्वा केषाञ्चन दशानां प्रातिपदिकानां विभक्तिं निर्दिशत ।**

३. **अधस्तनीं लघुकथां पठित्वा उत्तराणि लिखत**

अयोध्यायाः राजप्रासादे सीतारामौ स्थितौ आस्ताम् । तयोरग्रे हनूमान् नमस्कारमुद्रायां स्थित आसीत् । पार्श्वे च लक्ष्मणः स्थित आसीत् । सीता भाले सिन्दूरं धृतवती आसीत् । हनूमान् तद् अपश्यत् । तद् दृष्ट्वा हनूमान् अपृच्छत्, "मातः ! भवती किमर्थं स्वस्य सीमन्ते सिन्दूरं धारयति ?" सीता अवदत्, "एतेन मम स्वामिन आयुर्वर्धते, हितं भवति, स सर्वत्र विजयमवाप्स्यति ।" सीताया एतादृशं वचनं श्रुत्वा हनूमान् अपि स्वस्य शरीरे सिन्दूरलेपनं कर्तुमारब्धवान् । सर्वं शरीरं सिन्दूरेण रक्तं विहितवान् । तद् दृष्ट्वा राम अवदत्, "हनूमन् ! किमेतद् ?" हनूमान् अवदत्, "यदि सिन्दूर सीमन्ते सिन्दूरबिन्दोः धारणेन स्वामिनो विजयः, कल्याणं च भवति, तर्हि अहंतु भवतः सर्वदैव कल्याणं कामये । अतः सर्वस्मिन् शरीरे सिन्दूरं धारयन् अस्मि ।" एतत् श्रुत्वा श्रीरामः स्मितमुखेन अदवत्, "धन्योऽसि, यतस्ते भक्तिरीदृशी ।" तत आरभ्य एव जनाः हनूमतः विग्रहे सिन्दूरलेपनं कुर्वन्ति ।

(क) सीतारामयोः अग्रे क आसीत् ?

(ख) सीता स्वस्य सीमन्ते किं धृतवती आसीत् ?

(ग)) हनूमान् किम् अपृच्छत् ?

(घ) सिन्दूरधारणस्य विषये सीता किम् अवदत् ?

(ङ) हनूमान् किं कर्तुम् आरब्धवान् ?

(च) जनाः हनूमतः विग्रहे किं कुर्वन्ति ?

४. **पदानां सङ्गतिं सम्मेल्य वाक्यानि संशोधयत**

(क) आश्रमं परितः प्रकृतिः मनोहारी आसीत् ।

(ख) एतादृशस्य पुष्पाणां वाटिका यदि अस्माकमाश्रमे भवेत्तर्हि स्वर्गसमानं भवेदाश्रमः ।

(ग) शीघ्रं मार्गादपसर ! वयमग्रे चलिष्यामि ।

(घ) तर्हि वद मां हनूमतः वृत्तान्तम्, कोऽस्ति तत् ?

(ङ) भूयो भूयस्तेन विहिताः यत्नाः निष्फलः अभवत् ।

### ५. समुचितविकल्पं (✓) चिह्नद्वारा सङ्केतयत

(क) द्रौपदी पुष्पमादाय कस्य समीपं गतवती ?

(अ) भीमस्य (आ) युधिष्ठिरस्य (इ) अर्जुनस्य

(ख) भीमः क्रोधेन कीदृशो बभूव ?

(अ) शान्तः (ख) त्रस्तः (इ) रक्तनयनः

(ग) मार्गावरोधः केन विहित आसीत् ?

(अ) शिरसा (आ) पादयोः (इ) लाङ्गूलेन

(घ) स्वकीयं घोरं रूपं दर्शयितुं हनूमान् कुत्र आरूढवान् ?

(अ) कदलीवृक्षे (आ) पर्वतशिखरे (इ) भीमस्य स्कन्धयोः

### ६. अधस्तनपदानाम् अर्थं वदत

दिनचर्या, सहसा, बहुकालानन्तरम्, त्वादृशानाम्, तिरस्कृत्य, वार्धक्याद्, स्वेदधाराः, प्राणमत् ।

### ७. अधस्तनं गद्यं पठित्वा सारांशं वदत

स्पेनदेशे पिकासोनामा प्रसिद्धश्चित्रकार आसीत् । तेन रचितानि चित्राणि जनाः कोटिभिः रूप्यकैः क्रीणन्ति स्म । तस्य चित्रकलाया अनुरागिणः विश्वस्मिन् यत्रतत्र आसन् ।

एकदा कार्यवशात् तस्य कुत्रचिद् गन्तव्यम् आसीत् । तदर्थं मार्गे कस्मिंश्चन नगरे अतिथिगृहे (होटल) आवसत् । तत्र जनाः एष महांश्चित्रकार इति न तं जानन्ति स्म ।

तस्मिन्नेवातिथिनिवासे एका महिला निविष्टा आसीत् । सा तं परिचित्य तस्य समीपं गत्वा उक्तवती, "महोदय ! अहं भवतश्चित्रकलायाः प्रशंसिका अस्मि । कृपया, मम कृते एकं चित्रं रचयतु भवान् ।"

पिकासो उक्तवान्, "अधुना मम पार्श्वे चित्रलेखनाय सामग्र्यः नैव सन्ति, पुनः कदाचन रचयिष्यामि ।"

महिला पुनरुक्तवती, “भवता सह अहं पुनर्मेलिष्यामि न वा ? ध्रुवं परित्यज्य अध्रुवं कः सेवेत ?” इति ।

तस्यास्तादृशं सुदृढमनुरोधं श्रुत्वा पिकासो विचारमग्नोऽभवत् । अन्त्ये च सः स्वस्य कोषिकातः एकं स्वल्पं कर्गदपत्रमादाय अतिथिगृहस्य कर्मकरेण सह लेखनींगृहीत्वा क्षणेनैकेन चित्रमेकं विलिख्य दत्त्वा उक्तवान्, “गृहाणेदं कोटिरूप्यकाणां चित्रम् ।”

महिला तूष्णीं तं चित्रमादाय ततो निष्क्रान्ता । क्षणेनैकेन किमपि विलिख्य दत्त्वा पिकासो मां मूर्खं कारितवान् इति च विचारितवती । पुनः शङ्कावशात् सा तस्य चित्रस्य मूल्यं ज्ञातुम् आपणं गतवती । वस्तुतस्तच्चित्रं कोटिरूप्यकाणामासीत् ।

अन्येद्युः सा महिला पुनः चित्रकारस्य पिकासोमहाभागस्य समीपम् अगच्छत् । सा उक्तवती, “क्षणेनैकेन भवान् एतादृशम् बहुमूल्यं चित्रं निर्मातुं शक्नोति, कृपया मामपि चित्रलेखनं शिक्षयतु । क्षणेनैकेन न शक्नुयाम्, दिनेनैकेन त्ववश्यमेव किमपि निर्मातुं पारयेयम् ।”

एतच्छ्रुत्वा पिकासो स्मितवान् । स उक्तवान्, “क्षणेनैकेन मया यच्चित्रं रचितम्, तस्य शिल्पं मया त्रिंशता वर्षैर्लब्धम् । मया त्रिंशतो वर्षाणां साधनया एतद् ज्ञातम् । त्वमपि त्रिंशद्वर्षाणि चित्रकर्मणि लीना भव, अवश्यमेतादृशं चित्रं निर्मास्यसि ।”

अधुना महिलायाः समक्षे किमप्युत्तरं नासीत् । सा विस्मयेन पिकासोमहाभागस्य मुखमवलोक्य स्थिता मूर्तिवत् स्थिता आसीत् ।

## लेखनम्

१. **अधस्तनानि पदानि प्रयुज्य एकमेकं वाक्यं रचयत**

वनवासः, राजप्रासादः, शक्नोति, आक्रमणाय, निद्रितः, दौर्बल्यात्, क्षम्यताम्, यथेच्छम्, दर्शयितुम् ।

२. **समुचितपदं विन्यस्य रिक्तस्थानं पूरयत**

(क) द्रौपदी पुष्पं .............. समर्पयितुं वाञ्छति । (भीमाय, युधिष्ठिराय, अर्जुनाय)

(ख) पुष्पमन्वेष्टुं भीमः ............. दिशं प्राचलत् । (पूर्वाम्, दक्षिणाम्, पश्चिमाम्)

(ग) ........... कश्चन नैव उत्थापनीयः । (अलसः, बालकः, निद्रितः)

(घ) भीमः ............. वीरो वर्तते । (रघुवंशीयः, कुरुवंशीयः, शाक्यवंशीयः)

(ङ) कस्यापि जन्तोः ............... नोचितम् । (उल्लङ्घनम्, दर्शनम्, स्पर्शनम्)

(च) बलेन दृप्तस्य भीमस्य शरीरात् ........ अपतन् । (रक्तधाराः, स्वेदधाराः, जलधाराः)

### ३. पर्यायपदं विज्ञाय परस्परं मेलयत

| समूहः क | समूहः ख |
|---|---|
| कुन्तीसूनुः | शौर्यम् |
| निद्रितः | देहात् |
| वानरस्य | कुन्तीपुत्रः |
| पराक्रमः | सुप्तः |
| तिरस्कृत्य | आपदः |
| शरीरात् | मर्कटस्य |
| विपदः | अवज्ञाय |

### ४. अधस्तनप्रश्नान् सङ्क्षेपेण उत्तरयत

(क) आश्रमस्य प्रकृतिं वर्णयत ।

(ख) पुष्पान्वेषणाय भीमे निष्क्रान्ते किं किम् अभवत् ?

(ग) कदलीफलानाम् उद्याने वानरः किं कुर्वन्नासीत् ?

(घ) भीमः वानरस्य समीपे स्वस्य परिचयं कथं दत्तवान् ?

(ङ) कथानुसारेण वानरस्य परिचयं लिखत ।

(च) वानरः अन्त्ये किम् उपदिष्टवान् ?

### ५. कथानुसारं क्रमविन्यासं कृत्वा लिखत

( ) भीमस्य आश्रमाद् निर्गमनम्

( ) वायौ उड्डीय पुष्पस्य पतनम्

( ) द्रौपद्याः वृक्षच्छायायां स्थित्वा प्रकृतेरवलोकनम्

( ) भीमस्य कदलीफलानाम् उद्याने प्रवेशः

( ) हनूमता स्वस्य वास्तविकपरिचयप्रदानम्

( ) वानरस्य उपदेशं श्रुत्वा भीमस्य कोपः

( ) लाङ्गूलेन मार्गमवरुध्य वानरस्य विश्रामः

( ) उल्लङ्घयितुं पुच्छम् अपसारयितुं वा वानरस्य निर्देशः

( ) भीमस्य भूयो भूयो यत्नाः निष्फलाः

( ) पुष्पाण्यवचित्य भीमस्य प्रत्यागमनम्

( ) भीमहनुमतोः परस्परं संवादः, हनूमतोः घोररूपदर्शनञ्च

६. **कथां पठित्वा भीमवानरयोर्वार्तालापं संवादरूपेण लिखत ।**

७. **अधस्तनमनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

'महाभारतम्' विश्वस्य विशालतमं महाकाव्यम् अस्ति । अस्य महाकाव्यस्य रचयिता व्यासो वर्तते । महाभारते अनेके कथाः वर्णिताः सन्ति । मानवस्य जीवने आवश्यकानि अनेकानि ज्ञानानि तत्र लभ्यन्ते । धर्मः, दर्शनम्, राजनीतिः, नीतिश्चेत्यादयो बहवो विषया महाभारते वर्तन्ते । महाभारतस्य कथा आधृत्य अनेकानि काव्यानि रचितानि वर्तन्ते । विशेषतो महाभारते कौरवाणां पाण्डवानां च कथा वर्णिता वर्तते । यद्यपि 'महाभारतम्' काव्यं वर्तते, तथाप्येतस्मिन् वर्णिताः विषया भारतवर्षस्य इतिहासरूपा वर्तन्ते, अतो जना महाभारतम् इतिहासं वदन्ति । विदुषां मतानुसारेण 'महाभारतम्" पञ्चमो वेदो वर्तते । श्रीमद्भगवद्गीतारूपो ज्ञानराशिरपि महाभारतस्यैव अंशो वर्तते । धर्मस्य अर्थस्य कामस्य मोक्षस्य च विषये महाभारते सर्वम् उक्तं वर्तते । अत एव महाभारतस्य विषये उच्यते-

**धर्मे अर्थे च कामे च मोक्षे च भरतर्षभ ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥**

(क) महाभारतस्य रचयिता कः ?

(ख) महाभारते के विषयाः लभ्यन्ते ?

(ग) विशेषतः केषां कथा महाभारते वर्णिता विद्यते ?

(घ) विदुषां मतानुसारेण महाभारतं किं वर्तते ?

(ङ) महाभारतशब्दस्य सर्वाणि रूपाणि लिखत ।

## अनुप्रयोग

१. **अधोलिखितस्य संवादस्य आधारेण लघुकथां लिखत**

**व्यासः** – गणेश ! महतो ग्रन्थस्य रचना मदीये मस्तके अस्ति । तं लिपिबद्धं कर्तुं भवतः सहयोगं कामये ।

**गणेशः** – तदर्थं तत्परोऽस्मि, परन्तु ममापि अस्ति एकः समयबन्धः । स भवता पूरणीयः ।

**व्यासः** – कीदृशः समयबन्धः ?

**गणेशः** – यदा लेखनं प्रारभ्यते तदनु भवतः कथनम् अवरुद्धं न भवतु । यदि भवान् अवरुद्धा भवति तर्हि मम लेखनी च अवरुद्धा भविष्यति । ततो लेखनं त्यक्ष्यामि ।

**व्यासः** – भवतः समयबन्धं सहर्षं स्वीकरोमि । ममापि अस्ति एकः समयबन्धः । यदा भवान् लेखनीं चालयिष्यति तदा प्रत्येकं श्लोकस्य अर्थो भवता बोद्धव्यो भविष्यति । स्वीकरिष्यति भवान् ?

**गणेशः** - स्वीकरोमि । शृणोमि, जानामि, ततो लिखामि ।

२. **शिक्षकसहयोगेन रामायणमहाभारतपुराणादिग्रन्थानां कामपि एकां प्रेरककथां विलिख्य कक्षायां श्रावयत ।**

३. **अधोलिखितानि सूत्राणि संयोज्य लघुकथां रचयत**

(क) राजा दशरथो धनुर्विद्यायां निपुणः ।

(ख) शब्दमेव निशम्य लक्ष्यप्रहारे समर्थः ।

(ग) आखेटक्रीडायै तस्य वनगमनम् ।

(घ) श्रवणकुमारस्य वृद्धौ दृष्टिविहीनौ च मातापितरौ ।

(ङ) दृष्टिविहीनौ मातापितरौ त्यक्त्वा श्रवणकुमारस्य जलाशये गमनम् ।

(च) राज्ञो जलभरणस्य ध्वनिश्रवणम् ।

(छ) हस्तिनां जलक्रीडाया आशङ्का ।

(ज) राज्ञा शब्दभेदिनो बाणस्य प्रहरणम् ।

(झ) श्रवणकुमारस्य अनुक्षणमेव मृत्युः ।

(ञ) पुत्रशोकेन श्रवणकुमारस्य मातापित्रोर्मृत्युः ।

(ट) तयोः शापवशाद् राज्ञो दशरथस्यापि पुत्रशोकेन मृत्युः ।

## कोषानुशीलनम्

**धीवर्गः**

तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः ।
तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥
विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् ॥
समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत् ।
शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः ॥
अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः ।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ॥
कृष्णे नीलासितश्यामकालश्याममेचका ।
पीतो गौरो हरिद्राभः पलाशो हरितो हरित् ॥
लोहितो रोहितो रक्तः शोणः कोकनदच्छविः ।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥
श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ।
कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥
चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥
॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे धीवर्गः॥

## पदानुशीलनी

**रुचेर्नामानि**

**कषायस्य नामनी** - तुवरः १, कषायः ५,

**मधुरस्य रुचिः** - मधुरः १

**लवणस्य रुचिः** - लवणः १,

**कटोः रुचिः** - कटुः १,

**तिक्तस्य रुचिः** - तिक्तः १,

**अम्लस्य रुचिः** - अम्लः १

(इतः सर्वे पुंलिङ्गिशब्दाः सन्ति ।)

**विमर्दोत्पन्नो गन्धः** - परिमलः

**आमोदगन्धः** - आमोदः

**दूरपर्यन्तं प्रसारितः सुगन्धः** - समाकर्षी, निर्हारी

**सुगन्धस्य नामानि** - सुरभिः, घ्राणतर्पणः, इष्टगन्धः, सुगन्धिः,

**मुखवासना** - आमोदी, मुखवासनसः

**दुर्गन्धस्य नामानि** - ........, दुर्गन्धः,

**कुत्सितवस्तुनो गन्धः** - विस्रः, आमगन्धी,

**श्वेतवर्णस्य नामानि**

शुक्लः, शुभ्रः, शुचिः, श्वेतः, विशदः, श्येतः, पाण्डुरः, अवदातः, सितः, गौरः, अवलक्षः, धवलः, अर्जुनः ।

**श्वेतपीतयोर्मिश्रणम्** - हरिणः, पाण्डुरः, पाण्डुः,

**धूसरवर्णः** - ईषत्पाण्डुः, धूसरः ।

**कृष्णवर्णस्य नामानि** - कृष्णः, नीलः, असितः, श्यामः, कालः , श्यामलः, मेचकः ,

**पीतवर्णस्य नामानि** - पीतः, गौरः, हरिद्राभः,

**हरितवर्णस्य नामानि** - पालाशः, हरितः, हरित्,

**रक्तवर्णस्य नामानि** - लोहितः, रोहितः, रक्तः, शोणः, कोकनदच्छविः,

**कृष्णरक्तयोर्मिश्रणम्** - अरुणः

**पाटलवर्णः** - पाटलः,

**कृष्णपीतयोर्मिश्रणम्** - श्यावः, कपिशः,

**धूम्रवर्णस्य नामानि** - धूम्रः, धूमलः, कृष्णलोहितः,

**कपिलवर्णस्य नामानि** - कडारः, कपिलः, पिङ्गः, पिशङ्गः, कद्रुः, पिङ्गलः,

**चित्रविचित्रयोर्नामानि** - चित्रम् ३, किर्मीरः, कल्माषः, सबलः, कर्बुरः ।

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः ॥

२. **श्वेतवर्णस्य नव नामानि पृथक् पृथग् लिखत ।**

३. **उदाहरणानुसारेण श्वेतशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | श्वेतः | ............... | ............... |
| द्वितीया | ............... | ............... | श्वेतान् |
| तृतीया | ............... | ............... | श्वेताभिः |
| चतुर्थी | ............... | श्वेताभ्याम् | ............... |
| पञ्चमी | ............... | ............... | श्वेतेभ्यः |
| षष्ठी | ............... | ............... | ............... |
| सप्तमी | ............... | .............. | ............... |
| सम्बोधनम् | हे श्वेत ! | ............... | ............... |

४. “मेचकः“ इति कस्य नाम ?

५. कषायशब्दः कस्मिन् लिङ्गे अस्ति ?

६. रिक्तस्थानं पूरयत

..............पाण्डराः।

अवदातः ...................॥

७. कटुशब्दस्य रूपावलिं लिखत ।

८. प्रदत्तैः शब्दैः वाक्यानि रचयत

लवणः, सुरभिः, सितः, हरित्, पिङ्गलः

९. पर्यायान् परस्परं मेलयत

| समूहः क | समूहः ख |
| --- | --- |
| धूम्रः | श्यामलः |
| नीलः | पालाशः |
| हरितः | धूमलः |
| पीतः | गौरः |
| निर्णयः | सुगन्धिः |

तृतीयः पाठः

# संस्कृतिमयं कर्णालीक्षेत्रम्

नेपालः सांस्कृतिकराष्ट्रं वर्तते । अत्र सर्वप्राचीना संस्कृतिः प्रचलिता अस्ति । नेपालस्य सर्वेषु क्षेत्रेषु जनाः स्वस्वसंस्कृतिमनुसरन्ति । सांस्कृतिकदृष्ट्या नेपालस्य सर्वे भागाः ख्यातनामानः सन्ति । एतेषु कर्णालीप्रदेशो विशेषमहत्त्वं बिभर्ति । एष एव प्रदेशो नेपाली-भाषाया उद्‌गमस्थलम् अस्ति ।

कर्णालीसंस्कृतिर्नेपालस्य प्राचीना संस्कृतिरस्ति । अस्मिन्नेव प्रदेशे एकादशशताब्द्यां नेपाली-भाषायाः प्रयोगोऽभवत् । तस्मादेव समयात् विविधपर्वणां प्रचलनं प्रारब्धमभवत् । विविधदेवतानां मन्दिराणि स्थापितानि अभवन् । एतेषु मन्दिरेषु मूर्तिकलायाः प्रयोगोऽभवत् । तस्मिन्नेव काले लोकगीतस्य लोकगाथायाश्च रचना सञ्जाता ।

कर्णालीप्रदेशस्य जुम्लामण्डले चन्दननाथभैरवनाथयोर्मन्दिरे स्तः । तथैव डोल्पामण्डले त्रिपुरासुन्दर्या मन्दिरं प्रसिद्धं वर्तते । हुम्लामण्डले कालिकोटमण्डले च विविधदेवदेवीनां प्राचीनानि मन्दिराणि सन्ति । कर्णालीप्रदेशे बहूनि पर्वाणि प्रचलितानि सन्ति । तेषु मस्टोपरम्परा, गौरापूजा, विजयादशमी, भ्रातृपूजा इत्यादीनि प्रमुखाणि सन्ति । कर्णाली-प्रदेशे प्रचलितेषु पर्वसु मस्टोपरम्परा विशेषमहत्त्वं लभते । मस्टोपरम्परायां मस्टोदेवता पूज्यते ।

कर्णालीप्रदेशे गौरापूजा अपि प्रचलिता विद्यते । गौरा गौरीशब्दस्य अपभ्रंशरूपमस्ति । गौरापूजा भाद्रमासस्य शुक्लपक्षे भवति । इयं पूजा पञ्चदिवसं यावत् आयोज्यते । गौरापूजायां गौरीमहेश्वरयोः पूजनं भवति ।

गौरापूजाया विषये एका किंवदन्ती प्रचलिता विद्यते । एतदनुसारेण गौरा मेषपालस्य पुत्री आसीत् । सा मेषान् चारयति स्म । मएशवरः (महेश्वर) च कृषकस्य पुत्र आसीत् । स धेनूश्चारयति स्म । वने तयोर्मेलनमभवत् । महेश्वरो गौरां प्रति आकृष्टोऽभवत् । महेश्वरो गौर्या सह विवाहं कर्तुमैच्छत् । ततो गौरा अहं महेश्वरमेव पतिमिच्छामि नान्यम् इत्यकथयत् । तदनन्तरं सोऽपि स्वस्य वास्तविकं महेश्वररूपमदर्शयत् । ततस्तौ एवं वृत्तान्तं मातापित्रोः समीपे अकथयताम् । परन्तु गौर्या माता भिक्षुकाय महेश्वराय स्वकन्यां दातुं नैच्छत् । अन्त्ये

गौरा महेश्वरं पतिं प्राप्तवती । ततो गौरापूजायाः प्रारम्भः सञ्जातः । इयं पूजा कर्णालीप्रदेशे अद्यापि विशेषेण विधीयते ।

कर्णालीप्रदेशे स्वजातिकुलपरम्परया विविधाः संस्काराः सम्पाद्यन्ते । तेषु अवसरेषु महिला मङ्गलगान कुर्वन्ति । स्थानीयभाषिकायां मङ्गलगानं 'मागल' इति निगद्यते । अस्मिन् प्रदेशे प्राचीना अभिलेखा अपि सन्ति । तेषु सांस्कृतिकगतिविधयः प्रतिबिम्बिता दृश्यन्ते । नेपालीभाषायाः साहित्यस्य च इतिहासं ज्ञातुं कर्णालीक्षेत्रं मूल्यवद् वर्तते । इत्थं भाषासाहित्यकलादृष्ट्या कर्णाली-संस्कृतिर्नेपालस्य प्राचीना समृद्धा च मन्यते ।

## शब्दार्थाः

| | |
|---|---|
| सर्वप्राचीना | : सबैभन्दा पुरानो |
| अनुसरन्ति | : पालना गर्दछन् |
| उद्गमस्थलम् | : पैदा भएको ठाउँ |
| बिभर्ति | : धारण गर्छ |
| अपभ्रंशरूपम् | : परिवर्तन भएको रूप |
| आयोज्यते | : आयोजना गरिन्छ |
| किंवदन्ती | : लोकले भन्दै आएको कथन |
| आकृष्टः | : आकर्षित भयो |
| विशेषेण | : खास गरेर |
| वृत्तान्तः | : कुराकानी, विवरण |
| प्रतिबिम्बिता | : झल्किएका |
| समृद्धा | : धनी |

## श्रवणं भाषणं च

**१. पाठस्य मौनपठनं द्रुतगत्या सस्वरवाचनं च कुरुत ।**

**२. पाठस्य द्वितीयानुच्छेदस्य अनुवाचनं कुरुत ।**

३. **अधोलिखितान् शब्दान् शुद्धमुच्चारयत**

सांस्कृतिकराष्ट्रम्, कर्णालीसंस्कृतिः, एकादशशताब्द्याम्, विविधदेवदेवीनाम्, गौरापूजायाः, स्वजातिकुलपरम्परया, स्थानीयभाषिकायाम्, समृद्धा ।

४. **प्रदत्तपदानामर्थं लिखत**

प्रचलिता, क्षेत्रेषु, एषः, सञ्जाता, पर्वाणि, अद्यापि, धेनूः, अभिलेखाः, मूल्यवत् ।

५. **शिक्षकस्य सहयोगेन कर्णालीसंस्कृतेर्विषये प्रश्नोत्तरं कुरुत ।**

६. **उदाहरणानि श्रुत्वा सखिभिःसह विमृशत**

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| एष एव | एषः + एव | विसर्गसन्धिः |
| अस्मिन्नेव | अस्मिन् + एव | हल्सन्धिः |
| तस्मिन्नेव | तस्मिन् + एव | हल्सन्धिः |
| सञ्जाता | सम् + जाता | हल्सन्धिः |
| लोकगाथाश्च | लोकगाथाः + च | विसर्गसन्धिः |
| नान्यत् | न + अन्यत् | स्वरसन्धिः |
| इत्यकथयत् | इति + अकथयत् | स्वरसन्धिः |
| सोऽपि | सः + अपि | विसर्गसन्धिः |
| ततस्तौ | ततः + तौ | विसर्गसन्धिः |

## पठनम्

१. **अधोलिखितं गद्यभागं पठित्वा प्रश्नान् उत्तरयत**

मूर्तेर्निर्माणे आवश्यकी कुशलता मूर्तिकला उच्यते ।धातु-पाषाणमृत्तिका-काष्ठादिभिर्निर्मिता देवादीनामाकृतिरेव मूर्तिः कथ्यते । नेपालेऽपि प्राचीनकालादेव मूर्तेर्निर्माणं सञ्जातं विद्यते । नेपाले मूर्तिकलाया विकासो लिच्छविकालेऽभवत् । लिच्छविकाले निर्मितासु मूर्तिषु विरूपाक्षस्य मूर्तिः, पलाञ्चोकभगवत्या मूर्तिः, चाँगुनारायणस्य मूर्तिश्च प्रमुखाः सन्ति ।

मल्लकालेऽपि विविधा मूर्तयो निर्मिताः । अस्मिन् समये निर्मितासु मूर्तिषु फर्पिङस्थाया महिषासुरमर्दिन्या मूर्तिः, बनेपास्थस्य सूर्यनारायणस्य मूर्तिः, भक्तपुरमण्डलस्थस्य विष्णोर्भैरवस्य च मूर्तिः, हाँडीगाउँस्थायाः सरस्वत्या मूर्तिश्च प्रमुखाः सन्ति । अधुनापि मूर्तयो निर्मीयमाणाः सन्ति । मूर्तिकला नेपालस्य गौरवं वर्तते ।

**प्रश्नाः**

(क) मूर्तिकला कीदृशी कुशलता वर्तते ?

(ख) नेपाले मूर्तिकलाया विकासः कदा अभवत् ?

(ग) पलाञ्चोकभगवत्या मूर्तिः कस्मिन् काले निर्मिता ?

(घ) महिषासुरमर्दिन्या मूर्तिः कुत्र वर्तते ?

(ङ) नेपालस्य गौरवं किम् ?

## २. अधोलिखितमनुच्छेदं पठित्वा शीर्षकं निर्धारयत

'कृ'धातोः क्तिन् (ति) प्रत्यये विहिते 'कृति' शब्दो निर्मीयते । 'कृति' शब्दे 'सम्' उपसर्गस्य संयोजने कृते 'संस्कृति'शब्दो निष्पद्यते । 'कृति'शब्दस्यार्थः कार्यं भवति । 'सम्'इत्यस्यार्थः 'समीचीन' इति भवति । अतः संस्कृतिशब्दस्य सामान्यार्थः 'समीचीनं कार्यम्' इत्थं भवति । अत्र प्रयुक्तः संस्कृतिशब्दोऽपि मनुष्यसमाजे प्राचीनकालादारभ्याधुनापर्यन्तं प्रचलितानि समीचीनकार्याणि बोधयति । तेषु कार्येषु कला, साहित्यम्, इतिहासः, धर्मः, दर्शनानि, पर्वाणि, जीवनशैली इत्यादीनि मुख्यानि सन्ति । अतः 'संस्कृति'शब्देन यस्य कस्यापि देशस्य कलायाः, साहित्यस्य, इतिहासस्य, धर्मस्य, दर्शनानाम्, विविधपर्वणाम्, जीवनशैलीनाञ्च बोधो भवति ।

## ३. अधोलिखितं गद्यभागं पठित्वा प्रकृतेः पूजायां पूजनीयानां वस्तूनां नामानि वदत

सर्वे धर्मावलम्बिनः प्रकृतेः पूजां कुर्वन्ति । जना माता भूमिः पृथिव्या पुत्रोऽहमित्युक्तिमनुसृत्य भूमिं मातृरूपेण पूजयन्ति । तथैव आकाशस्थान् सूर्यचन्द्रादीन्, ताराश्च पूजयन्ति, वृक्षाणामपि पूजनं कुर्वन्ति । अश्वत्थवटादीनां वृक्षाणां पूजनेन सुस्वास्थ्यं लभ्यते इति भावना धर्मावलम्बिनां विद्यते । केचन तुलसीं राधारूपेण पूजयन्ति । तथैव "सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः" इत्युक्तिमनुसृत्य समुद्रादीन् जलाशयान् पापक्षयकरणाय पूजयन्ति ।

## लेखनम्

### १. शुद्धं कृत्वा लिखत

सम्कृतिः, महत्वम्, सन्जाता, लमते, कर्नाली, प्राप्तवति ।

### २. शब्दं प्रयुज्य वाक्यं रचयत

इयम्, एतेषु, पर्वसु, गौरापूजा, कर्णालीप्रदेशः, मन्दिरम्, महेश्वरः ।

### ३. उत्तराणि लिखत

(क) नेपालीभाषाया उद्गमस्थलं कुत्रास्ति ?

(ख) लोकगीतस्य रचना कदा अभवत् ?

(ग) गौरा कस्य शब्दस्य अपभ्रंशरूपं वर्तते ?

(घ) गौरा किम् इच्छति स्म ?

(ङ) मागलशब्दस्य कोऽर्थः ?

### ४. रिक्तस्थानं पूरयत

(क) .......... सांस्कृतिकराष्ट्रं वर्तते ।

(ख) कर्णालीसंस्कृतिः .......... प्राचीना संस्कृतिरस्ति ।

(ग) गौरापूजा भाद्रमासस्य .......... भवति ।

(घ) .......... महेश्वरं पतिं प्राप्तवती ।

(ङ) नेपालीभाषायाः साहित्यस्य च इतिहासं ज्ञातुं .......... मूल्यवत् वर्तते ।

### ५. क्रियापदानां कालपरिवर्तनं कुरुत

| | |
|---|---|
| (क) गोपालः संस्कृतम् अपठत् । | (वर्तमानकाले) |
| (ख) केशवः पुष्पाणि आनयति । | (भूतकाले) |
| (ग) शीघ्रं वृष्टिर्भवति । | (भविष्यत्काले) |
| (घ) अहं मन्दिरं गमिष्यामि । | (वर्तमानकाले) |
| (ङ) परीक्षायाः परिणामा आगच्छन्ति । | (भविष्यत्काले) |
| (च) वञ्चका असत्यं वदन्ति । | (भूतकाले) |

६. यथेच्छं पाठस्य एकस्यानुच्छेदस्य अनुलेखनं कुरुत ।

## व्याकरणबोधः

### इदम्शब्दस्य रूपावलि

**पुंलिङ्गे**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् | इमौ | इमान् |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात्, द् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

**स्त्रीलिङ्गे**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम् | इमे | इमाः |
| तृतीया | अनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः | आसु |

**नपुंसकलिङ्गे**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| --- | --- | --- | --- |
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात्, द् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

१. **इदम्शब्दस्य त्रिषु लिङ्गेषु रूपावलिं विलिख्य श्रावयत ।**

२. **अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत**

प्रचलिता, प्रदेशः, उद्गमः, प्रयोगः, सञ्जाता, प्रमुखाणि, विशेषः, अपभ्रंशः, आकृष्टः, विवाहः, अभिलेखः, प्रतिबिम्बितः, समृद्धा ।

३. **नेतृ-शब्दस्य पुंलिङ्गे रूपावलिं पठत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| --- | --- | --- | --- |
| प्रथमा | नेता | नेतारौ | नेतारः |
| द्वितीया | नेतारम् | नेतारौ | नेतॄन् |
| तृतीया | नेत्रा | नेतृभ्याम् | नेतृभिः |
| चतुर्थी | नेत्रे | नेतृभ्याम् | नेतृभ्यः |
| पञ्चमी | नेतुः | नेतृभ्याम् | नेतृभ्यः |
| षष्ठी | नेतुः | नेत्रोः | नेतॄणाम् |
| सप्तमी | नेतरि | नेत्रोः | नेतृषु |
| सम्बोधनम् | हे नेतः ! | हे नेतारौ ! | हे नेतारः ! |

## अनुप्रयोग

१. आत्मभिर्ज्ञातानां सांस्कृतिकशब्दानां नामानि तालिकायां विलिख्य कक्षायां प्रदर्शयत ।

२. स्वस्य समुदाये प्रचलितायाः संस्कृतेर्विषये पञ्चदशवाक्यानाम् अनुच्छेदं लिखित्वा शिक्षकं दर्शयत ।

३. शिक्षकस्य सहयोगेन संस्कृतिसम्बद्धानि पुस्तकानि सङ्कलय्य पठनाभ्यासं कुरुत ।

## कोषानुशीलनम्

## शब्दादिवर्गः

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥
अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ।
तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥
श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः ।
स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥
शिक्षेत्यादि श्रुतेरङ्गमोङ्कारप्रणवौ समौ ।
इतिहासः पुरावृत्तमुदात्ताद्यास्त्रयः स्वराः ॥
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ॥
प्रबन्धकल्पना कथा प्रवह्लिका प्रहेलिका ।
स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ॥
समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।
वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः ॥
आख्याह्वे अभिधानं च नामधेयं च नाम च ।
हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ॥
विवादो व्यवहारः स्यादुपन्यासस्तु वाङ्मुखम् ।
उपोद्घात उदाहारः शपनं शपथः पुमान् ॥

प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः ।
यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः ॥
आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टं तु घोषणा ।
काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥
अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥
पारुष्यमतिवादः स्याद्भर्त्सनं त्वपकारगीः ।
यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥
तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ॥

## पदानुशीलनी

**भाषायाः नामानि**

ब्राह्मी २, भारती २, भाषा २, गीः २, वाक् २, वाणी २, सरस्वती २,, व्याहारः १, उक्तिः २, लपितम् ३, भाषितम् ३, । वचनम् ३ वचः ३ ।

**अशुद्धशब्दस्य नामानि** - अपभ्रंशः १, अपशब्दः १

**सार्थकपदम्** - शब्दः १,

**कारकान्विता** - क्रिया,

**तिङ्सुबन्तसमूहः** - वाक्यम् ३,

**वेदस्य नामानि** - श्रुतिः २, वेदः १, आम्नायः १,

**वेदोक्तधर्मः** - त्रयीधर्मः १,

**त्रयो वेदाः** - ऋच् २, साम३, यजुः ३,

**त्रयाणां वेदनां समूहः** - त्रयी २,

**वेदाङ्गः** - शिक्षाकल्पादिः,

**ॐकारस्य नामनी** - ओङ्कारः १, प्रणवः १,

**इतिहासस्य नामनी** । पुरावृत्तम् ३ इतिहासः १,

**उदात्तादि** - स्वरः १,

**तर्कविद्या** - आन्वीक्षिकी २

**अर्थशास्त्रम्** - दण्डनीतिः २, ज्ञ ।

**सत्यकथा** - आख्यायिका २,

**लक्षणयुक्तपुराणम्** - पुराणम् ३,

**कल्पितप्रबन्धः** - कथा २,

**प्रहेलिका कथा** - प्रवह्लिका २, प्रहेलिका २,

**धर्मशास्त्रम्** - स्मृतिः २, धर्मसंहिता २,

**सङ्ग्रहग्रन्थः** - समाहृतिः २, सङ्ग्रहः १

**समस्यापूर्तिः** - समस्या २, समासार्था २

**लोके प्रचलन्ती वार्ता** - किंवदन्ती २, जनश्रुतिः २

**वार्तायाः नामानि** - वार्ता २, प्रवृत्तिः २, वृत्तान्तः १ उदन्तः १,

**नाम्नः नामानि** - आह्वयः १, आख्या २, आह्वा २, नामधेयम् ३ नाम ३

**आह्वानम्** - हूतिः२, आकारणा २, आह्वानम् ३,

**बहुभि आह्वानम्** - संहूतिः २

**विवादः** - विवादः १, व्यवहारः १

**वदनाभ्यासः** - उपन्यासः१, वाङ्मुखम् ३,

**वाक्यसन्दर्भोत्थापनम्** - उपोद्घातः १, उदाहारः १

**शपनम्** - शपनम् ३ शपथः १.

**प्रश्नस्य नामानि** - प्रश्नः१, अनुयोगः १, पृच्छा २,

**प्रत्युत्तरम्** - प्रतिवाक्यम् ३. उत्तरम् ३,

**मिथ्यारोपः** - मिथ्याभियोगः १, अभ्याख्यानम् ३

**मिथ्याभिशंसनम्** - मिथ्याभिशंसनम् ३, अभिशापः १,

**आह्लादकथनम्** - प्रणादः १

**यशसो नामानि**

यशः ३, कीर्तिः २, समज्ञा २, स्तवः१, स्तोत्रम् ३, स्तुतिः २, नुतिः२,

बहुबारकथनम् - आम्रेडितम् ३,

**उच्चैः कथनम्** - घोषणा २

**भीतिवशादुच्चारितः शब्दः** - काकुः २

**निन्दायाः नामानि**

अवर्णः १, आक्षेपः १, निर्वादः १, परीवादः १, अपवादः १, उपक्रोशः १, जुगुप्सा २, कुत्सा २, निन्दा गर्हणम् ३

**कठोरवचनम्** - पारुष्यम् ३, अतिवादः १,

**भर्त्सनस्य नाम्नी** - भर्त्सनम् ३, अपकारगीरः २

**निन्दापरकं वचः** - परिभाषणम् ३ .

**अश्लीलं वचः** - आक्षारणम् ६

**वार्तालापः** - आभाषणम् ३, आलापः १

**अनर्थवदनम्** - प्रलापः १

**अभ्यासः**

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे ।
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥

२. **भाषायाः सप्त नामानि पृथक् पृथग् लिखत ।**

३. **उदाहरणानुसारेण भारतीशब्दस्य रूपावलिं पूरयत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | भारती | ............ | ............ |
| द्वितीया | ............ | ............ | भारतीः |

| | | | |
|---|---|---|---|
| तृतीया | भारत्या | ............ | ............ |
| चतुर्थी | ............ | भारतीभ्याम् | ............ |
| पञ्चमी | ............ | ............ | भारतीभ्यः |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | भारतीषु |
| सम्बोधनम् | हे भारति ! | ............ | ............ |

४. **"उदन्तः"इति कस्य नाम ?**

५. **उक्तिशब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

यशः .............. स्तुतिर्नुतिः ।
आम्रेडितं ..............तु घोषणा ॥

७. **श्रुतिशब्दस्य रूपावलिं लिखत ।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

पुराणम्, प्रवृत्तिः, नाम, विवादः, पृच्छा ।

९. **पर्यायान् परस्परं मेलयत**

| समूहः क | समूहः ख |
|---|---|
| यशः | प्रणवः |
| निन्दा | समज्ञा |
| ओङ्कारः | आख्या |
| शपथः | जुगुप्सा |
| नाम | शपनम् |

# कार्यालयीयपत्रम्

दिनाङ्कः २०६९/०१/३०

श्रीमन् नगरपालिकाप्रमुख !

गौरनगरपालिका ।

**विषयः नगरक्षेत्रस्य व्यवस्थापनाय निवेदनम् ।**

महोदयः,

अयं चिन्ताया विषयोऽस्ति यद् अस्माकं नगरे विकृतयो वर्धमानाः सन्ति । ताभिर्नगरस्य गौरवं क्षीयमाणं वर्तते । नगरे दृष्टासु विकृतिषु पशूनां मार्गे अनियन्त्रितं सञ्चलनममन्यतमं वर्तते । तत्र गावः, अश्वाः, अजाः, वृषभाः, गर्दभाः, शूकराः कुक्कुराश्च स्वच्छन्दं विचरन्ति । पशुधनिनो बन्धनात् तान् मोचयन्ति, परं किमपि दायित्वं न पूरयन्ति । मार्गेषु पशूनां सञ्चलनाद् यातायातावरोधो जायते । ततो दुर्घटना च सम्भवति । अनियन्त्रिताः पशवः कृष्युत्पादनानि च चरन्ति । शूकराणां यत्रतत्र चलनस्य कारणाद् नगरं प्रदूषितं दुर्गन्धितं च वर्तते । अनेन नगरस्य प्रतिष्ठायां च हानिः प्राप्ता अस्ति ।

नगरपालिकया नगरस्य सौन्दर्याभिवर्धनाय कार्यं करणीयं भवति । तत्र नगरवासिनां सहयोगश्च आवश्यकः । नगरस्य गरिमवर्धनं स्वच्छीकरणञ्च नगरपालिकाया एव दायित्वं भवति । नगरस्य पशूनां नियन्त्रणं, व्यवस्थापनं पशुधनिनां दण्डनञ्च नगरपालिकया विधातव्यम् । अत्र भवान् कार्याणि चालयतु इति निवेदयामि । भवतः कार्येण नगरस्य सौन्दर्यं वर्धिष्यते, दुर्घटनायाः सम्भावना समाप्स्यते, नगरवासिनः स्वच्छाः सुरक्षिताश्च भविष्यन्ति । दायित्वमेतत् पूरयितुं भवतः प्रयासो भविष्यत्येव इति विश्वसिमि ।

भवदीयः

रामनरेशयादवः

**शब्दार्थाः**

| | |
|---|---|
| क्षीयमाणम् | : क्षीण हुँदै गएको |
| अन्यतमम् | : कुनै एक |
| विचरन्ति | : डुल्छन् |
| कृष्युत्पादनानि | : बालीनाली |
| चरन्ति | : चर्छन् |
| अभिवर्धनाय | : बढाउनका लागि |
| समाप्स्यते | : समाप्त हुनेछ |
| विश्वसिमि | : विश्वास गर्छु |

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकात् पाठस्य वाचनं श्रृणुत, ततोऽनुच्छेदं विभज्य अनुवाचनं कुरुत ।**

२. **पाठस्य प्रथमानुच्छेदस्य नामपदानि अन्विष्य श्रावयत ।**

३. **एतेषां शब्दानां शुद्धोच्चारणं कुरुत**

विकृतयः, क्षीयमाणम्, वृषभाः, बन्धनात्, यातायातावरोधः, अनियन्त्रिताः, कृष्युत्पादनानि, शूकराणाम्, सौन्दर्याभिवर्धनाय, वर्धिष्यते ।

४. **पदानामर्थं वदत**

गौरवम्, पशुधनिनाम्, चरन्ति, क्षीयमाणा, नियन्त्रणम्, सुरक्षिताः, विश्वसिमि ।

५. **एकस्मिन् वाक्ये उत्तराणि वदत**

(क) नगरे का वर्धमानाः सन्ति ?

(ख) कुत्र के विचरन्ति ?

(ग) मार्गे पशूनां चलनात् किं भवति ?

(घ) कृष्युत्पादनानि के चरन्ति ?

(ङ) नगरे दुर्गन्धस्य कारणं किम् ?

(च) नगरपालिकाया दायित्वं किम् ?

(छ) पशूनां नियन्त्रणाय कोऽनुरुद्धोऽस्ति ?

(ज) केन कार्येण नगरस्य सौन्दर्यं वर्धते ?

६. **पाठस्य अन्तिमानुच्छेदस्य अव्ययपदानि कथयत ।**

## पठनम्

१. **सन्धियुतपदानि सन्धिविच्छेदपदानि च पठित्वा सखिभिस्सह विमृशत**

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| विषयोऽस्ति | विषयः + अस्ति | विसर्गसन्धिः |
| ताभिर्नगरस्य | ताभिः + नगरस्य | विसर्गसन्धिः |
| सञ्चलनम् | सम् + चलनम् | व्यञ्जनसन्धिः |
| कुक्कुराश्च | कुक्कुराः + च | हल्सन्धिः |
| कृष्युत्पादनानि | कृषि + उत्पादनानि | स्वरसन्धिः |
| सौन्दर्याभिवर्धनाय | सौन्दर्य + अभिवर्धनाय | स्वरसन्धिः |
| सहयोगश्च | सहयोगः + च | विसर्गसन्धिः |
| स्वच्छीकरणञ्च | स्वच्छीकरणम् + च | हल्सन्धिः |
| भविष्यत्येव | भविष्यति + एव | स्वरसन्धिः |

२. **अधोलिखितमनुच्छेदद्वयं मौनं पठित्वा कठिनतरानुच्छेदं पुनः सस्वरं पठत**

(क) दीपोत्सवो नेपालिनां प्रसिद्धं पर्व वर्तते । अस्मिन् पर्वणि जनैः स्वस्वगृहेषु मङ्गलसूचकाः दीपाः प्रज्ज्वाल्यन्ते । उत्सवेऽस्मिन् जना लक्ष्मीपूजनं कुर्वन्ति । भ्रातृद्वितीयायां भगिन्यो भ्रातॄन् रङ्गमिश्रितां टीकां परिधापयन्ति । पर्वेदं कार्त्तिकमासे समायोज्यते ।

(ख) रघुः कौत्सस्यागमनमाकर्ण्य स्वागतार्थं राजसिंहासनादुत्थाय विश्वजिन्नाम्नि यज्ञे सर्वस्वदक्षिणादानात् स्वर्णपात्राभावेनमृत्तिकानिर्मितपात्र एव पूजार्थमशेषद्रव्यं संस्थाप्यागन्तुकमभ्यर्थयितुं ययौ। सः अतिथिपूजनं सम्पाद्य आगमनप्रयोजनस्यात्यावश्यक-प्रष्टव्यविषयं विचार्य कौत्सं प्रत्यवोचत्।

## ३. अधोलिखितं गद्यांशं पठित्वा प्रश्नानुत्तरयत

वृक्षाणां रोपणमतीव लाभदायकमस्ति। तेन पुष्पाणि, फलानि औषधानि च लभ्यन्ते। पर्यावरणप्रदूषणम् अद्यतनी विश्वव्यापिनी समस्या अस्ति। वृक्षाणां रोपणादेषा समस्या समाहिता भवति। वृक्षैर्वातावरणं वायुमण्डलञ्च शुद्धं भवति। प्राकृतिकशोभां वर्धयितुमपि वृक्षाः सहयोगिनो भवन्ति। भवननिर्माणाय च वृक्षा एव काष्ठानि यच्छन्ति। वायुमण्डलस्य मलिनधूमं विषाक्तवायुमपि ते एव हरन्ति। वृक्षाः प्राणिनां कृते मित्राणि भवन्तीति वक्तुं शक्यते।

(क) वृक्षरोपणेन कानि वस्तूनि लभ्यन्ते ?

(ख) विश्वव्यापिनी समस्या का ?

(ग) के वायुमण्डलं शुद्धं कुर्वन्ति ?

(घ) प्राकृतिकशोभा कथं वर्धते ?

(ङ) वृक्षा भवननिर्माणाय किं यच्छन्ति ?

(च) वृक्षा मलिनधूमं किं कुर्वन्ति ?

(छ) वृक्षाणां विषये किं वक्तुं शक्यते ?

## ४. अधोलिखितं गद्यांशं पठित्वा नदीनां नामानि वदत

नेपालो जलस्रोतसा धनी देशोऽस्ति। अत्र कौशिकी–गण्डकी–कर्णालीनद्यः प्रवहन्ति। कौशिक्यां दुग्धकौशिकी–स्वर्णकौशिकी–ताम्रकौशिकीप्रभृतिका नद्यो मिश्रिताः सन्ति। गण्डक्यां त्रिशूली–कृष्णगण्डकी–वृद्धगण्डकीसदृश्यो नद्यो मिलिता वर्तन्ते। कर्णाल्याञ्च भेरी–मुगुकर्णाली– हुम्लाकर्णालीप्रभृतिका नद्योऽन्तर्भूताः सन्ति। वागमती–बाणगङ्गा–लालबकैयानाम्न्यो नद्यश्च अस्माकं देशं सिञ्चन्ति। मेची–महाकाल्यौ नेपालस्य पूर्व–पश्चिमसीमां निर्धारयतः।

## ५. अधस्तनलघुकथायाः शीर्षकं निर्धारयत

गोपाल आपणं गच्छति । स तत्र आलुकं क्रेतुमिच्छति । स कान्दविकस्य समीपं गच्छति । कान्दविको महावञ्चकोऽस्ति । स आलुकं मापनाद् न्यूनं तोलयति । गोपालोऽस्य कारणं पृच्छति । कान्दविको वदति – तव भारस्य सुवहनाय । गोपालः कान्दविकाय एकेन रूप्यकेण हीनं मूल्यं ददाति । कान्टविकः सरोषं कथयति – किमर्थं मेऽल्पमेव मूल्यं ददासि ? गोपालः प्रतिवदति – रूप्यकाणां गणनस्य सौकर्याय ।

## लेखनम्

### १. मञ्जूषायां प्रदत्तेषु शब्देषु नगर–शिखर–तीर्थस्थलानां नामानि पृथक् पृथक् लिखत

विराटनगरम्, गोसाइँकुण्डः, धवलागिरिः, नेपालगन्जः, सिद्धार्थनगरम्, बराहक्षेत्रम्, सगरमाथा, अन्नपूर्णः, कञ्चनजङ्घा, हलेसी, राजविराजः, महेन्द्रनगरम्, मुक्तिनाथः, त्रिभुवननगरम्, पाथिभरा, भरतपुरम्

| नगरम् | शिखरम् | तीर्थस्थलम् |
|---|---|---|
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |
| ............ | ............ | ............ |

### २. समुचितं पर्यायं लिखत

| | | | |
|---|---|---|---|
| (क) | मीनः | ............ | (मत्स्यः / कच्छपः) |
| (ख) | सिंहः | ............ | (मृगेन्द्रः / नगेन्द्रः) |
| (ग) | वनम् | ............ | (विपिनम् / काञ्चनम्) |
| (घ) | शिखरम् | ............ | (शृङ्गम् / अङ्गम्) |
| (ङ) | नदी | ............ | (योषित् / सरित्) |
| (च) | पुष्पम् | ............ | (प्रसूनम् / प्राशनम्) |
| (छ) | मित्रम् | ............ | (सखा / सोदरः) |

## ३. शब्दं प्रयुज्य वाक्यं रचयत

प्रमुखः, नगरम्, गोः, निवेदनम्, पशुः, नगरवासी, प्रदूषणम्, सौन्दर्यम्, स्वच्छाः, प्रयासः ।

## ४. परस्परं मेलयत

| 'क' खण्डः | 'ख' खण्डः |
|---|---|
| नगरप्रमुखः | दिवा |
| ग्रामप्रमुखः | वने |
| विद्यार्थी | रात्रौ |
| व्याघ्रः | नगरे |
| चन्द्रमा | जले |
| कमलम् | विद्यालये |
| हिमम् | ग्रामे |
| सूर्यः | हिमालये |

## ५. वाक्यं पूरयत

(क) नगरं ............ विधातव्यम् । (प्रदूषितं/सुन्दरम्)

(ख) नगरवासिनः ............ भवेयुः । (सभ्याः/स्वच्छन्दाः)

(ग) नगरस्य व्यवस्थापनं ............ करोति । (ग्रामविकाससमितिः/नगरपालिका)

(घ) मार्गे पशुभिः ............ सम्भवति । (दुर्घटना/परिघटना)

(ङ) नगरप्रमुखः ............ भवेत् । (क्रियाशीलः/क्रियाहीनः)

(च) नगरवासिभिः सहयोगः ............ । (श्रोतव्यः/कर्तव्यः)

## ६. अधोलिखितायाः समस्यायाः समाधानाय ग्रामप्रमुखम् अनुरुध्य निवेदनं लिखत

इमालियाग्रामे बहवो जना रुग्णाः सन्ति । तत्र गतवर्षे महामारी व्यापृता आसीत् । चिकित्सका ग्रामीणानां परीक्षणमकुर्वन् । परीक्षणात् प्रदूषितं जलं रोगस्य कारणं सिद्धम् । ग्रामीणास्तडागस्य जलमपिबन् । ग्रामस्य नातिदूरे हरितः सुन्दरः पर्वतो वर्तते । तत्र

स्वच्छजलस्य मूलमस्ति । ग्रामीणास्तद् ग्रामपर्यन्तमानेतुमिच्छन्ति । ते स्वेषामेव व्यये नलिकाः क्रेतुमपि उत्सुकाः सन्ति । तत्र संयोजकस्य आवश्यकता वर्तते । ग्रामीणा ग्रामप्रमुखं संयोजकं नियोज्य पेयजलायोजनां पूरयितुमभिलषन्ति ।

## व्याकरणबोधः

### भविष्यत्कालज्ञानम्

श्वः शनिश्चरवासरो भविष्यति ।

अहं क्रीडनाय गमिष्यामि ।

रविवासरे विद्यालयः सञ्चलिष्यति ।

विद्यालये सखाय आगमिष्यन्ति ।

(क) उपरितनवाक्येषु प्रयुक्तानि भविष्यति, गमिष्यामि, सञ्चलिष्यति, आगमिष्यन्ति चेति क्रियापदानि लृट्लकारे सन्ति ।

(ख) या क्रिया आगामिनि काले सम्भाविता तत्र लृट्लकारः प्रयुज्यते । अतो लृट्लकारो भविष्यत्कालं बोधयति ।

(ग) लृट्लकारस्य प्रत्यया वर्तमानकालवत् भवन्ति । लृट्लकारस्य धातुप्रत्यययोर्मध्ये 'स्य' विकरणं योज्यते । यथा, भविष्यति, गमिष्यति .......... ।

### १. अधोलिखितवाक्यानां क्रियापदानि लृट्लकारे परिवर्तयत

(क) अनुज अग्रजाय पत्रं लिखति ।

(ख) विद्यालयश्चलति ।

(ग) छात्राः पुस्तकानि पठन्ति ।

(घ) पूजको देवम् अर्चयति ।

(ङ) योगिनः सत्यं वदन्ति ।

(च) स कार्यालयं गच्छति ।

२. **अधोलिखितां रूपावलिं पठत लिखत च**

**वद्धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः | वदिष्यामि | वदिष्यावः | वदिष्यामः |

**अस्धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

**वद्धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

३. **वृध्-धातोर्लङ्लकारस्य रूपाणि पठत**

**वृध्धातुः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अवर्धत | अवर्धेताम् | अवर्धन्त |
| मध्यमपुरुषः | अवर्धथाः | अवर्धेताम् | अवर्धध्वम् |
| उत्तमपुरुषः | अवर्धे | अवर्धावहि | अवर्धामहि |

४. **वद्धातोः रूपावल्या आधारे भू-हस्-पठ्धातूनां रूपावलिं लिखत ।**

५. **अधस्तनानि वाक्यानि पठत, स्थूलपदानि प्रयुज्य पुनर्वाक्यरचनां च कुरुत**

(क) **अद्य** विद्यालये अवकाशो वर्तते ।

(ख) **श्वः** सांस्कृतिककार्यक्रमो वर्तते ।

(ग) अद्य रविवासरोऽस्ति, **परश्वो** मङ्गलवासर आयास्यति ।

(घ) अद्य वैशाखमासस्य प्रथमदिवसो वर्तते, **प्रपरश्वः** चतुर्थदिवसो भविता ।

(ङ) सुजाता **ह्यो** मातृगृहमगच्छत् ।

(च) अद्य शुक्रवासरो वर्तते, **परह्यो** बुधवासर आसीत् ।

(छ) अद्य बुधवासरो वर्तते, **प्रपरह्यो** रविवासर आसीत् ।

(ज) प्रशिक्षणं सप्तदिनानि अचलत्, **अन्येद्युः** समापनमभवत् ।

६. **अद्य, श्वः, परश्वः, प्रपरश्वः, ह्यः, परह्यः, प्रपरह्यः, अन्येद्युः, इति पदानि प्रयुज्य स्वदैनिकीं वर्णयत ।**

## अनुप्रयोग

१. **मञ्जुषाधारेण रिक्तस्थानं पूरयत**

वयम्, शिशुनिकेतनविद्यालयः, आगामी, सप्तम, भवदीयः शिष्याः, भविष्यामः, अवकाशः, सधन्यवादम्, पठितुम्, अस्माकम् ।

श्रीमन्तः प्राचार्याः,

........................

बुटवलनगरपालिका ।

**विषय : अवकाशार्थम् ।**

महोदयाः,

वयं भवतां विद्यालयस्य .......... कक्षायाः छात्राः स्म । .......... वार्षिकी परीक्षा .......... मासे भविष्यति । अतः .......... गृहे एव स्थिता .......... इच्छामः । कृपया अस्मभ्यम् एत्त् कृते ..........दीयताम् । वयम् अतीव अनुगृहीता .......... ।

.......... ।

...........................

सप्तमकक्षायाः छात्राः

२. **मञ्जूषायां प्रदत्तपदानां सहायतया शुल्कक्षमार्थं प्रधानाचार्याय निवेदनपत्रं लिखत**

शुल्कम्, कठिनतया, महोदयः, निवेदनम्, आज्ञाकारी शिष्यः, व्यवधानम्, धनाभावः, शुल्कप्रदानम्, वेतने, परिवारस्य निर्वाहः, क्षमां कृत्वा, अनुग्रहं कुर्वन्तु ।

३. **ज्वरेण पीडितो भूत्वा विद्यालयम् आगन्तुम् न शक्नोमीति विषयमवलम्ब्य कक्षाशिक्षकाय निवेदनपत्रं लिखत ।**

## कोषानुशीलनम्

### शब्दादिवर्गः

अनुलापो मुहुर्भाषा विलापः परिदेवनम् ।
विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ॥
सुप्रलापः सुवचनमपलापस्तु निह्नवः ।
चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा ॥
अस्त्री चाटु-चटु-श्लाघा प्रेम्णा मिथ्या विकत्थनम् ।
सन्देशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ॥
रुशती वागकल्याणी स्यात्कल्या तु शुभात्मिका ।
अत्यर्थमधुरं सान्त्वं सङ्गतं हृदयङ्गमम् ॥
निष्ठुरं परुषं ग्राम्यमश्लीलं सूनृतं प्रिये ।
सत्येऽथ सङ्कुलक्लिष्टे परस्परपराहतम् ॥
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ।
अम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम् ॥
अनक्षरमवाच्यं स्यादाहतं तु मृषार्थकम् ।
सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ॥
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ।
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ॥
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ॥

स्वाननिर्घोषनिर्ह्रादनादनिःस्वाननिःस्वनाः ।

आरवारावसंरावविरावा अथ मर्मरः ॥

स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ।

निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥

वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ।

कोलाहलः कलकलस्तिरश्चां वाशितं रुतम् ॥

स्त्री प्रतिश्रुत्प्रतिध्वाने गीतं गानमिमे समे । ॥

॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे शब्दादिवर्गः॥

**पदानुशीलनी**

**निरन्तरकथनम्** - अनुलापः १, मुहुर्भाषा २

**परिदेवनम्** - विलापः १, परिदेवनम् ३.

**असम्यग् वार्ता** - विप्रलापः १ . विरोधोक्तिः २

**परस्परकथनम्** - संलापः १

**सुवचनम्** - सुप्रलापः १ सुवचनम् ३ .

**असद्वदनम्** - अपलापः १

**आक्षेपस्य नामानि** - चोद्यम् ३, आक्षेपः १. अभियोगः १,

**शापोक्तिः** - शापः १, आकाशः ५. दुरेषणा २,

**असद् आह्लादकथनम्** - चाटुः १, चटुः १, श्लाघा २ .

**पत्रम्/ समाचारः** - सन्देशवाक् २. वाचिकम् ३ .

**(अत्र विशेषणवाचकाः शब्दाः सन्ति ।)**

**अशुभं वचः** - रुशत्,

**शुभम्** - कल्य

**अतिमधुरम्** - सान्त्व,

**आनन्ददायकम्** - सङ्गत्, हृदयङ्गम,

**पारूष्यम्** - निष्ठुर, परुष,

**ग्राम्यशब्दः** - ग्राम्य, अश्लील

**सत्यम्** - सुनृत,

**परस्परं विरोधाभाषः** - सङ्कुल, क्लिष्ट,

**अपूर्णमक्षरम्** - ग्रस्त,

**शीघ्रमेवोच्चारणम्** - निरस्त,

**अम्बुक्तम्** - अम्बूक्त,

**शैलीराहित्यम्** - अबद्ध

**अनुचितम्** - अनक्षर, अवाच्य,

**परस्पराश्रयत्वम्** - आहत,

**लुण्ठनम्** - सोल्लुण्ठन, सोत्प्रास

**रतिकालिक** - मणित,

**श्रोतुं योग्यं** - श्राव्य, हृद्य, मनोहारिन्

**स्पष्टम्** - विस्पष्ट, प्रकटोदित,

**अस्पष्टम्** - म्लिष्ट, अविस्पष्ट

**असत्यम्** - वितथ, अनृत,

**सत्यस्य नामानि** - सत्य, तथ्य, ऋत, सम्यञ्च

**शब्दानां नामानि**

शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्ह्लादः, नादः, निःस्वानः, निःस्वनः आरवः, आरावः, संरावः, विरावः

**शुष्कपत्रस्य शब्दः** - मर्मरः १ .

**आभूषणस्य ध्वनिः** - शिञ्जितम् ३.

**वीणायाः ध्वनिः** - निक्वाणः १, निक्वणः १, क्वाणः १, क्वणः १, क्वणनम् ३, प्रक्वाणः १, प्रक्वण-१,

**कोलाहलस्य नाम्नी** - कोलाहलम् १, कलकलः १

**खगानां ध्वनिः** - वाशितम्

**प्रतिध्वनिः** - प्रतिश्रुत् २ प्रतिध्वानः

**गीतस्य गायनम्** - गीतम् ३, गानम् ।

॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे शब्दादिवर्गः ॥

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ।

२. **शब्दस्य सप्त नामानि पृथक् पृथग् लिखत ।**

३. **उदाहरणानुसारेण भाषाशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भाषा | .............. | .............. |
| द्वितीया | .............. | भाषे | .............. |
| तृतीया | भाषया | .............. | .............. |
| चतुर्थी | .............. | भाषाभ्याम् | .............. |
| पञ्चमी | .............. | .............. | भाषाभ्यः |
| षष्ठी | .............. | .............. | .............. |
| सप्तमी | .............. | .............. | भाषासु |
| सम्बोधनम् हे भाषे ! | .............. | .............. | |

४. **"रवः" इति कस्य नाम ?**

५. **प्रतिश्रुत् शब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

.............. रवस्वनाः ।

.............. निःस्वाननिःस्वनाः ॥

७. **ध्वनिशब्दस्यस्य रूपावलिं लिखत ।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

कोलाहलम्, आलापः, शापः, सत्यम्, निनादः

९. **पर्यायान् परस्परं मेलयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| आक्षेपः | नादः |
| सुप्रलापः | क्वाणः |
| ध्वनिः | गानम् |
| क्वणः | अभियोगः |
| गीतम् | सुवचनम् |

पञ्चमः पाठः

# समाजसेविका अङ्गूरबाबा



सत्कर्मणां परिणामः सुखदायको भवति, दुष्कर्मणाञ्च दुःखदायक इति लोकमान्यता वर्तते । सर्वेषामपि कर्मणां फलम् इह लोके, परत्र च अवश्यं भोक्तव्यमिति शास्त्राणि उद्घोषयन्ति । लोकोऽयं कर्मभूमिः, परलोकश्च भोगभूमिरित्यपि शास्त्रेषु प्रतिपादितमस्ति । येषां जनानां शास्त्रेषु विश्वासोऽस्ति, ते सदा हि सत्कार्येषु प्रवर्तन्ते । सत्कार्याणां फलञ्च ते प्राप्नुवन्ति । त्याग-सेवा-समर्पणादयो गुणा जनान् सत्कार्यं कर्तुं प्रेरयन्ति । इत्थं सत्कार्यरतानां जनानां पङ्क्तौ समाविष्टासु महिलासु अङ्गुरबाबाजोशी अपि एका वर्तते ।

अङ्गुरबाबा दीपकुमार्याः पीताम्बरप्रसादपन्तस्य च पुत्रीरत्नरूपेण १९८९ वैक्रमाब्दस्य श्रावणमासस्य द्वात्रिंशे दिनाङ्के काष्ठमण्डपे जाता । एतस्याः पितृपरिवारोऽत्यन्तम् आध्यात्मिको, निष्ठावान् च आसीत् । इयं गृहे एव स्वाध्ययनं कृत्वा प्रवेशिकापरीक्षां समुत्तीर्णवती । तदनु एषा भारतस्य काशीहिन्दुविश्वविद्यालयात्, पटनाविश्वविद्यालयाच्च राजनीतिशास्त्र-विधिविषययोः स्नातकोत्तरस्नातकपरीक्षे उदतरत् । विद्यार्थिजीवनं व्यतीत्य इयं २०११ वैक्रमाब्दे काष्ठमण्डपवर्तिनि पद्मकन्यामहाविद्यालये उपप्राध्यापिका अभवत् । अस्या विवाह एकादशवर्षीयावस्थायां बाल्यवयसि एव बलरामजोशीमहोदयेन सह अभवत् । २०१४ तमे विक्रमवर्षे पतिना बलरामेण सह एषा उच्चशिक्षायै 'बेलायत' इत्याख्यं देशम् अगच्छत् । एषा तत्र वर्षचतुष्टयं यावद् अध्ययनम् अकरोत् । एषा तत्रत्याद् 'अक्सफोर्डनामकाद् विश्वविद्यालयात् साहित्ये स्नातकोपाधिं, लन्डनवर्तिनो 'मिडिलटेम्पल' इति स्थानाद् अधिवक्तृसम्बद्धे विधिविषये च उच्चशैक्षिकयोग्यतां प्राप्नोत् ।

नेपालस्य शैक्षिकजगति समाजसेवायाः क्षेत्रे च अङ्गुरबाबाजोशी सुपरिचितं नाम वर्तते । एषा विभिन्नासु शैक्षिक-धार्मिक-सामाजिक-संस्थासु कार्यं कृतवती । उच्चशिक्षां समाप्य 'बेलायत'

इत्याख्याद् देशाद् नेपालमागत्य इयं पद्मकन्यामहाविद्यालये प्राचार्या अभवत् । अस्या एव प्राचार्यत्वे तत्र महाविद्यालयस्य भवननिर्माणमपि सम्पन्नम् अभवत् । सनातनधर्मसेवासमितौ, विश्वहिन्दुमहासङ्घे च स्वकार्यकाले इयं धार्मिकं सांस्कृतिकं जागरणं विस्तारितवती । इयं त्रिभुवनविश्वविद्यालयसभायाः, समाजकल्याणपरिषदः, नेपालस्काउटसंस्थायाः परामर्शपरिषदः, नेपालबालसङ्गठनस्य, युनेस्कोसङ्घस्य कृते नेपालराष्ट्रियसमितेः, गुठीसंस्थानस्य विद्वत्समितेश्च सदस्या भूत्वा बहूनि शैक्षिकाणि सामाजिकानि सांस्कृतिकानि च कार्याणि सम्पादितवती । तारागाउँविकाससमितेरध्यक्षपदे स्थित्वा अनया पर्यटनक्षेत्रस्य विकासेऽपि महद् योगदानं कृतम् ।

विदुषी अङ्गुरबाबा गार्गीकन्यागुरुकुलस्य संस्थापिका संरक्षिका च वर्तते । काष्ठमण्डपस्य गुरुकुलेऽस्मिन् चतुर्णाम् एव वर्णानां बालिका वैदिकशिक्षया सहैव सुसाङ्ख्य-नृत्य-वादन-चित्रकलादीनां शिक्षां च गृह्णन्ति । अनया पत्युर्नाम्नि बलरामजोशी ज्ञानविज्ञानपुरस्कारः स्थापितः । पुरस्कारोऽसौ प्रतिवर्षं ज्ञानविज्ञानयोरनुसन्धाने संलग्नाय विशिष्टजनाय प्रदीयते । इयं कथानां लेखानाञ्च सर्जने सिद्धहस्ता वर्तते । अस्याः 'कल्पना' इति शीर्षकस्य कथासङ्ग्रहः, 'मुक्तिमुक्तकमाला' इति विचारसङ्ग्रहः, खप्तडस्वामिनो धर्मविज्ञानसारसङ्क्षेपस्य आङ्गलानुवादः, नेपालीभाषाया लेखानां सङ्ग्रहः 'चिन्तन' च पुस्तकानि प्रकाशितानि सन्ति । आङ्गलभाषया नेपालीभाषया च लिखिता अस्या अनेके लेखा नैकविधपत्रिकासु प्रकाशिताः सन्ति । अङ्गुरबाबा महेन्द्रविद्याभूषणप्रथमेन, गोरखादक्षिणबाहुद्वितीयेन, त्रिशक्तिपट्टतृतीयेन, शुभराज्याभिषेकपदकद्वितीयेन, रत्नश्रीस्वर्णपदकेन, दीर्घसेवापदकेन, राष्ट्रियप्रतिभापुरस्कारेण, श्रीभानुभक्तपुरस्कारेण, श्रीवेदनिधिपुरस्कारेण, श्रीरुद्रराजस्मृतिपुरस्कारेण, विविधैः शिक्षासम्मानैश्च सम्मानिता वर्तते । एषा दशाधिकानां देशानां भ्रमणञ्च कृत्वा स्वानुभवं वर्धितवती अस्ति ।

अङ्गुरबाबा निश्छलं निःस्वार्थं निष्ठावन्तं च जनं सदैव प्रेरयति । इयं भावचरित्रयोः स्वच्छतायुक्ते शैक्षिकविकासे, आध्यात्मिकचेतसि च विश्वसिति । शारीरिकम्, मानसिकम्, बौद्धिकम्, आध्यात्मिकञ्च चतुर्णामेव पक्षाणां समुन्नतेरनन्तरं हि पूर्णसुखस्य अनुभूतिः प्राप्यते इति एतस्या जीवनस्य आदर्शः । अस्या वैयक्तिके सामाजिके च जीवनेऽयमेव आदर्शः प्रतिविम्बितो दृश्यते । चारित्रिकीं शुद्धताम्, आध्यात्मिकीं चेतनाम्, नैतिकीं शक्तिं च विना सुखमयं जीवनं न सम्भवतीति इयं विचारयति । एतस्या विचारे सुखं दुःखञ्च मानवस्य स्वस्यैव नियन्त्रणेऽस्ति, एत्त् सर्वथा सकारात्मके नकारात्मके वा चिन्तने समाश्रितं दृश्यते ।

एषा शैक्षिके सामाजिके आध्यात्मिके च क्षेत्रे सेवामेव धर्मं मनुते । सञ्चारमाध्यमेन धूमपान-मद्यपानयोर्विज्ञापनम् उचितं कार्यं नेति च इयं चिन्तयति । मानवीयं नैतिकमूल्यम् अस्या विचारे जीवनस्य सञ्जीवनी एव अस्ति । अस्यै नास्तिकप्रवृत्तिर्न रोचते । एषा नारीणां कृते आध्यात्मिकशिक्षाया अनिवार्यतां दर्शयति । अस्याः प्रयत्नेन एव नेपाले नारीशिक्षाया जागरणं प्रवर्धितमिति शिक्षाविद आमनन्ति । एतादृशी विपुलयशस्विनी नारी २०७७ तमस्य वैक्रमाब्दस्य आषाढमासस्य षष्ठे दिनाङ्के पञ्चत्वं गता । शिक्षा-सेवा-धर्म-संस्कृति-नैतिकमूल्यमान्यतानां विस्ताराय परिपालनाय च अङ्गुरबाबा प्रेरणायाः स्रोतस्विनी खलु वर्तते ।

**शब्दार्थाः**

| | | |
|---|---|---|
| परत्र | : | परलोके, अर्को लोकमा |
| उद्घोषयन्ति | : | कथयन्ति, बताउँदछन् |
| समाविष्टासु | : | अन्तर्भूतासु, समावेश गरिएकाहरूमा |
| निष्ठावान् | : | आस्थावान्, आस्था भएको |
| जागरणम् | : | उद्बोधनम्, जगाउने काम |
| सुसाङ्ख्यम् | : | कम्प्युटरयन्त्रम्, कम्प्युटर |
| सर्जने | : | रचनायाम्, सृजनामा |
| नियन्त्रणे | : | वशे, नियन्त्रणमा |
| स्रोतस्विनी | : | नदी, नदी |

## श्रवणं भाषणं च

१. **अधो लिखितानि पदानि उच्चारयत**

शास्त्राणाम्, पङ्क्तौ, पत्युः, वैयक्तिके, विभिन्नासु, सांस्कृतिकम्, निष्ठावन्तम्, अस्याः, प्रयतन्ते, प्रेरयन्ति, विश्वसिति, उदतरत्, आमनन्ति, शैक्षिकजगति, त्यागसेवासमर्पणादयः, विद्वत्समितेः, वर्षचतुष्टयम्, सिद्धहस्ता, इत्थम्, प्रतिवर्षम् ।

२. **शिक्षकाद् अधो लिखितानां पदानां विग्रहं श्रुत्वा वदत**

कर्मभूमिः, परलोकः, सुखभूमिः, शैक्षिकजगति, सत्कार्यरतानाम्, नैतिकमूल्यम्, कार्यकाले, विद्वत्समितेः, प्रवेशिकापरीक्षाम्, श्रावणमासे, उच्चशिक्षाम्, वर्षचतुष्टयम्, कथासङ्ग्रहः, सिद्धहस्ता, विद्यार्थिजीवनम् ।

**३. मित्रात् पाठस्य प्रथमानुच्छेदं श्रुत्वा तत्र प्रयुक्तानि विशेषणपदानि श्रावयत ।**

**४. शिक्षकात् पाठं श्रुत्वा सङ्क्षिप्तमुत्तरं वदत**

(क) सत्कार्याणां परिणामः कीदृशो भवति ?

(ख) पाठस्य समाजसेविकायाः पितुर्नाम किं वर्तते ?

(ग) शैक्षिकजगति किं नाम सुपरिचितं वर्तते ?

(घ) अङ्गुरबाबा कस्य संस्थापिका वर्तते ?

(ङ) एतस्या आङ्गलभाषाया लेखानां सङ्ग्रहस्य नाम किम् ?

(च) एषा कस्मिन् महाविद्यालये प्राचार्या अभवत् ?

**५. अधोलिखितमनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

समाजस्य सेवा एव समाजसेवा कथ्यते । समाजे विविधानां मानवानां वासो भवति । ते सर्वे परस्परं सहयोगं कृत्वा जीवनं यापयन्ति । यः समाजे स्थितानां जनानां सहयोगं करोति, आर्तदुःखिनां सेवां करोति स एव समाजसेवी कथ्यते । मार्गनिर्माणम्, कुल्यानिर्माणम्, धर्मशालादीनां निर्माणं च समाजसेविनः कुर्वन्ति । मनुष्यः सर्वं कार्यमेकाकी एव कर्तुं न शक्नोति । तेन कारणेन मानवः समाजे निवसति । ये विपन्नाः सन्ति, ये च रोगिणः सन्ति तेषां साहाय्यार्थं कमपि प्रयत्नं कर्तुं शक्यते । तेन प्रयत्नेन कश्चिद् जनः प्रसन्नो भवति चेत् तादृशः प्रयत्नो विधातव्यः । स्वल्पोऽपि प्रयत्नो दीनान् सन्तोषयति । सेवायै धनस्य आवश्यकता भवतीति न चिन्तनीयम् । वस्तूनि क्रीत्वा दानमेव समाजसेवा न भवति, श्रमदानमपि समाजसेवायाः कार्यमस्ति । अतः स्वसमाजे सेवायाः कार्याणि कर्तव्यानि ।

(क) समाजे मानवाः कथं जीवनं यापयन्ति ?

(ख) कः समाजसेवी कथ्यते ?

(ग) समाजसेविनः केषां निर्माणं कुर्वन्ति ?

(घ) कीदृशः प्रयत्नो विधातव्यः ?

(ङ) श्रमदानं कस्य कार्यमस्ति ?

## पठनम्

### १. अधोलिखितम् अनुच्छेदं पठित्वा शीर्षकं दत्त

पौरस्त्यवाङ्मयं ज्ञानविज्ञानयोर्विशालं भाण्डागारं वर्तते । तत्रापि अध्यात्मविज्ञानस्य सम्यग् अध्ययनाय पौरस्त्यवाङ्मयेन निर्दिष्टा सरणिरतीव सरला, सरसा, लोकविश्रुता च वर्तते । एकस्यैव गीताशास्त्रस्यापि अत्र एक एव ग्रन्थो नास्ति । श्रीमद्भगवद्गीता, देवीगीता, अष्टावक्रगीता, शिवगीता, हंसगीता, अवधूतगीता इत्यादयोऽनेके गीताग्रन्थाः सन्ति, येषु अध्यात्मविज्ञानस्य तत्त्वज्ञानस्य वा विषयाः शोभनतया उपस्थापिताः सन्ति । वाङ्मयमेतद् बहूनां ग्रन्थानाम् अध्ययनस्य सरणिर्न, अपि तु बहुषु ग्रन्थेषु मध्ये एकस्यैव अध्ययनेन साफल्यप्राप्तिं निर्दिशति । मानवजीवनस्य सफलतायै कस्याश्चन एकस्या अपि गीताया अध्ययनं तदनुशीलनं च पर्याप्तं भवति ।

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥**

(अ) एकपदेन उत्तरयत

(क) कस्य केवलम् एक एव ग्रन्थो नास्ति ?

(ख) किं ज्ञानविज्ञानयोर्विशालं भाण्डागारं वर्तते ?

(आ) एकवाक्येन उत्तरयत

(क) पौरस्त्यवाङ्मयेन निर्दिष्टा सरणिः कीदृशी अस्ति ?

(ख) गीताग्रन्थेषु के विषया उपस्थापिताः सन्ति ?

(ग) अनुच्छेदे गीतायाः कति नामानि निर्दिष्टानि वर्तन्ते ?

(घ) जीवनस्य सफलतायै किं पर्याप्तं भवति ?

(इ) निर्देशानुसारेण उत्तरयत

(क) 'अध्ययनाय' अत्र का विभक्तिः प्रयुक्ता ?

(ख) 'सरणिरतीव' अस्य सन्धिच्छेदं कुरुत ?

(ग) अनुच्छेदे 'गीताग्रन्थाः' अस्य विशेषणं किम् ?

(घ) भाण्डागार-शब्दः कस्मिन् लिङ्गे वर्तते ?

(ई) अनुच्छेदस्य उचितं शीर्षकं किं भवितुं शक्नोति ?

(क) गीताशास्त्रम्  (ख) पौरस्त्यवाङ्मयम्

(ग) ज्ञानविज्ञानयोर्भाण्डागारम्  (घ) जीवनसाफल्याय शोभना सरणिः

**२. अधो लिखितं श्लोकं पठित्वा परोपकारस्य महत्त्वं वर्णयत**

आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ॥

**३. अधो लिखितां सूक्तिं पठित्वा आशयं स्फुटीकुरुत**

मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ।

**४. उचितम् ☑ अनुचितं ☒ वा पाठाधारेण चिनुत**

(क) सर्वे प्राणिनः सुखाय दुःखाय च प्रयतन्ते । ( )

(ख) अङ्गुरबाबा नेपालस्य पर्यटनक्षेत्रस्य विकासेऽपि योगदानं कृतवती । ( )

(ग) अस्यै आस्तिकप्रवृत्तिरतीव रोचते । ( )

(घ) अङ्गुरबाबा मैत्रेयीकन्यागुरुकुलस्य संस्थापिका अस्ति । ( )

(ङ) एतस्या जन्मस्थलं ललितपुरं वर्तते । ( )

(च) एतस्याः प्रारम्भिकी शिक्षा गृहे एव अभवत् । ( )

(छ) अस्या विवाहो द्वाविंशतिवर्षीयावस्थायाम् अभवत् । ( )

(ज) एषा पद्मकन्यामहाविद्यालयस्य प्राचार्या अभवत् । ( )

(झ) अस्या माता देवकुमारी पन्त आसीत् । ( )

(ञ) एतस्याः कथासङ्ग्रहस्य नाम 'कल्पना' वर्तते । ( )

## लेखनम्

**१. पदानि प्रयुज्य एकैकं वाक्यं रचयत**

कर्मभूमिः, सत्कार्याणाम्, अत्यन्तम्, समुत्तीर्णवती, बाल्यवयसि, सुपरिचितम्, उच्चशिक्षाम्, विदुषी, गृह्णन्ति, वर्धितवती, सदैव, आदर्शः, प्रेरणायाः ।

## २. सन्धिच्छेदं कृत्वा लिखत

१. विश्वासोऽस्ति
२. भवतीति
३. विकासेऽपि
४. स्वाध्ययनम्
५. नामन्यपि
६. पत्युर्नाम्नि
७. पुरस्कारोऽसौ
८. लेखानाञ्च
९. परलोकश्च
१०. प्राप्नुवन्ति

## ३. अनुच्छेदं पठित्वा उत्तरं लिखत

अनुराधा कोइराला सुप्रसिद्धा समाजसेविका वर्तते । तस्या जन्म २००९ वैक्रमाब्दस्य वैशाखमासस्य प्रथमे दिवसे अभवत् । सा माइतीनेपालनामिकायाः संस्थायाः स्थापनाम् अकरोत् । महिलाहिंसाया विरोधं कृत्वा चेतनाया विस्तारे सा संलग्ना अभवत् । नेपालमातुः सहस्रशः पुत्रीणां सा उद्धारम् अकरोत् । सा नेपालदेशाद् नीत्वा भारतादिदेशेषु विक्रीताः महिलाः देशे एव प्रत्यावर्त्य शिल्पादिकं शिक्षयति । तेषां पुनःस्थापनायां सा दत्तचित्ता अस्ति । तस्या एतादृशेन कार्येण २०१० ईशवीयाब्दे सा 'सीएनएन हिरो' इत्युपाधिना सम्मानिता । २०१४ ईशवीयाब्दे सा मदरटेरेसासम्मानेन च समलङ्कृता । तस्याः कार्यस्य प्रसारः सर्वत्र अभूत् । हिंसापीडिता नार्यः सहयोगं कामयन्त्यः माइतीनेपालसंस्थायां दूरभाषमाध्यमेन अनुरुन्धन्ति । संस्था च तादृशीनां नारीणां सहयोगार्थं सदैव सन्नद्धा एव भवति । नेपालस्य समाजो महिलाहिंसामुक्तो भवेदिति तस्याः कामना वर्तते । सा अद्यापि मनसा, वचसा, कर्मणा च स्वकामनां पूरयितुं तत्परा अस्ति ।

(क) अनुराधायाः जन्म कदा अभूत् ?

(ख) सा किमर्थं 'सीएनएन हिरो' इत्युपाधिना सम्मानिता ?

(ग) सा किं शिक्षयति ?

(घ) अनुराधायाः कीदृशी कामना वर्तते ?

(ङ) सा कथं स्वकामनां पूरयितुं तत्परा अस्ति ?

## ४. विशेषणविशेष्यपदानि परस्परं मेलयत

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| धार्मिकम् | लेखाः |
| महत् | नाम |
| निःस्वार्थम् | यत्नः |
| दुःखदायकः | प्राणिनः |
| सुपरिचितम् | जागरणम् |
| महान् | क्षेत्रे |
| सर्वे | योगदानम् |
| सामाजिके | जनम् |
| अनेके | परिणामः |

## ५. पाठाधारेण प्रश्नान् उत्तरयत

(क) अङ्गुरबाबा कदा कुत्र च जाता ?

(ख) अस्याः प्रयत्नेन नेपाले किं प्रवर्धितम् ?

(ग) अङ्गुरबाबा कस्य ग्रन्थस्य आङ्गलभाषया अनुवादं कृतवती ?

(घ) अङ्गुरबाबा कीदृशं जनं प्रेरयति ?

(ङ) अङ्गुरबाबा कुत्र सांस्कृतिकं जागरणं विस्तारितवती ?

(च) अस्या विचारे सुखं दुःखं च कुत्र समाश्रितं दृश्यते ?

(छ) शिक्षाविदः किम् आमनन्ति ?

## ६. अधस्तनं श्लोकं पठित्वा प्रश्नान् उत्तरयत

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः ।

(क) नद्यः स्वयमेव किं न पिबन्ति ?

(ख) के स्वयं फलानि न खादन्ति ?

(ग) मेघाः किं स्वयं न खादन्ति ?

(घ) परोपकाराय के सन्ति ?

(ङ) 'स्वयम्' इति शब्दं प्रयुज्य वाक्यमेकं रचयत ।

**७. 'स्वलक्ष्यम्' इति विषये निबन्धं लिखित्वा कक्षायां श्रावयत ।**

## व्याकरणानुशीलनम्

**१. विशेषणविशेष्यविषये अधस्तनं नियमं पठित्वा निर्दिष्टं कार्यं कुरुत**

नामपदानि सर्वनामपदानि च विशेष्यपदानि भवन्ति । विशेष्यपदानां गुणधर्मादिविषये यानि पदानि प्रयुज्यन्ते तानि विशेषणपदानि भवन्ति । यथा -

(अ) सुशीलः छात्रः

(आ) रक्तेन पुष्पेण

(इ) अध्ययनशीलानां तेषाम्

उदाहरणेषु 'छात्रः' नामपदम् अस्ति, 'पुष्पेण' अपि नामपदम् अस्ति चेत् 'तेषाम्' इति सर्वनामपदम् अस्ति । तत्रैव 'सुशीलः', 'रक्तेन', 'अध्ययनशीलानाम्' पदानि विशेषणपदानि सन्ति । विशेष्यपदानां यद् लिङ्गं भवति विशेषणपदानां प्रयोगः तस्मिन् एव लिङ्गे कर्तव्यम्, विशेष्यपदानां यद् वचनं भवति तस्मिन् एव वचने विशेषणपदानां प्रयोगः कर्तव्यः, तथैव विशेष्यपदानां या विभक्तिः भवति विशेषणपदानां प्रयोगः अपि तस्यामेव विभक्तौ विधातव्यः । उदाहरणेषु 'छात्रः' इति पुँल्लिङ्गस्य प्रथमायाः विभक्तेः एकवचनस्य रूपं वर्तते । अतः तस्य विशेषणपदम् 'सुशीलः' अपि पुँल्लिङ्गे, प्रथमायां विभक्तौ, एकवचने अस्ति । तथैव 'पुष्पेण' इव 'रक्तेन' शब्दस्य अनन्तरं 'तेषाम्' इव 'अध्ययनशीलानाम्' शब्दस्य अपि प्रयोगः विहितः अस्ति । अतः कथ्यते -

यल्लिङ्गम्, यद्वचनम्, या च विभक्तिर्विशेष्यस्य, तल्लिङ्गम्, तद्वचनम्, सैव विभक्तिर्विशेषणस्यापि, इति ।

**सारिणीं पूरयत**

सुपरिचितं नाम, सर्वे लेखाः, दुःखदायकः परिणामः, वैयक्तिके कार्ये, सामाजिके क्षेत्रे, विभिन्नासु सभासु, धार्मिकं कृत्यम्, सांस्कृतिकं नृत्यम्, महान् असौ, लिखिता कविता, अनेके कार्यक्रमाः, निश्छलं मनः, निःस्वार्थं जनम्, निष्ठावन्तं तम् ।

| विशेषणपदानि | विशेष्यपदानि |
|---|---|
| | |

## २. विशेष्यपदं विशेषणपदं च नियमानुसारं परस्परं योजयत

| | |
|---|---|
| सुन्दराणि | युवकैः |
| उन्नतेभ्यः | वनानि |
| चतुरैः | शिखरेभ्यः |
| सेवकस्य | नार्यः |
| समाजसेविकाः | रमेशस्य |

## ३. कोष्ठस्थसङ्केताधारेणा वाक्यानां वचनं परिवर्तयत

(क) पुरुषाः नार्यश्च हृदयेन सेवाकार्येषु तत्पराः सन्ति । (एकवचने)

(ख) महर्षीणां जीवनपद्धतिः भिन्ना भवति । (बहुवचने)

(ग) सा बुभुक्षितान् जनान् असेवत । (बहुवचने)

(घ) पुस्तकमिदं १९९५ तमे ईशवीयाब्दे प्रकाशितम् आसीत् । (द्विवचने)

(ङ) समाजसेविनः परोपकारिणश्च तदा शोकमापन्नाः । (एकवचने)

## ४. मातृशब्दस्य रूपाणि पठत

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरौ | मातॄः |

| | | | |
|---|---|---|---|
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातृणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधनम् | हे मातः ! | हे मातरौ ! | हे मातरः ! |

सारिणीं दृष्ट्वा उत्तरपुस्तिकायां मातृशब्दस्य रूपावलिं लिखत ।

## ५. मातृशब्दस्य रूपाणि प्रयुज्य अनुच्छेदं पूरयत

................ अस्मान् जनयति, लालयति, पालयति च । वयं ................ देवीरूपेण पूजयामः । बालकाः बालिकाश्च प्रायेण .................... सह मातुलगृहं गच्छन्ति । जनाः समये समये ................ उपहारादीनि प्रयच्छन्ति । सन्ततयः .................. दूरं गन्तुं न इच्छन्ति । वयं ................. अङ्के स्वर्गीयं सुखम् अनुभवामः । .............. सर्वे सद्गुणाः भवन्ति । हे ................ अस्मान् सदा प्रेम्णा पालय ।

## ६. स्वसृशब्दस्य रूपाणि पठत

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | स्वसा | स्वसारौ | स्वसारः |
| द्वितीया | स्वसारम् | स्वसारौ | स्वसृः |
| तृतीया | स्वस्रा | स्वसृभ्याम् | स्वसृभिः |
| चतुर्थी | स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः |
| पञ्चमी | स्वसुः | स्वसृभ्याम् | स्वसृभ्यः |
| षष्ठी | स्वसुः | स्वस्रोः | स्वसृणाम् |
| सप्तमी | स्वसरि | स्वस्रोः | स्वसृषु |
| सम्बोधनम् | हे स्वसः ! | हे स्वसारौ ! | हे स्वसारः ! |

मातृशब्दस्य स्वसृशब्दस्य च कस्यां कस्यां विभक्तौ रूपाणि पृथक् सन्ति ? निश्चित्य लिखत ।

## ७. अधस्तनानि रूपाणि प्रयुज्य वाक्यानि रचयत

स्वसारौ, स्वसृभ्यः, स्वसुः, स्वसरि, हे स्वसः ! ।

## ८. मतिशब्दस्य रूपाणि पठत

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते ! | हे मती ! | हे मतयः ! |

मतिशब्दस्य रूपावलिं पठित्वा अधस्तनानां शब्दानां रूपावलिं लिखत

(अ) कान्तिशब्दः

(आ) गतिशब्दः

(इ) बुद्धिशब्दः

## ९. निर्देशानुसारेण रूपाणि लिखत

(क) कीर्तिशब्दः, षष्ठी विभक्तिः, बहुवचनम् ....................

(ख) भ्रान्तिशब्दः, द्वितीया विभक्तिः, एकवचनम् ..................

(ग) शान्तिशब्दः, चतुर्थी विभक्तिः, द्विवचनम् .....................

(घ) क्षतिशब्दः, तृतीया विभक्तिः, एकवचनम् ....................

(ङ) जागृतिशब्दः, प्रथमा विभक्तिः, बहुवचनम् .....................

### प्रतिभाप्रदर्शनाभ्यासः

## १. यथेच्छम् एकस्याः व्यक्तेः सङ्क्षिप्तं जीवनवृत्तं विलिख्य शिक्षकं दर्शयत ।

२. **अधोलिखितानि सूत्राणि आधृत्य जीवनीं लिखत**

जनकनामा धर्मात्मा

जनकपुरे तस्य जन्म शासनञ्च

प्रजां स्वसन्ततिम् इव अरक्षत्

विद्याप्रेमी

स विद्वद्भ्यः अधिकं धनम् अदात्

जनकस्य सीतानाम्नी पुत्री

सीतायाः विवाहं श्रीरामेण सह अकारयत्

अस्माकम् विभूतिः

३. **आत्मनः प्रियव्यक्तेः संक्षिप्तां जीवनीं लिखित्वा सखीन् श्रावयत ।**

## कोषानुशीलनम्

**नाट्यवर्गः**

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥
काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ॥
नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ।
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते ॥
समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥
चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।

मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ॥
स्याद्यशः पटहो ढक्का भेरी स्त्री दुन्दुभिः पुमान् ।
आनकः पटहोऽस्त्री स्यात्कोणो वीणादि वादनम् ॥
वीणादण्डः प्रवालः स्यात्ककुभस्तु प्रसेवकः ।
कोलम्बकस्तु कायोऽस्या उपनाहो निबन्धनम् ॥
वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके समे ॥
विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम् ॥
ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।
तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥
भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ॥
भगिनीपतिरावुत्तो भावो विद्वानथावुकः ।
जनको युवराजस्तु कुमारो भर्तृदारकः ॥
राजा भट्टारको देवस्तत्सुता भर्तृदारिका ।
देवी कृताभिषेकायामितरासु तु भट्टिनी ॥
अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः ।
अम्बा माताथ बाला स्याद्वासूरार्यस्तु मारिषः ॥
अत्तिका भगिनी ज्येष्ठा निष्ठानिर्वहणे समे ।
हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ॥
अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके ॥

## पदानुशीलनी

**सप्तस्वराणां नामानि** (अत्र सर्वाणि नामानि पुंलिङ्गे सन्ति) )

निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः

**मधुरा मन्दध्वनिः** - काकली २

**गभीरा ध्वनिः** - मन्द्रः १

**उच्चध्वनिः** - तारः १ .

**समानतालः** - एकतालः १,

**वीणायाः नामानि** - वीणा २, वल्लकी २, विपञ्ची २,

**सप्ततारयुक्तं वाद्यम्** - परिवादिनी २,

**तारवेष्टितं वाद्यम्** - ततम् ३ .

**चर्मवेष्टितं वाद्यम्** - आनद्धम् ३,

**श्वासप्रवाहितं वाद्यम्** - सुषिरम् ३

**ताड्यवाद्यम्** - घनम् ३,

**चतूर्णां वाद्यानां समूहः** - वाद्यम् ३. वादित्रम् ३. आतोद्यम् ३,

**मृदङ्गानां नामानि** - मृदङ्गः १, मुरजः १,अङ्क्य आलिङ्ग्य, ऊर्ध्वक

**नगरा** - यशः३ पटहः १, ढक्का २क

**दुन्दुभि** - भेरी २, दुन्दुभिः २,

**आनकः** - आनकः १, पटह ५.

**वीणावादनस्य साधनम्** - कोणः १,

**वीणायाः नालम्** - प्रवालम्,३

**प्रसेवकः** - ककुभः१, प्रसेवकः १,

**तन्त्रीरहिता वीणा** - कोलम्बकः १,

**तन्त्रीवेष्टनकीलकम्** - उपनाहः १,

**डमरुः** - डमरुः १, मड्डुः १,

**डिम्डिमध्वनियुक्तं वाद्यम्** - डिण्डिमम् १,

**झर्झरवाद्यम्** - झर्झरः १,

**मर्दलवाद्यम्** - मर्दलः १,

**कण्ठतालः** - पणवः १,

**नटी स्त्री** - नर्तकी २, लासिका २,

**शनैः गायनम्** - तत्त्वम् ३,

**शीघ्रं गायनम्** - ओघः १,

**मध्यमगायनम् –** घनम् ३,

**नृत्यगीतसमयादीनां मेलनम्** - तालः १,

**गीतध्वनिः** - लयः १

**नृत्यम्** - ताण्डवम् ५, नटनम् ३,नाट्यम् ३. लास्यम् ३, नृत्यम् ३, नर्तनम् ३,

**वाद्ययुक्तं नृत्यगानम्** - तौर्यत्रिकम् ३, नाट्यम् ३,

**स्त्रीवेषधारी पुरुषः** - भ्रकुंसः १, भ्रुकुंसः १, भ्रूकुंसः १,

**नाट्यमञ्चनक्रमे एव प्रयुक्ताः शब्दाः**

**वेश्या** - अज्जुका २,

**अग्रजाया अनुजायाश्च पतिः** - आवुत्तः १

**विद्वान्** - भावः १

**पिता** - आवुकः १

**युवराज** - कुमारः १, भर्तृदारकः १

**राजा** - भट्टारकः १, देवः १,

**राजकुमारी** - भर्तृदारिका २,

**अभिषिक्ता राज्ञी** - देवी २,

**अन्या राज्ञी** - भट्टिनी २,

**न हन्तव्य इति कथनम्** - अब्रह्मण्यम् ३,

**राज्ञः श्यालः** - राष्ट्रियः १,

**माता** - अम्बा २,

**युवतिः** - वासू २,

**पूज्यः** - मारिषः १

**अग्रजा** - अत्तिका २,

**नाट्यसमाप्तिः** - निष्ठा २,निर्वहणम् ३,

**शूद्रा स्त्री** - हण्डे ०,

**सेविका** - हञ्जे ०

**सखा** – हला ०

**अङ्गचालनम्** - अङ्गहारः १ अङ्गविक्षेपः १

**अभिनयः** - व्यञ्जकः १, अभिनयः१

**अङ्गाभिनयः** - आङ्गिकः १,

**भूषणाभिनयः** - सात्त्विकः१

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत**

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।
तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥

२. **स्वराणां सप्त नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण वाद्यशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वाद्यम् | ............ | ............ |
| द्वितीया | ............ | ............ | ............ |
| तृतीया | वाद्येन | ............ | ............ |
| चतुर्थी | ............ | वाद्याभ्याम् | ............ |
| पञ्चमी | ............ | ............ | वाद्येभ्यः |

| | | | |
|---|---|---|---|
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | वाद्येषु |
| सम्बोधनम् हे वाद्य ! | ............ | ............ | |

४. **"वल्लकी" इति कस्य नाम ?**

५. **दुन्दुभिशब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

निषादर्षभ ............. धैवताः ।

.................................स्वराः ।

७. **नृत्यशब्दस्य रुपावलिं लिखत ।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

अम्बा, अभिनयः, तालः, मृदङ्गः, वीणा

९. **पर्यायान् परस्परं मेलयत**

| समूहः क | समूहः ख |
|---|---|
| निषादः | वादित्रम् |
| वीणा | दुन्दुभिः |
| वाद्यम् | मद्रुः |
| भेरी | पञ्चमः |
| डमरुः | वल्लकी |

षष्ठः पाठः

# त्यागी कः ?

एको धनिक आसीत्। स व्यापारेण उद्योगेन च अधिकं धनसञ्चयमकरोत्। धनिकस्य अभिलाषः केवलं धनसञ्चय आसीत्। धनाय धनिकस्य तृष्णा निरन्तरमवर्धत। किञ्चिदपि धनं दातुमुपभोक्तुञ्च स नैच्छत्।

धनिकस्य एकं मित्रमासीत्। स धनिकस्य हितमभिलषति स्म। मित्रं धनिकस्य लुब्धस्वभावमपि जानाति स्म। मित्रं धनिकस्य हितं विचिन्त्य अवदत् - त्वया सह अधिकं धनं वर्तते। धनं न केवलं सञ्चयस्य अपितु दानस्य उपभोगस्य च विषयो वर्तते। दानमुपभोगञ्च विना धनं विनश्यति।

मित्रस्य कथनादपि धनिकस्य मनः परिवर्तितं नाभवत्। स धनाय एव इतस्ततः अधावत्, सततं कठोरं परिश्रमञ्च अकरोत्। स परिवाराय अपि स्वल्पमेव धनं व्ययीकरोति स्म। कदाचिद् धनिकः कार्यवशात् अन्यद् नगरं गतः। तत्र एकः साधुस्तिष्ठति स्म। साधुः ख्यातनामा आसीत्।



तस्य प्रचारः प्रतिष्ठा च आनगरं व्यापृते आस्ताम् । धनिकः अपि साधोर्विषये श्रुतवान् । स तं मेलितुमुत्सकः अभवत् । धनिकस्य साधुना सह मेलः अभवत् । साधुः धनिकं न जानाति स्म । स परिचयं दातुं धनिकमन्वरुणत् । धनिकः सगर्वमवदत् - अहं धनिकः अस्मि । मम पार्श्वे प्रभूतं धनं वर्तते । मम नगरे धनेन न कः अपि मां जयति ।

साधुः आह - शोभनम् । भवान् महाजनः अस्ति । कथय तावत् भवता धनेन किं कृतम् ? दानाय भोगाय च तत् प्रयुक्तं न वा ?

धनिकः अवदत् - तत् न कृतम् । तत्र धनस्य व्ययस्तु व्यर्थमेव भवति । साधुरवोचत् - भवतु । भवतो मया सह मेलनस्य किमस्ति प्रयोजनम् ? भवतः सुखाय अहं किं कर्तुं शक्नोमि ?

धनिकः अब्रवीत् - भवान् महान् त्यागी असि इति मया नगरे श्रुतम् । त्यागिजनेन सह मेलनं पुण्यदायकं भवतीति सर्वत्र श्रूयते । भवतो दर्शनं मेलनञ्च मम प्रयोजनमस्ति ।

धनिकस्य वचनं निशम्य साधुः अवदत् - अहं दुःखस्य कारणस्वरूपस्य जगतः प्रपञ्चमेव अत्यजम् । तत् तुच्छं वस्तु वर्तते । तुच्छवस्तुनस्त्यागात् कथं त्यागी वक्तुं शक्यते ? भवता तु जगतो विधाता शक्तिमान् परमेश्वर एव त्यक्तः । मम त्यागाद् भवतस्त्यागो विशिष्टो वर्तते । मम तुलनायां भवान् महान् त्यागी अस्ति ।

साधोर्वचनाद् धनिकस्य धनसञ्चयस्य मोहः अपगतः । स गृहं प्रत्यागत्य अधिकं धनं दरिद्रेभ्यः अदात् । स लोकस्य हिताय च धनं प्रायच्छत् । धनिको दानवीरनाम्ना परिचितः अभवत् ।

**शब्दार्थाः**

| | |
|---|---|
| धनसञ्चयः | - धनजम्मा गर्ने काम |
| अभिलाषः | - इच्छा |
| तृष्णा | - तिर्सना |
| आनगरम् | - सहरभरि |
| लुब्धस्वभावः | - लोभी स्वभाव |
| इतस्ततः | - यताउति |
| ख्यातनामा | - नाम चलेको |
| व्ययीकरोति | - खर्च गर्छ । |
| अन्वरुणत् | - अनुरोध गर्‍यो |

| | |
|---|---|
| पार्श्वे | - साथमा |
| प्रभूतम् | - धेरै |
| महाजनः | - ठूलो मानिस |
| पुण्यदायकं | - पुण्य दिने |
| निशम्य | - सुनेर |
| प्रपञ्चः | - जालझेल, समस्या |
| अपगतः | - हट्यो |
| प्रत्यागत्य | - फर्किएर |
| प्रायच्छत् | - दियो |
| दानवीरः | - दानमा वीरता देखाउने मानिस । |

## अभ्यासः

### श्रवणं भाषणं च

१. **अनुच्छेदं विभज्य पाठं पठत, पठनगतां त्रुटिञ्च परस्परं संशोधयत ।**

२. **सर्वे सखायः एतेषां शब्दानां क्रमेण पञ्चवारं शुद्धोच्चारणं कुरुत**

व्यापारेण, धनसञ्चयः, तृष्णा, उपभोक्तुम्, लुब्धस्वभावः, परिश्रमः, व्ययीकरोति, प्रतिष्ठा, व्यापृते, अन्वरुणत्, पार्श्वे, पुण्यदायकम्, प्रपञ्चः, प्रत्यागत्य, प्रायच्छत् ।

३. **अर्थं कथयत**

उपभोक्तुम्, विचिन्त्य, अधावत्, अन्वरुणत्, सगर्वम्, त्यागी, कारणस्वरूपस्य, तुच्छम्, विधाता, दरिद्रेभ्यः ।

४. **एकस्मिन् वाक्ये उत्तराणि वदत**

(क) धनिकस्य अभिलाषः कः ?

(ख) धनिकस्य मित्रं कीदृशम् आसीत् ?

(ग) धनं कथं विनश्यति ?

(घ) कस्य पार्श्वे प्रभूतं धनमासीत् ?

(ङ) त्यागिजनेन सह मेलनं कीदृशं भवति ?

(च) प्रपञ्चः कुत्र भवति ?

(छ) धनिकेन कः त्यक्त आसीत् ?

(ज) साधोर्वचनाद् धनिकः किमकरोत् ?

**५. पाठात् आत्मभिरनुभूतं प्रभावं सङ्क्षेपेण कथयत ।**

**६. साधोर्धनिकस्य च पार्थक्यस्य विषये परस्परं विमर्शनं कुरुत ।**

## पठनम्

**१. सन्धियुतपानि सन्धिविच्छेदपदानि च पठित्वा सखिभिस्सह विमृशत**

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| एको धनिकः | एकः + धनिकः | विसर्गसन्धिः |
| नैच्छत् | न + ऐच्छत् | स्वरसन्धिः |
| इतस्ततः | इतः + ततः | विसर्गसन्धिः |
| साधुस्तिष्ठति | साधुः + तिष्ठति | विसर्गसन्धिः |
| साधोर्विषये | साधोः + विषये | विसर्गसन्धिः |
| व्ययस्तु | व्ययः + तु | विसर्गसन्धिः |
| व्यर्थमेव | व्यर्थम् + एव | व्यञ्जनसन्धिः |
| प्रत्यागत्य | प्रति + आगत्य | स्वरसन्धिः |
| प्रायच्छत् | प्र + अयच्छत् | स्वरसन्धिः |

**२. अधस्तनकथांशं पठित्वा प्रश्नान् उत्तरयत**

धर्मः सत्यश्च मित्रे आस्ताम् । एकदा धर्मसत्ययोर्मध्ये बलस्य विषये विवादः अभवत् । धर्म आह - अहं बलवान् अस्मि । सत्योऽवदत् - नहि त्वम्, अहं बलवान् अस्मि । बलस्य निर्णयाय द्वे एव मित्रे सर्पराजस्य समीपे अगच्छताम् । ते विवादस्य विषयं सर्पराजं

न्यवेदयताम् । सर्पराजोऽब्रवीत् - यः पृथ्वीं धारयेत् स एव बलवान् भवेदिति । प्रतिज्ञां पूरयितुं स धर्माय पृथ्वीमदात् । धर्मः पृथ्वीं वोढुं नाशक्नोत् । स व्याकुलोऽभवत् । सर्पराजः पुनः सत्याय पृथ्वीमदात् । स कतिपययुगानि यावत् पृथ्वीमधारयत् । धर्मसत्ययोर्बलस्य विवादः समाप्तः । ते मित्रे एव अभवताम् ।

(क) धर्मसत्ययोः किमर्थं विवादोऽभवत् ।

(ख) धर्मः किम् आह ?

(ग) सत्यः किम् अवदत् ?

(घ) मित्रे बलस्य निर्णयाय कुत्र अगच्छताम् ?

(ङ) सर्पराजः किम् अकथयत् ?

(च) कः पृथ्वीं वोढुं नाशक्नोत् ?

(छ) पृथ्वीं धर्तुं कः समर्थो...भवत् ?

(ज) अस्य कथांशस्य सन्देशः कः ?

## ३. अधोलिखितं गद्यांशं पठित्वा शीर्षकचयनं कुरुत

गौतमकुलोत्पन्नस्य सिद्धार्थस्य नाम सर्वे जानन्ति । सिद्धार्थः स्वजन्मना नेपालभूमि-मलङ्कृतवान् । पुरा कपिलवस्तुजनपदे एकं सुन्दरं नगरमासीत् । शाक्यवंशोत्पन्नः शुद्धोदनस्तत्र राज्यं करोति स्म । तस्य मायादेवीनाम्नी सती भार्या आसीत् । तस्याः सिद्धार्थनामा सूनुर्जन्म लेभे । स शैशवादेव ज्ञानी विवेकी च आसीत् । तस्य हृदये शान्ति-दया-करुणादयः सद्भावा भरिता आसन् । स परदुःखं दृष्ट्वा पीडितोऽभवत् । सिद्धार्थो ज्ञानेन, तपसा धर्मोपदेशेन च मानवानां दुःखं दूरीकर्तुमैच्छत् । स प्रासादं त्यक्त्वा तपश्चर्यां समाचरत् । ततः स ज्ञानी अभवत् । जनास्तं 'बुद्ध' इति वदन्ति ।

## ४. अधोलिखितं गद्यभागं वाचयित्वा गुरुं सखीन् च श्रावयत

इह संसारे यानि गुरुणि कार्याणि सन्ति तानि सर्वाण्येव धीमद्भिः कृतानि सन्ति । तत्र जडमतीनां नास्ति किञ्चन योगदानम् । प्राचीनकाले एतादृशानि बहूनि कार्याणि अभवन् । आधुनिके युगेऽपि बुद्धिमद्भिः सर्वेषामुपयोगीनि कार्याणि क्रियमाणानि सन्ति । साहित्यदर्शनविज्ञानानां चमत्कारो बुद्धिमतां परिणामो मन्यते । कस्यचिदपि कार्यस्य प्रपूरणे बुद्धिरेव प्रधानभूतं साधनं वर्तते । बुद्धिर्यस्य बलं तस्य इति सूक्तिरपि

बुद्धेर्वैचित्र्यं प्रख्यापयति। बुद्धिरियं नौषधेन प्राप्तव्या भवति। पठनपाठनचिन्तनमनन-साधनादिकर्मभिरेव बुद्धिर्वर्धते इत्यपि बुद्धिमतामेव मतमस्ति।

## लेखनम्

१. **मञ्जूषातः विलोमशब्दान् लिखत**

**रात्रिः, मित्रम्, धनिकः, बली, कृपणः, बुद्धिमान्, महान्, उष्णः, दुर्जनः, नगरम्।**

(क) शत्रुः – ............... (ख) तुच्छः – ...............

(ग) दिनम् – ............... (घ) दरिद्रः – ...............

(ङ) उदारः – ............... (च) शीतः – ...............

(छ) मूर्खः – ............... (ज) ग्रामः – ...............

(झ) दुर्बलः – ............... (ञ) साधुः – ...............

२. **रिक्तस्थानं पूरयत**

(क) धनिकः धनस्य ........... अकरोत्। (विनाशम्/सञ्चयम्)

(ख) मित्रं धनिकस्य ........... इच्छति। (हितम्/दुःखम्)

(ग) धनिक ........... एव भ्रमति। (दानाय/धनाय)

(घ) धनिकः ........... अमिलत्। (साधुम्/दरिद्रम्)

(ङ) साधुः दुःखस्य ........... अत्यजत्। (कारणम्/स्वरूपम्)

(च) साधोर्वचनेन धनिकस्य मनः ...........। (परिवर्तितम्/विकृतम्)

(छ) साधुना धनिकः ........... प्रेरितो...भवत्। (सञ्चयाय/दानाय)

३. **पदानि प्रयुज्य वाक्यानि रचयत**

सन्तुष्टः, किञ्चिदपि, जयति, व्यर्थम्, त्यागी, प्रयोजनम्, वस्तु, विशिष्टः, श्रुत्वा, दरिद्रः, अयच्छत्।

४. **अधोलिखितवाक्यानां कर्तृपदं निरस्य प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत**

यथा-

धनिकः धनं पश्यति।

कः धनं पश्यति ?

(क) **आचार्याः** वेदान् पाठयन्ति ।

(ख) **सेवकाः** राष्ट्रं सेवन्ते ।

(ग) **बालकौ** शुकं पश्यतः ।

(घ) **महिलाः** हसन्ति ।

(ङ) **गजः** वृक्षं पातयति ।

(च) **शिष्याः** साधूनां वचनं श्रृण्वन्ति ।

(छ) **नेत्रे** उद्यानं पश्यतः ।

(ज) **फलानि** वृक्षात् पतन्ति ।

## ५. सद्वाक्ये 'आम्' असद्वाक्ये 'न' च लिखत

(क) धनिकस्य अभिलाषः धनसञ्चय एव आसीत् । ( )

(ख) धनिकस्य मित्रं किमपि नावदत् । ( )

(ग) धनिकः परिवाराय अधिकं धनं यच्छति स्म । ( )

(घ) साधुः ग्रामे अतिष्ठत् । ( )

(ङ) धनिकः साधुं मिलितुमैच्छत् । ( )

(च) साधोः कथनाद् धनिकः परिवर्तितः । ( )

(छ) धनं परोपकाराय प्रयोक्तव्यम् । ( )

## ६. रिक्तस्थाने कोष्ठकात् पर्यायपदं लिखत

(क) प्रभूतस्य ....... स्य च अर्थ एक एव भवति । (अधिक/विशाल)

(ख) साधुः .............. शब्दस्य पर्यायो वर्तते । (सज्जन/कुटिल)

(ग) सञ्चय ........... शब्दयोः समानो...र्थः । (परिचय/सङ्ग्रह)

(घ) धनं ............ च एकमेव अर्थं बोधयति । (व्यर्थम्/वित्तम्)

(ङ) कुबेरस्य अपरं नाम ............. वर्तते । (धनपति/बृहस्पति)

## अनुप्रयोग

१. **अधोलिखितानि सूत्राणि आधृत्य संक्षिप्तां कथां लिखत**

दुष्यन्तनामा प्रसिद्धो राजा ।
दुष्यन्तस्य पत्नी शकुन्तला ।
शकुन्तला ऋषेः आश्रमे अतिष्ठत् ।
दुष्यन्तशकुन्तलयोः पुत्रः भरतः ।
भरतः वीरः साहसिकश्च ।
भरतः सिंहस्य मुखं विस्फार्य दन्तान् अगणयत् ।
दुष्यन्तः भरतस्य कार्यम् अपश्यत् ।
दुष्यन्तः भरतं क्रोडे अस्थापयत् ।
दुष्यन्तशकुन्तलयोः पुनर्मेलनम् ।

२. **अधोलिखितवाक्यानि कथाक्रमानुसारेण लिखत**

(क) धनिकः धनसञ्चयमकरोत् ।
(ख) एकः धनिकः आसीत् ।
(ग) धनिकः दानवीरः अभवत् ।
(घ) धनिकः साधुना सह अमिलत् ।
(ङ) साधुः धनिकं दानाय प्रेरितवान् ।

३. **गुरोः कथायाः सारांशं श्रुत्वा पुस्तिकायां लिखत ।**

## व्याकरणबोधः

**वर्तमानकालज्ञानम्**

बालकः पठति ।
छात्राः क्रीडन्ति ।
मह्यं फलं रोचते ।
उद्याने पुष्पं वर्तते ।

उपरितनवाक्येषु पठति, क्रीडन्ति, रोचते, वर्तते क्रियापदानि सन्ति । अत्र क्रिया प्रारब्धा एव न समाप्ताः । इमाः क्रिया वर्तमानकाले प्रयुक्ताः ।

प्रारब्धः अपरिसमाप्तश्च कालः वर्तमानकालः । वर्तमानकालार्थे लट्लकारः प्रयुज्यते ।

क्रियापदानां मूलरूपं धातुः द्विविधोः भवति - परस्मैपदम्, आत्मनेपदं च ।

अत्र पठति क्रीडन्ति च परस्मैपदे रोचते वर्तते च आत्मनेपदे सन्ति ।

१. **कर्तृपदानां वर्तमानकालस्य क्रियापदैः सह मेलनं कुरुत**

| क खण्डः | ख खण्डः |
|---|---|
| गावः | वने धावन्ति । |
| अहम् | विद्यालये पठामः । |
| पुष्पाणि | कन्दुकेन क्रीडामि । |
| वयम् | सुन्दराणि भवन्ति । |
| हरिणा | दुग्धं यच्छन्ति । |

२. **अधोलिखितां रूपावलिं पठत लिखत च**

पठ्धातुः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

३. **पठ्धातोः रूपावल्या आधारे हस्-वद्-लिख्धातूनां रूपावलिं लिखत ।**

## कोषानुशीलनम्

**नाट्यवर्गः**

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥

उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।
कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥
हासो हास्यं च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।
विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम् ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।
भयङ्करं प्रतिभयं रौद्रं तूग्रममी त्रिषु ॥
चतुर्दश दरस्त्रासो भीतिर्भीः साध्वसं भयम् ।
विकारो मानसो भावोऽनुभावो भावबोधकः ॥
गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः ।
दर्पोऽवलोकोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः ॥
अनादरः परिभवः परीभावस्तिरस्क्रिया ।
रीढावमाननावज्ञावहेलनमसूर्क्षणम् ॥
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा सापत्रपान्यतः ।
क्षान्तिस्तितिक्षाभिध्या तु परस्य विषये स्पृहा ॥
अक्षान्तिरीर्ष्यासूया तु दोषारोपो गुणेष्वपि ।
वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक्स्त्रियाम् ॥
पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ।
कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ॥
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः ।
प्रेमा ना प्रियता हार्दं प्रेमस्नेहोऽथ दोहदम् ॥

## पदानुशीलनी

**रसानां नामानि** - शृङ्गारः १, वीरः १. करुणा २, अद्भुतः १, बीभत्सः १, रौद्रः १ हास्यः १, भयानकः १

**शृङ्गाररसः** - शृङ्गारसः १, शुचिः १ . उज्ज्वलः १.

**वीररसः** - उत्साहवर्धनः १. वीरः १ .

**करूणरसः** - कारुण्यम् ३, करुणा २, घृणा २, कृपा २, दया २, अनुकम्पा २, अनुक्रोशः १,

**हास्यरसः** - हसः १, हासः १, हास्यम् ३,

**बीभत्सरसः** - बीभत्स७, विकृत ७,

**अद्भुतरसः** - विस्मयः१, अद्भुत ७, आश्चर्य ७, चित्र ७, भयानकरसः - भैरव ७. दारुण ७. भीषण ७. भीष्म ७, घोर ७, भीम ७, भयानक ७, भयङ्कर ७, प्रतिभय ७,

**रौद्ररसः** - रौद्र ७. उग्र ७

**त्रासस्य नामानि** - दर :१, त्रासः १, भीतिः २, भी २, साध्वसम् ३, भयः १

**मनसो विकारः** - भावः १

**भावबोधको व्यवहारः** - अनुभावः१,

**अभिमानस्य नामानि** - गर्वः १, अभिमानः १ . अहङ्कारः १, मानः १, अवलेपः १, चित्तसमुन्नतिः २, दर्पम् १, अवष्टम्भः १. चित्तोद्रेकः १. स्मयः १, मदः१,

**निन्दायाः नामानि**- अनादरः१, परिभवः१ , परीभावः १ . तिरस्क्रिया २, रीढा२, अवमानना २. अवज्ञा २, अवहेलनम् ३, असूर्क्षणम् ३.

**लज्जायाः नामानि** - मन्दाक्षम् ३, ह्री २, त्रपा २. व्रीडा २, लज्जा २,

**विशेषा लज्जा** - अपत्रपा २,

**सहनशीलता** - क्षान्तिः २. तितिक्षा २,

**अन्येषां धनेषु लोभः** - अभिध्या २.

**असहनम्** - अक्षान्ति २, ईर्ष्या २,

**परेषां गुणेषु दोषदृष्टिः** - असूया २,

**शत्रुता** - वैरः ३. विरोधः १. विद्वेषः १,

**शोकस्य नामानि** - मन्युः १, शोकः१, शुच् २ .

**पश्चातापस्य नामानि** - पश्चात्तापः १ . अनुतापः १,विप्रतीसारः १,

**क्रोधस्य नामानि** - कोपः १, क्रोधः१,अमर्षः १, रोषः १, प्रतिघः१, रुट् २, क्रुध् २,

**साधुः स्वभावः** - शीलम् ३

**उन्मादः** - उन्मादः १, चित्तविभ्रमः १ .

**प्रेम्णः नामानि** - प्रेम १, प्रियता २, हार्दम् ३, प्रेम ३, स्नेहः १, दोहदम् ३,

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत**

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः शृङ्गारः शुचिरुज्ज्वलः ॥
उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।
कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः ॥

२. **नवानां रसानां नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण द्रुह्-शब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ध्रुट्/ध्रुड् | ............... | ............... |
| द्वितीया | ............... | ............... | द्रुहः |
| तृतीया | द्रुहा | ............... | ............... |
| चतुर्थी | ............... | ध्रुग्भ्याम्/ध्रुड्भ्याम् | ............... |
| पञ्चमी | ............... | ............... | ध्रुग्भ्यः/ध्रुट्भ्यः |
| षष्ठी | ............... | ............... | ............... |
| सप्तमी | ............... | ............... | ध्रुक्षु/ध्रुट्सु/ध्रुटत्सु |
| सम्बोधनम् हे | ध्रुक्/ध्रुग्/ध्रुट्/ध्रुड् | ............... | ............... |

४. **“तितिक्षाः“इत्यस्य को र्थः ?**

५. **क्रुध्शब्दः कस्मिन् लिङ्गे अस्ति ?**

## ६. रिक्तस्थानं पूरयत

विस्मयो.............. भैरवम् ।
दारुणं .............. भयानकम् ॥

## ७. शुच्-शब्दस्य रूपावलिं लिखत ।

## ८. प्रदत्तैः पदैः वाक्यानि रचयत

स्नेहः, कोपः, परिभवः, गर्वः, हास्यम्

## ९. पर्यायान् परस्परं मेलयत

| **समूहः क** | **समूहः ख** |
| --- | --- |
| करुणा | दर्पम् |
| भीतिः | मन्युः |
| मानः | दया |
| ह्री | भयः |
| शोकः | लज्जा |

# मातृपञ्चकम्

मुक्तामणिस्त्वं नयनं ममेति
राजेति जीवेति चिरं सुत त्वम् ।
इत्युक्तवत्यास्तव वाचि मातः
ददाम्यहं तण्डुलमेव शुष्कम् ॥ १ ॥

अम्बेति तातेति शिवेति तस्मिन्
प्रसूतिकाले यदवोच उच्चैः ।
कृष्णेति गोविन्द हरे मुकुन्दे-
त्यहो जनन्यै रचितोऽयमञ्जलिः ॥ २ ॥

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा,
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी ।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्याः क्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः ॥ ३ ॥

गुरुकुलमुपसृत्य स्वप्नकाले तु दृष्ट्वा
यतिसमुचितवेशं प्रारुदो मां त्वमुच्चैः ।
गुरुकुलमथ सर्वं प्रारुदत्ते समक्षं
सपदि चरणयोस्ते मातरस्तु प्रणामः ॥ ४ ॥

न दत्तं मातस्ते मरणसमये तोयमपि वा
स्वधा वा न दत्ता मरणदिवसे श्राद्धविधिना ।
न जप्तो मातस्ते मरणसमये तारकमनु-
रकाले सम्प्राप्ते मयि कुरु दयां मातरतुलाम् ॥ ५ ॥

१

**पदच्छेदः**

मुक्तामणिः, त्वम्, नयनम्, मम, इति, राजा, इति, जीव, इति, चिरम्, सुत !, त्वम्, इति, उक्तवत्याः, तव, वाचि, हे मातः !, ददामि, अहम्, तण्डुलम्, एव, शुष्कम् ।

**अन्वयः**

हे मातः ! "हे सुत ! त्वं मम मुक्तामणिः, त्वं मम नयनम्, त्वं मम राजा, त्वं चिरं जीव" इति उक्तवत्याः तव वाचि शुष्कम् तण्डुलमेव ददामि ।

**भावार्थः**

मातरः सर्वदा सन्ततीनां हितमिच्छन्ति । ताः स्वात्मजान् मुक्तमणिः इव सुन्दरतया, महर्घतया च पश्यन्ति । मातरः स्वपुत्रं राजानं, स्वपुत्रीं च राज्ञीं मन्वते । सन्ततीनां चिरजीवनं कामयन्ते । जनन्यः मनसा एव न तथा चिन्तयन्ति मुखेन वदन्ति च । मम हितमेव उक्तवति तव मुखे अहं शुष्कं तण्डुलमेव दातुं शक्तवान् । न किमपि अन्यत् कर्तुं समर्थः अस्मि । मातः, त्वं धन्या असि ।

२

**पदच्छेदः**

अम्बा इति, तात इति, शिव इति, तस्मिन्, प्रसूतिकाले, यत्, अवोच, उच्चैः, कृष्ण इति, गोविन्द, हरे, मुकुन्द इति, अहो, जनन्यै, रचितः, अयम्, अञ्जलिः ।

**अन्वयः**

तस्मिन् प्रसूतिकाले अम्बा, तात, शिव, कृष्ण, गोविन्द, हरे, मुकुन्द इति त्वं यत् अवोचः । अहो जनन्यै अयमञ्जलिः रचितः ।

**भावार्थः**

मम प्रसूतिकाले प्रसववेदनया त्वं हे अम्बे !, हे तातः !, हे शिव !, हे कृष्ण !, हे गोविन्द !, हे हरेः !, हे मुकुन्द ! इति उच्चैः कथयामास । अहो मातः ! तुभ्यमपि अञ्जलिं बद्ध्वा नमस्करोमि ।

३

**पदच्छेदः**

आस्ताम् तावत् इयम् प्रसूतिसमये दुर्वारशूलव्यथा नैरुच्यम् तनुशोषणम् मलमयी शय्या च


सांवत्सरी एकस्य अपि न गर्भभारभरणसमयक्लेशस्य यस्याः क्षमः दातुम् निष्कृतिम् उन्नतः अपि तनयः तस्यै जनन्यै नमः ।

**अन्वयः**

प्रसूतिसमये दुर्वारशूलव्यथा, नैरुच्यम्, तनुशोषणम्, सांवत्सरी मलमयी शय्या च इयं तावत् आस्ताम् । यस्याः एकस्य अपि गर्भभारभणक्लेशस्य निष्कृतिम् दातुं उन्नतः अपि तनयः न क्षमः, तस्यै जनन्यै नमः ।

**भावार्थः**

मम प्रसूतिकाले या असह्यं दुःखमन्वभवत् । या च आवर्षं मलमय्यां शय्यायां सुष्वाप । वर्षं यावत् भोजनमपि सम्यक्तया न चकार । यतो हि तदा नैरुच्यमासीत् । शरीरं शुष्क इव भवेत् । अहमुन्नतः तनयः भूत्वा अपि यस्याः एकस्य अपि र्गभभाभरणक्लेशस्य निष्कृतिं दातुं न शक्तवान् । तादृश्यै महत्यै जनन्यै नमः ।



४

**पदच्छेदः**

गुरुकुलम्, उपसृत्य, स्वप्नकाले, तु दृष्ट्वा, यतिसमुचितवेशम्, प्रारुदः, माम्, त्वम्, उच्चैः, गुरुकुलम्, अथ, सर्वम्, प्रारुदत्, ते, समक्षम्, सपदि, चरणयोः, ते, मातः, अस्तु, प्रणामः ।

**अन्वयः**

त्वं स्वप्नकाले यतिसमुचितवेशं मां दृष्ट्वा गुरुकुलम् उपसृत्य उच्चैः प्रारुदः । अथ ते समक्षं सर्वं गुरुकुलम् प्रारुदत् । हे मातः सपदि ते चरणयोः प्रणामः अस्तु ।

**भावार्थः**

हे मातः ! यदा त्वं स्वप्नकाले सन्न्यासिवस्त्रं धारयन्तं मां दृष्टवती तदा गुरुकुलमागत्य उच्चस्वरेण रुदितवती । तव करुणामयं रोदनं श्रुत्वा दृष्ट्वा च समग्रं गुरुकुलमपि रुरोद । हे मातः ! अहं तव पादयुगलं नमामि ।

**५**

**पदच्छेदः**

न, दत्तम्, मातः, ते, मरणसमये, तोयम्, अपि, वा, स्वधा, वा, न दत्ता, मरणदिवसे, श्राद्धविधिना, न, जप्तः, मातः, ते, मरणसमये, तारकमनुः, अकाले, सम्प्राप्ते, मयि, कुरु, दयाम्, मातः, अतुलाम् ।

**अन्वयः**

हे मातः ! ते मरणसमये (मया) तोयम् अपि न दत्तम् । मरणदिवसे श्राद्धविधिना स्वधा न दत्ता । मातः ते मरणसमये तारकमनुः न जप्तः, मातः अकाले सम्प्राप्ते मयि अतुलाम् दयाम् कुरु ।

**भावार्थः**

हे मातः ! अहं भवत्याः अन्तिमबेलायां पानीयं दातुं न अशकम् । मरणसमये तारकमनुः जप्तुमपि समर्थः नैवाभवम् । यतित्वात् मरणदिवसे श्राद्धविधिना स्वधा अपि दातुं नैवाशकम् । अहं तव समीपे शीघ्रमागन्तुं न अशकम् । मयि अतुलाम् दयां कुरु । क्षमस्व मातः ।

**शब्दार्थाः**

| **मूलशब्दः** | **संस्कृते पर्यायः** | **नेपाल्याम् अर्थः** |
|---|---|---|
| मुक्तामणिः | मौक्तिकरत्नम् | मोती |
| तण्डुलम् | निस्तुषधान्यम् | चामल |
| प्रसूतिकाले | प्रसवसमये | सुत्केरी अवस्थामा |
| अञ्जलिः | संयुतकरपुटम् | नमस्कार |

| | | |
|---|---|---|
| दुर्वारशूलव्यथा | असह्यवेदना | असह्य पीडा |
| नैरुच्यम् | निरनुरागः | अरुचि, रुचाइ नहुनु |
| तनुशोषणम् | शरीरशोषणम् | दुब्लोपन |
| सांवत्सरी | | वर्षभरिको |
| गर्भभारभरणक्लेशस्य | गर्भभारदुःखस्य | गर्भको दुःखको |
| निष्कृतिः | प्रायश्चित्तः, उपकारः | उपकार, ऋणबाट मुक्ति |
| उपसृत्य | आगत्य | पुगेर |
| यतिसमुचितवेशम् | सन्न्यासिसम्बद्धवस्त्रयुक्तम् | सन्यासीको भेष धारण गरेको |
| प्रारुदः | प्रारोदीः | रुनुभयो |
| प्रणामः | नमः | ढोग |
| श्राद्धविधिना | श्राद्धपद्धत्या | श्राद्धको विधिले |
| तारकमनु | रामनाम | रामनाम |
| अतुलाम् | अनुपमाम् | अतुलनीय |
| स्वधा | पितृदेवोद्देशेन हविस्त्यागे प्रयुक्तः शब्दः | श्राद्ध, तर्पण आदि पितृकार्यमा जल, पिण्ड आदि अर्पण गर्दा भनिने मन्त्र |
| सपदि | झटिति | तत्काल |

**अभ्यासः**

**श्रवणं भाषणं च**

१. **पाठस्थान् श्लोकान् शिक्षकात् श्रुत्वा लयपूर्वकम् अनुवाचयत ।**

२. **शिक्षकस्य साहाय्येन अधोलिखितपदानि शुद्धम् उच्चारयत**

मुक्तामणिः, तण्डुलम्, प्रसूतिकाले, अञ्जलिः, दुर्वारशूलव्यथा, नैरुच्यम्, तनुशोषणम्, सांवत्सरी, गर्भभारभरणक्लेशस्य, निष्कृतिः, उपसृत्य, यतिसमुचितवेशम्, प्रारुदः, प्रणामः, श्राद्धविधिना, तारकमनुः, अतुलाम्, स्वधा, सपदि ।

३. **पाठस्थं प्रथमं पद्यं लयपूर्वकं वाचयित्वा पदच्छेदं कुरुत ।**

४. **पाठस्थं तृतीयं श्लोकम् उक्त्वा अधस्तानां प्रश्नानाम् उत्तरं वदत**

(क) प्रसूतिकाले मातरः कीदृशीं व्यथां सहन्ते ?

(ख) तनयः किं दातुं न शक्नोति ?

(ग) प्रसवकाले मातरः कीदृशं दुःखमनुभवन्ति ?

(घ) तनयः कीदृशीं मातरं नमस्करोति ?

५. **'मानवजीवनम्' इति विषये कक्षायां समूहान् निर्माय क्रमेण सामूहिकं मतं प्रस्तुवत ।**

६. **पाठस्थान् श्लोकान् वाचयित्वा शिक्षकं श्रावयत ।**

७. **मित्रात् पाठस्य चतुर्थं श्लोकं श्रुत्वा नेपाल्यामर्थं वदत ।**

८. **पाठं श्रुत्वा प्रश्नान् उत्तरयत**

### वसुधैव कुटुम्बकम्

जगदिदं सुखदुःखात्मकम् । सुखानन्तरं दुःखम्, दुःखानन्तरं च सुखम् । सुख-दुःखयोः परिवृत्त्या भुवनमेतच्चलति । न हि लोके कश्चन दुखम् इष्टत्वेन कामयते । मुमूर्षुरपि, जराव्याधिशीर्ष्णगात्रोऽपि, चिन्तासहस्रविषण्णोऽपि, दुःखं मृत्युं वा न वाञ्छति । तर्हि कथमिव दुःखनिरोधः सम्भाव्यते ? दुःखनिरोधस्य एक एवोपायः भुवने शान्तेः सद्धर्मस्य च स्थापना । यदि मानवः मानवं स्वबन्धुदृशा निरीक्षेत तर्हि परशोषणप्रक्रिया एव समाप्यते । शोषणस्य किं मूलम् ? स्वार्थसिद्धिः, स्वसुखावाप्तिकामना च । महत्त्वाकाङ्क्षा च मानवं परशोषणे प्रेरयति । यदि परार्थनिष्पादनपूर्वकं स्वसुखसाधनम् अभिलष्येत् तर्हि न पारस्परिको विवादः कलहः सङ्घर्षः, परशोषणं च प्रवर्तेरन् ।

प्राचीनैः महर्षिभिः सततमेव सर्वभूतहितसाधनाय प्रयत्नः विहितः । वेदपुराणादिषु च समग्रं संसारमेकं गृहमिव वर्णितमस्ति । यत्र विश्वं भवत्येकनीडमित्यादिभिः । सर्वेऽपि देशीया विदेशीया वा, एकस्यैव परमात्मनः पुत्राः । तत्र किं कारणं भेदप्रथनम् ? यदाऽभेददृष्टिः प्रवर्तते, तदा जगदिदं स्वर्गमिव चकास्ति । न तत्र मोहशोकादेअवसरः, न च तदा विजुगुप्सा विचिकित्सा वा बाधते । एकत्वबुद्धौ न दुःखाग्निलेशोऽपि, क्लेशलवोऽपि च । अत एव यजुर्वेदे ईशोपनिषदि च प्रोच्यते-

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ॥

सर्वेषां धर्माणां सारभूततत्त्वानां सङ्ग्रहेण विश्वधर्मत्वं सम्भवति । अत एव पतञ्जलिना अहिंसासत्ययमादीनां महत्त्वं वर्णितम् । सत्कर्म मानवस्य मानवत्वं पोषयति । परहिताश्रयणं विश्वबन्धुत्वं च मानवं देवत्वं प्रापयति । जीवने देवत्वप्राप्तिकामना स्यात् चेत्तर्हि वसुधैव कुटुम्बकम् इति आप्तवाक्यत्वेनाश्रयणीयं व्यवहरणीयं च । निजः परः इति भावना च चेतसः भेद एव न वास्तविकः । अत एव उच्यते यत्-

**अयं निजः परो वेति गणना लघुचेतसाम् ।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ इति ।**

(अ) एकपदेन प्रश्नान् उत्तरत

(क) किं मानवं परशोषणे प्रेरयति ?

(ख) महर्षिभिः किमर्थं प्रयत्नः विहितः ?

(ग) यस्तु सर्वाणि भूतानि इति मन्त्रः कुतः गृहीतः ?

(घ) उदारचरिताः जनाः किं विचारयन्ति ?

(आ) पूर्णवाक्येन प्रश्नान् उत्तरत

(क) के मृत्युं वाञ्छन्ति ?

(ख) कलहः कदा न भवति ?

(ग) कदा जगदिदं स्वर्गमिव चकास्ति ?

(घ) जीवने किं व्यवहरणीयम् ?

(इ) सत्यकथने (√) चिह्नं असत्यकथने च (×) चिह्नं दत्त

(क) स्वार्थसिद्धिः शोषणस्य मूलं नास्ति ।

(ख) सुखदुःखयोः परिवृत्त्या भुवनमेतच्चलति ।

(ग) यस्तु सर्वाणि भूतानि इति सामवेदस्योक्तिर्वर्तते ।

(घ) सत्कर्म मानवत्वं पोषयति ।

## पठनम्

१. **शिक्षकसाहाय्येन अधोलिखितश्लोकान् पठित्वा श्लोकानां विलुप्तानि पदानि वदत**

भूप्रदक्षिणषट्केन काशीयात्रायुतेन च ।
सेतुस्नानशतैर्यच्च तत्फलं मातृवन्दने ॥१॥
पातकानां किलान्येषां प्रायश्चित्तानि सन्त्यपि ।
मातृद्रुह्यमवेहि त्वं न किञ्चित् किल निष्कृतिः ॥२॥
उपाध्यायात् दशाचार्यः आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ॥३॥
येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः ।
प्रीणाति मातरं येन पृथिवी तेन पूजिता ॥४॥

(क) भूप्रदक्षिणषट्केन ...................................... च ।
सेतुस्नानशतैर्यच्च तत्फलं ............................... ॥

(ख) ................. किलान्येषां प्रायश्चित्तानि सन्त्यपि ।
मातृद्रुह्यमवेहि त्वं न किञ्चित् किल निष्कृतिः ॥२॥

(ग) उपाध्यायात् ......................... आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता ........................................ ॥३॥

(घ) येन प्रीणाति ............................ तेन प्रीतः प्रजापतिः ।
प्रीणाति ......................... येन पृथिवी तेन पूजिता ॥४॥

२. **अधस्तनं श्लोकं पठित्वा अर्थं वदत**

न दत्तं मातस्ते मरणसमये तोयमपि वा
स्वधा वा न दत्ता मरणदिवसे श्राद्धविधिना ।
न जप्तो मातस्ते मरणसमये तारकमनु-
रकाले सम्प्राप्ते मयि कुरु दयां मातरतुलाम् ॥ ५ ॥

## ३. अधस्तनस्य श्लोकस्य सरलार्थं कथयत

मुक्तामणिस्त्वं नयनं ममेति
राजेति जीवेति चिरं सुत त्वम् ।
इत्युक्तवत्यास्तव वाचि मातः
ददाम्यहं तण्डुलमेव शुष्कम् ॥ १ ॥

## ४. संवादं पठित्वा मातृविषये सखिभिस्सह विमृशत

### कुपुत्रो जायेत क्वचिदपि कुमाता न भवति

प्राची सप्तम्यां कक्षायां पठति । सा प्रातः पित्रा सह स्वल्पाहारं कुर्वन्ती आसीत् । तदानीमेकः यतिसमुचितवेशः सन्न्यासी भिक्षार्थंतत्र समायाति । माता सन्न्यासिने भिक्षां प्रददाति । सन्न्यासी अन्यत्र गच्छति ।

**प्राची –** पितः ! अयं कः यः इदानीमत्र आगतः ?

**पिता –** सन्न्यासी । भिक्षान्नेन जीवति ।

**प्राची –** सन्न्यासिनः किमर्थंभिक्षान्नेन जीवन्ति ?

**पिता –** सन्न्यासिनां गृहं न भवति । ते तु सर्वंपरिवारं परित्यज्य एकाकी एव वसन्ति । परमात्मनः चिन्तनं कुर्वन्ति ।

**प्राची –** ते मातापितरौ अपि परित्यजन्ति ? अत एव केनचित् उक्तं स्यात् "कुपुत्रो जायेत क्वचिदपि कुमाता न भवति" इति ।

**पिता –** तथा तु नास्ति । तेऽपि मातापितरौ श्रद्दते । परन्तु सांसारिकप्रपञ्चे तेषां प्रवृत्तिर्न भवति । ते मातापित्रोराज्ञां गृहीत्वा सन्न्यासमार्गमनुसरन्ति । ते निवृत्तिमार्गेण परमं सुखमनुभवन्ति । कुपुत्रो जायेत क्वचिदपि कुमाता न भवति इति यत्त्वया कथितं तदपि सन्न्यासिना एव लिखितमस्ति ।

**प्राची –** तथा किम् ? कोऽस्ति तावदसौ महापुरुष : ?

**पिता –** आद्यगुरुः शङ्कराचार्यः । तस्य पिता तु शीघ्रमेव दिवङ्गतवान् । आर्याम्बा तस्य माता आसीत् । सा एव तं पालितवती । शङ्कराचार्यः सन्न्यस्तुमैच्छत् परन्तु माता तस्य गृहस्थजीवनमिच्छति स्म ।

**प्राची –** पश्चात् किमभवत् ?

**पिता –** एकदा मात्रा सह पूर्णानदीं प्राप्य स्नानार्थमवतीर्णः । एकः ग्राहः तस्य पादं जग्राह । निनाय च नदीमध्यम् । तदवलोक्य तारं क्रन्दन्तीं मातरं स उक्तवान्- यदि सन्न्यासानुज्ञां मे दास्यसि तर्हि नूनं ग्राहो मोक्ष्यति इति । पुत्रं जीवन्तमिच्छन्ती सा कथञ्चिद् अनुमेने । झटिति ग्राहः शिशुं तीरोपकण्ठमानीय अमुञ्चत् । तदिदमपि श्रूयते- शङ्कराचार्यः भगवतः शङ्करस्य अवतार एव आसीत्, सः स्वयमेव मायाशक्त्या ग्राहमुत्पादयामास इति ।

**प्राची –** पश्चात् शङ्कराचार्यः मातरं त्यक्तवान् ? मातुः अन्तिमावस्था कीदृश्यभवत् ?

**पिता –** सन्न्यासी अपि सः मातुः अन्तिमावस्थायां गृहमागतवान् । मातुः यथोचितं संस्कारं च सम्पादितवान् । मातृपञ्चकमिति तेन लिखितमस्ति । यद् भगवतः प्रार्थनातिरिक्तमेकमेव स्तोत्रमस्ति तस्य ।

## ५. अधस्तनमनुच्छेदं पठित्वा प्रश्नान् उत्तरयत

निखिले भुवने न कोऽपि नरो यः स्वमातृभूमिं स्वदेशं वा न प्रणमति । राष्ट्रियभावनैव सा भावना या स्वदेशोन्नत्यर्थं प्रेरयति, स्वदेशाभिमानं स्वदेशगौरवं च प्राणेभ्योऽप्यधिकं मन्यते । प्राचीनकालादेव देशभक्तिर्मानवजीवने ओता प्रोता च । ऋग्वेदे अहं राष्ट्री सङ्गमनी वसूनाम्, यजुर्वेदे- वयं राष्ट्रे जागृयाम पुरोहिताः स्याम, अथर्ववेदे पृथ्वीसूक्ते च माता भूमिः पुत्र अहं पृथिव्याः, वयं तुभ्यं बलिहृताः स्याम इत्यादयः मन्त्राः देशभक्तिभावोपेताः प्राप्यन्ते । रामायण-महाभारत-पुराणादिषु स्वदेशगौरवं देशभक्तिश्च बहुधा कीर्त्यते । स्वदेशभक्तिभावनयैव प्रेरिताः शतशो महात्मानः शूराः वीराश्च सर्वस्वं विहायापि देशरक्षणं व्यदधुः । केचन च देशोन्नतौ स्वीयान् असून् तृणवद् उज्झांचक्रुः । मातृभूमेरेवैतद् गौरवं यद् वीरा धीरा युवानो युवत्यः स्थविराश्च सोत्साहं सहर्षं च मातृभूमिसंरक्षणार्थम्, परतन्त्रतापाशविच्छेदार्थं च स्वजीवनं बलिदानभावनया समर्पयन्ति । को नु शक्नोति वर्णयितुं क्रान्तिध्वजधारिणां धीरधौरेयाणां वीरवरेण्यानां बलभद्र-भक्तिथापा-भीमसेन-कालुपाण्डे-प्रभृतीनां पुण्यानि चरितानि । स्वदेशस्य संरक्षणार्थं कतिभिर्न वीरैः स्वजीवनानि मातृभूमिचरणेषु समर्पितानि । देशभक्तिभावनया एव प्रेरिताः पुण्यात्मानो महात्मानः सीता-भृकुटी-राजर्षिजनक-गौतमबुद्ध-योगिनरहरिनाथ-प्रभृतयः विद्वदग्रेसराः स्वीयं सर्वस्वं समर्प्य देशे विदेशेषु च नेपालभूगौरवम् अभ्यवर्द्धयन् । देशभक्तिभावना एव सा भावना याऽन्तश्चेतनां प्रेरयति उद्बोधयति च । सैव दिव्यशक्तिरूपेण समादृतास्ति मृतप्राये च प्राणसञ्चारं विदधाति । देशभक्तिभावनोद्भासितचेतसो न दुःखं गणयन्ति,

न सुखं कामयन्ते, न कष्टजातं चिन्तयन्ति, न विघ्नसहस्रं समीक्षन्ते, न भौतिकाभ्युदयं लिप्सन्ते, न स्वार्थं संपिपादयिषन्ति, न च सोत्साहभङ्गम् ईहन्ते । ते लक्ष्यैकप्रवणाः, "कार्यं वा साधयेयं देहं वा पातयेयम्" इति मन्त्रम् उद्घोषयन्तः, "वासांसि जीर्णानि.", "नैनं छिन्दन्ति शस्त्राणि." इति व्याहरन्तः सहर्षं शूलमप्यालिङ्गन्ति, गोलिकापातमपि सहन्ते, मृत्युदण्डमपि कामयन्ते, जीवनोत्सर्गं च समीहन्ते । अत एव उक्तमस्ति-

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी । इति ।

## प्रश्नाः

(क) कः स्वदेशं न प्रणमति ?

(ख) कस्य चरितानि वर्णयितुं न शक्यते ?

(ग) देशभक्तिभावना किं किं करोति ?

(घ) देशसंरक्षणार्थं वीरैः किं कृतम् ?

(ङ) के नेपालगौरवम् अभ्यवर्द्धयन् ?

**६. अधस्तनपद्यं सस्वरं वाचयत**

अम्बेति तातेति शिवेति तस्मिन् प्रसूतिकाले यदवोच उच्चैः ।
कृष्णेति गोविन्द हरे मुकुन्देत्यहो जनन्यै रचितोऽयमञ्जलिः ॥

**७. अधस्तनं गीतांशं पठित्वा नेपालस्य वर्णनं कुरुत**

दिव्यधुनीभिः क्षालितचरणाममरगणैः कृतसेवाम् ।
जनकजानकीबुद्धविभूषितभव्यदर्शनां वन्दे ॥
रविशशिशोभितराष्ट्रपताकां वेदविहितहितमार्गाम् ।
हिमगिरिमुकुटां पशुपतिहृदयां विश्वनमस्यां वन्दे ॥

## लेखनम्

**१. पाठस्थश्लोकानाम् अनुलेखनं कुरुत ।**

**२. पदानि प्रयुज्य वाक्यानि रचयत**

तण्डुलम्, प्रसूतिकाले, मलमयी, प्रारुदः, उपसृत्य, तोयम् ।

३. **मुक्तामणिस्त्वम् इति श्लोकस्य भावार्थं लिखत ।**

४. **सङ्क्षेपेण उत्तरयत**

(क) माता पुत्रं किं किमिति वदति ?

(ख) माता प्रसवकाले कीदृशं कष्टं सहते ?

(ग) माता किमर्थं ममतामयी अस्ति ?

(घ) पुत्रः प्रसूतिकाले किमवोचत् ?

५. **अधोलिखितानि पद्यानि प्रपूर्य उत्तरपुस्तिकायां लिखत**

(क) ..................... नयनं ममेति

राजेति जीवेति ................ ।

इत्युक्तवत्यास्तव वाचि मातः

......... तण्डुलमेव .........॥ १ ॥

(ख) गुरुकुलमुपसृत्य............ तु दृष्ट्वा

.................. प्रारुदो मां त्वमुच्चैः ।

गुरुकुलमथ ........... प्रारुदत्ते .......

.......... चरणयोस्ते ..... प्रणामः ॥ ४ ॥

६. **शिक्षकात् मातुः महिमा इति विषये श्रुत्वा श्रुतिलेखनं कुरुत ।**

७. **शिक्षकस्य साहाय्येन अधस्तनस्य श्लोकस्य अन्वयं लिखत**

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

## व्याकरणानुशीलनम्

### १. लङ्लकारस्य रूपाणि पठित्वा रिक्तस्थानं पूरयत

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमः पुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमः पुरुषः | अकरवम् | अकुर्व | अकुर्म |
| अस्-धातुः | | | |
| प्रथम पुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमः पुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमः पुरुषः | आसम् | आस्व | आस्म |

(क) अङ्गूरबाबा समाजसेवायाः कार्यम् .................. । (कृ)

(ख) ह्यः शिवरात्रिपर्वणि मन्दिरे बहवो याचकाः .................. । (अस्)

(ग) उदारजनाः स्वार्थं त्यक्त्वा परहितम् .................. । (कृ)

(घ) भगवान् बुद्धो नेपाले एव जातः .................. । (अस्)

(ङ) त्वं कदाचित् समाजसेवाम् .................. । (कृ)

(च) राधिका भिक्षवे भोजनं यच्छन्ती .................. । (अस्)

### २. क्रियायाः सङ्गतिं निर्धार्य वाक्यानि संशोधयत

**(अ) वचनाधारेण**

(क) ते वृद्धसेवाम् अकरोत् ।

(ख) आवां कक्षाकार्यम् अलिखम् ।

(ग) शुकः कृष्णभजनम् अगायताम् ।

(घ) त्वं कथाम् अपठत ।

**(आ) पुरुषाधारेण**

(क) यूयं मन्दम् अहसन् ।

(ख) अहं मधुरम् अवदः ।

(ग) घोटकौ शीघ्रम् अधावतम् ।

(घ) ताः पाठशालाम् अगच्छाम ।

(इ) **कालाधारेण**

(क) श्वस्तने दिने वर्षा अभवत् ।  (ख) ह्यः कर्मकर आयाति ।

(ग) त्वं सम्प्रति अत्र पठिष्यसि ।  (घ) परह्यः तत्र का गमिष्यति ?

## ३. उदाहरणानुसारेण लङ्लकारस्य रूपाणि पूरयत

| **लिख्-धातुः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः पुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यमः पुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तमः पुरुषः | अलिखम् | अलिखाव | अलिखाम |
| खेल्-धातुः | | | |
| प्रथमः पुरुषः | ............. | ............. | ............. |
| मध्यमः पुरुषः | ............. | ............. | ............. |
| उत्तमः पुरुषः | ............. | ............. | ............. |
| पठ्-धातुः | | | |
| प्रथमः पुरुषः | ............. | ............. | ............. |
| मध्यमः पुरुषः | ............. | ............. | ............. |
| उत्तमः पुरुषः | ............. | ............. | ............. |
| भू-धातुः | | | |
| प्रथमः पुरुषः | ............. | ............. | ............. |
| मध्यमः पुरुषः | ............. | ............. | ............. |
| उत्तमः पुरुषः | ............. | ............. | ............. |
| हस्-धातुः | | | |
| प्रथमः पुरुषः | ............. | ............. | ............. |
| मध्यमः पुरुषः | ............. | ............. | ............. |
| उत्तमः पुरुषः | ............. | ............. | ............. |

## अनुप्रयोग

१. अध्यापकस्य सहायतया कक्षायां श्लोकोच्चारणप्रतियोगितायाः आयोजनं कुरुत ।

२. गुरोः महत्वम् इति विषयमवलम्ब्य एकं अनुच्छेदं विलिख्य कक्षायां श्रावयत ।

३. मातृभक्ति-पितृभक्ति-गुरुभक्तिसम्बद्धाः कथाः संकलय्य कक्षायां श्रावयत ।

## कोषानुशीलनम्

### नाट्यवर्गः

इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ।
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ॥
उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा ।
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ॥
उत्साहोऽध्यवसायः स्यात्स वीर्यमतिशक्तिभाक् ।
कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ॥
स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा ।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ॥
द्रवकेलिपरीहासाः क्रीडा लीला च नर्म च ।
व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम् ॥
घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता ।
अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ॥
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक्स्मितम् ।
मध्यमः स्याद्विहसितं रोमाञ्चो रोमहर्षणम् ।
क्रन्दितं रुदितम्क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ।
विप्रलम्भो विसंवादो रिङ्गणं स्खलनं समे ॥
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।

तन्द्री प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ॥
अदृष्टिः स्यादसौम्येऽक्ष्णि संसिद्धिप्रकृती त्विमे ।
स्वरूपं च स्वभावश्च निसर्गश्चाथ वेपथुः ॥
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः । ॥
॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे नाट्यवर्गः॥

## पदानुशीलनी

**इच्छायाः नामानि** - इच्छा २, काङ्क्षा २, स्पृहा २. ईहा २ . तृड् २, वाञ्छा २, लिप्सा २, मनोरथः१ . कामः, १, अभिलाषः १, तर्षः१,

**महतीच्छा** - लालसा ४,

**धर्मस्य स्मृतिः** - उपाधिः १, धर्मचिन्ता २,

**मनसो व्यथा** - आधिः १,

**स्मरणम्** - चिन्ता २. स्मृतिः २, आध्यानम् ३,

**उत्कण्ठा** - उत्कण्ठा २,उत्कलिका २

**उत्साहः** - उत्साहः १, अध्यवसायः १,

**बलयुक्त उत्साह** - वीर्य ७,

**कपटस्य नामानि** - कपट ५, व्याजः १, दम्भः १, उपधिः १, छद्मम् ३, कैतवम् ३, कुसृतिः२, निकृतिः २, शाठ्यम् ३,

**प्रमादः** - प्रमादः१, अनवधानता २,

**कौतूहलस्य नामानि** - कौतूहलम्३, कौतुकम् ३, कुतुकम् ३, कुतूहलम् ३ .

**स्त्रीणां शृङ्गारिकी प्रस्तुतिः** - विलासः १, बिब्बोकः १, विभ्रमः १, ललितम् ३, हेला २, लीला २,

**उपहासस्य नामानि** - द्रवः १, केलि ४, परीहासः १, क्रीडा २, लीला २, नर्म३,

**व्याजस्य नामानि** - व्याजः १, अपदेशः१, लक्ष्यम् ३,

**क्रीडायाः नामानि** - क्रीडा २, खेला २, कूर्दनम् ३,

**स्वेदस्य नामानि** - घर्मः१, निदाघः १, स्वेदः १,

**अचेतनम्** - प्रलयः १, नष्टचेष्टता २,

**आकारगुप्तिः** - अवहित्था २, आकारगुप्तिः २,

**संवेगः** - संवेगः१, सम्भ्रमः१,

**गुप्तहसनम्** - आच्छुरितकम् ३,

**सम्यग् हसनम्** - स्मितम् ३,

**रोमाञ्चः** - रोमाञ्चः१, रोमहर्षणम् ३,

**रोदनम्** - क्रन्दितम् ३, रुदितम् ३, क्रुष्टम् ३,

**जृम्भणम्** - जृम्भ ७, जृम्भणम् ३,

**विप्रलम्भः** - विप्रलम्भः१, विसंवादः१,

**रिङ्गणम्** - रिङ्गणम् ३, स्खलनम् ३,

**शयनम्** - निद्रा २, शयनम् ३, स्वापः१, स्वप्नः १, संवेशः १,

**तन्द्रावस्था** - अर्धनिन्द्रा - तन्द्री २, प्रमीला २,

**भ्रुकुटिः** - भ्रकुटिः २, भ्रुकुटिः २, भ्रूकुटिः २,

**भययुक्ता दृष्टिः** - अदृष्टिः २,

**स्वभावस्य नामानि** - संसिद्धिः २, प्रकृतिः२, स्वरूपम् ३, स्वभाव १, निसर्गः १,

**कम्पनम्** - वेपथुः १, कम्पः १,

**उत्सवस्य नामानि** - क्षणः १, उद्धर्षः १, महः १, उद्धवः १, उत्सवः १

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत**

इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ।
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः ॥

२. **इच्छायाः पञ्च नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण स्मृतिशब्दस्य रूपावलिं पूरयत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | स्मृतिः | ............. | ............. |
| द्वितीया | ............. | ............. | स्मृतीः |
| तृतीया | स्मृत्या | ............. | ............. |
| चतुर्थी | ............. | स्मृतिभ्याम् | ............. |
| पञ्चमी | ............. | ............. | स्मृतिभ्यः |
| षष्ठी | ............. | ............. | ............. |
| सप्तमी | ............. | ............. | स्मृतिषु |
| सम्बोधनम् | हे स्मृते ! ............. | ............. | |

४. **"छद्मम्" इति कस्य नाम ?**

५. **भ्रुकुटिःशब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

इच्छा............. मनोरथः ।

.............लालसा द्वयोः ।

७. **तृष्-शब्दस्य रूपावलिं लिखत ।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

प्रकृतिः, उत्सवः, संवेगः, स्वेदः:, विभ्रमः

९. **पर्यायान् परस्परं मेलयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| द्रवः | व्याजः |
| दम्भः | क्रीडा |
| स्मृतिः | कौतुकम् |
| कामः | आध्यानम् |
| कुतुकम् | अभिलाषः |

# नारीशिक्षा

(भोजनान्तरं विशाखा अध्ययनकक्षं प्रविष्टा वर्तते । क्षणानन्तरं पिताऽपि अध्ययनकक्षं प्रविशति ।)

**पिता** – (आसन्द्याम् उपविश्य) पुत्रि ! किमधीयाना असि ?

**विशाखा** – श्वो विद्यालये 'नारीशिक्षा' इति विषये वक्तृत्वस्पर्धा भविता । तस्यां स्पर्धायाम् अहमपि सहभागिनी भवितास्मि । तेन तस्मिन्नेव विषये लिखितं निबन्धं पठन्ती अस्मि ।

**पिता** – एवम् ? कार्यक्रमेषु सहभागिता समीचीना । एषा स्वप्रतिभां प्रस्फोटयति । सहभागितायै धन्यवादः ।

**विशाखा** – (पुस्तकं पिधाय) पितः ! शिक्षा तु सर्वेषां कृते आवश्यकी भवति परं प्रायेण जना नारीशिक्षाया एव चर्चां कुर्वन्ति । विद्यालयेऽपि नारीशिक्षाया विषये एव स्पर्धा भविता । अत्र कारणं किम् ?



**पिता** – शिक्षया विना मानवजीवनम् अपूर्णं भवति । अतः शिक्षाया महत्त्वं सर्वेषां जीवनेऽस्ति । पुरुषेषु शिक्षितेषु अपि नार्यः शिक्षिता न सन्ति चेत् परिवारः शिक्षितो भवितुं नशक्नोति । अतः नारीशिक्षा महत्त्वपूर्णा वर्तते ।

**विशाखा** – नारीषु शिक्षितासु कथं परिवारः शिक्षितो भवति पितः ?

**पिता** – परिवारः एव न, समाजः देशश्च शिक्षितो भवति पुत्रि ।

**विशाखा** – (साश्चर्यम्) तथा कथं सम्भवति पितः ?

**पिता** – शृणु, परिवारे नारीणां विविधा भूमिका भवन्ति । मातृत्वं तासु सर्वोत्कृष्टा भूमिका वर्तते । शिक्षिता माता सन्ततिं शिक्षयति । सन्ततिषु शिक्षितासु परिवारः शिक्षितो भवति । एवं शिक्षितैः परिवारैः समाजः शिक्षितो भवति, शिक्षितैः समाजैश्च समग्रं राष्ट्रं शिक्षितं भवति । अतो नारीशिक्षा राष्ट्रविकासस्य आधारशिला वर्तते ।

**विशाखा** – परह्योऽस्माकं विद्यालये नारीशिक्षाया अवसरे एकः प्रवचनकार्यक्रम आसीत् । तत्र सर्वेऽपि वक्तारः शिक्षायां नारीणां समानोऽधिकारः कार्यः इति कथयन्त आसन् । पितः ! किं शिक्षायां नारीणामधिकारः समानो नास्ति ?

**पिता** – पुत्रि ! अधुना नगरक्षेत्रेषु शिक्षायां प्रायेण नारीणामधिकारः पुरुषैः समानो दृश्यते । केभ्यश्चिद् वर्षेभ्यः पूर्वं नगरेषु अपि नारीशिक्षाया अवस्था एतादृशी नासीत् । कतिपयेषु ग्रामेषु तु अधुनापि नार्यः शिक्षया वञ्चिताः सन्ति ।

**विशाखा** – नारीणां कृते शिक्षायामेतादृशो विभेदमूलको व्यवहारः किमर्थं क्रियते पितः ?

**पिता** – पूर्वं नारीणां कृते शिक्षाया व्यवस्था नासीत् । नार्यस्तु गृहकर्मणि एव संलग्ना भवन्ति स्म । अतस्तासां कृते शिक्षायाः किं प्रयोजनम् ? इति तदानीं जना विचारयन्ति स्म । तस्मात् पुत्रं विद्यालयं सम्प्रेष्य ते पुत्रीं गृहकर्मणि योजयन्ति स्म । कतिपयेषु ग्राम्यक्षेत्रेषु अधुनापि तस्य प्रभावो दृश्यते ।

**विशाखा** – (संस्मृत्य) एवम् ! तेनैव कारणेन अस्माकं पितामही निरक्षरा वर्तते । माता च केवलं पञ्चमकक्षाम् उत्तीर्णवती अस्ति । पितः ! किं पुराकालिकः समाजः सर्वदा नारीशिक्षाविरोधी आसीत् ?

**पिता** – तथा नासीत् पुत्रि ! वैदिककाले पौराणिककाले च नार्यः नैतिकशिक्षया

व्यावहारिकशिक्षया च शिक्षिताः आसन्। स्वरुच्यनुसारेण नार्यः दार्शनिकीं शिक्षां च गृह्णन्ति स्म। अपाला गार्गी मैत्रैयी चेत्यादीनां नारीणां नामानि तु त्वया श्रुतानि स्युः, ता दार्शनिके शास्त्रार्थे विख्यातानपि विदुषः पराजितान् चक्रुः। पुराणेषु अन्यासामपि शिक्षितानां नारीणां प्रसङ्गः प्राप्यते। पौराणिककालानन्तरं तु शनैः शनैः नारीशिक्षा न्यूनतां गता। 'नारीणां कृते शिक्षा नैवावश्यकी' एतादृशः विचारः समाजे विकसितः।

**विशाखा** – पितः ! किं भवान् तदानीन्तनानां जनानां विचारमुपयुक्तं मनुते ?

**पिता** – न, तदानीन्तनानां जनानां नारीशिक्षाविषयको विचार उपयुक्त आसीत् इति वक्तुं नशक्यते। शिक्षाया अभावेन तस्मिन् काले अनेका नार्यः पीडिता अभवन्। तदानीं ताः स्वपीडां व्यक्तीकर्तुं च न शक्नुवन्ति स्म। पश्चाद् जनानां चेतना विकसिता अभूत्, ते नारीशिक्षाया महत्त्वं ज्ञातवन्तः। अनन्तरं ते पुत्रीः अपि विद्यालयं प्रेषयितुमारभन्त।

**विशाखा** – देवीनां पूजका जनाः गृहस्थाया एव देव्याः अवहेलनां कुर्वन्ति। अयं महतः खेदस्य विषयोऽस्ति।

**पिता** – (आसनं परिवर्त्य) सत्यमुक्तं त्वया। सर्वा अपि नार्यो देवीस्वरूपा मन्यन्ते। देव्यः शक्तिरूपाः सन्ति। शक्तिमर्जयितुं जना देवीं पूजयन्ति परं गृहस्य देव्या अवहेलनेन का देवी तुष्टा भवेत् ? अधुना नारीणां शक्तिः शिक्षायामस्ति। शिक्षया एव नार्यः शक्तिमत्यो भवन्ति। अतो नार्यः यथा कथञ्चिदपि शिक्षिताः कार्याः। शिक्षिता नार्य एव सर्वेषाम् आदरणीया भवन्ति। अतोऽस्माकं पूर्वजाः कथयन्ति स्म यत्,

**नारी प्रज्ञावती या स्यात् दक्षा शिल्पवती सदा।**
**ज्ञानविज्ञानसम्पन्ना जगत्पूज्या भवेत्तु सा॥**

**विशाखा** – पितः ! स्पर्धायै मया बहुशो विषया लब्धाः। श्वः स्पर्धायाम् अहम् एतानेव विषयान् उद्भावयिष्यामि। एतदर्थं भवते धन्यवादाः।

**पिता** – (घटिकां विलोक्य) अस्तु। अधुना दशवादनं जातम्। स्वपितु। शुभरात्रिः।

**विशाखा** – शुभरात्रिः।

(पिता निर्गच्छति। विशाखा च स्वपिति)

**शब्दार्थाः**

| | |
|---|---|
| आसन्द्याम् | : उत्पीठिकायाम्, कुर्सी/शोफामा |
| वक्तृत्वस्पर्धा | : भाषणप्रतियोगिता, भाषण प्रतियोगिता |
| प्रस्फोटयति | : प्रकटयति, फ्रस्फुटन गराउँछ |
| पिधाय | : पिधानं विधाय, बन्द गरेर |
| आधारशिला | : पृष्ठभूमिः, कुनै पनि कामको मुख्य आधार |
| परह्यः | : आगामी द्वितीयः दिवसः, पर्सि |
| स्वरुच्यनुसारेण | : स्वेच्छया, आफ्नो रुचि वा इच्छाअनुसार |
| चक्रुः | : विदधुः, गरे |
| व्यक्तीकर्तुम् | : प्रस्तोतुम्, व्यक्त गर्न |
| अवहेलनाम् | : अपमानम्; हेलाम्, अपमान |
| बहुशः | : अनेकशः, धेरै प्रकारका |
| घटिकाम् | : कालबोधकयन्त्रम्, घडीलाई |
| स्वपितु | : शेष्व; शयनं कुरु, सुत |
| रङ्गलेखन्यः | : रङ्गकलमान्, अनेक रङका अक्षर लेख्ने कलमहरू लाई |

**अभ्यासः**

**श्रवणं भाषणं च**

१. **पितृप्रोक्तमधस्तनकथनं श्रुत्वा तदर्थं मातृभाषायां विलिख्य कक्षायां मित्राणि श्रावयत ।**

सर्वा अपि नार्यो देवीस्वरूपा मन्यन्ते । देव्यः शक्तिरूपाः सन्ति । शक्तिमर्जयितुं जना देवीं पूजयन्ति परं गृहस्य देव्या अवहेलनेन का देवी तुष्टा भवेत् ? अधुना नारीणां शक्तिः शिक्षायामस्ति । शिक्षया एव नार्यः शक्तिमत्यो भवन्ति । अतो नार्यः यथा कथञ्चिदपि शिक्षिताः कार्याः ।

२. **विशाखायाः अधस्तनं संवादांशं श्रुत्वा उत्तराणि वदत**

एवम् ! तेनैव कारणेन अस्माकं पितामही निरक्षरा वर्तते । माता च केवलं पञ्चमकक्षाम्

उत्तीर्णवती अस्ति । पितः ! किं पुराकालिकः समाजः सर्वदा नारीशिक्षाविरोधी आसीत् ?

(क) विशाखा केन सह संवदन्ती अस्ति ?

(ख) पितामही कीदृशी अस्ति ?

(ग) पितामह्याः निरक्षरत्वे को हेतुः ?

(घ) का पञ्चमकक्षामुत्तीर्णवती ?

(ङ) पुराकालिकः समाजः कीदृशः आसीत् ?

## ३. अधो लिखितानि पदानि उच्चारयत

तदानीन्तनानाम्, व्यावहारिकशिक्षया, ग्राम्यक्षेत्रेषु, केभ्यश्चित्, परह्योऽस्माकम्, वक्तृत्वस्पर्धा

## ४. शिक्षकात् श्रुत्वा सन्धिं विच्छिद्य सन्धिनाम च कथयत

क्षणानन्तरम्, तस्मिन्नेव, सर्वोत्कृष्टा, अतस्तासाम्, समानोऽधिकारः, स्वरुच्यनुसारेण, सत्यमुक्तम्, विख्यातानपि ।

## ५. अधस्तनसंवादांश श्रुत्वा तत्र प्रयुक्तानि समस्तपदानि श्रावयत ।

शिक्षया विना मानवजीवनम् अपूर्णं भवति । अतः शिक्षाया महत्त्वं सर्वेषां जीवनेऽस्ति । पुरुषेषु शिक्षितेषु अपि नार्यः शिक्षिता न सन्ति चेत् परिवारः शिक्षितो भवितुं नशक्नोति । अतः नारीशिक्षा महत्त्वपूर्णा वर्तते ।

## ६. शिक्षकात् अधस्तनपदानि श्रुत्वा अनुवाचयत

अध्ययनकक्षम्, साश्चर्यम्, नगरक्षेत्रेषु, विभेदमूलकः, ज्ञातवन्तः, प्रेषयितुम्, उत्तीर्णवती, दार्शनिकीम्, गृहस्थायाः, शक्तिमत्यः, ज्ञानविज्ञानसम्पन्ना

## ७. पाठस्थपद्यस्य लयोच्चारणपूर्वकं सामूहिकवाचनं कुरुत ।

## ८. शिक्षकस्य साहाय्येन पाठस्थपद्यस्य अन्वयं श्रावयत ।

## ९. निम्नलिखितं संवादं मञ्जूषाप्रदत्तपदसहायतया पूरयित्वा वदत ।

| स्युः, पितृवात्सल्यम्, आगते, त्वया, विदेशात्, मूल्यवत्, पञ्चहायना, शीघ्रम् |
|---|

(अल्पाहाराय विद्यालयस्य कक्षा विश्रान्तास्ति । तदानीं विद्यालयस्य चत्वरम् उपस्थाय सम्पदा सृष्टिश्चेति द्वे बालिके परम्परं संवदन्त्यौ आस्ताम् ।)

सम्पदा - सृष्टे ! त्वं जानासि किम् मम पिता ह्यः .............. प्रत्यागतः ।

सृष्टिः - सत्यम्, तर्हि तेन तव कृते मूल्यवन्ति वस्तूनि आनीतानि .............. !

सम्पदा - तावन्ति मूल्यवन्ति वस्तूनि तु न सन्ति किन्तु एकः मूल्यवान् उपहारस्तु वर्तते ।

सृष्टिः - स्वर्णहारः स्यात् । यद्वा ल्यापटपाख्यं सुसाङ्ख्ययन्त्रम् !

सम्पदा - नहि, तादृशं किमपि वस्तु .............. भवितुं नशक्नोति ।

सृष्टिः - तर्हि किम् ? .............. कथय । नो चेत् कक्षारम्भो भविष्यति ।

सम्पदा - पितृवात्सल्यम् । अहं .............. बाला आसम् यदा पिता विदेशमगच्छत् । अहं .............. प्रत्यक्षतः प्राप्तवती नासम् । पितरि .............. मया तत् प्राप्तम् । मम कृते तदधिकं मूल्यवत् वस्तु किं स्यात् ।

सृष्टिः - सत्यमुक्तं .............. । (विद्यालयस्य घण्टानादः श्रूयते) घण्टानादो जातः । उत्तिष्ठ, कक्षां गच्छाव । (कक्षायां गच्छतः ।)

## पठनम्

**१. अधस्तनं पत्रं पठित्वा प्रदत्तान् प्रश्नान् उत्तरत**

कानेपोखरी-६, रमणीयग्रामः

दिनाङ्काः २०७८/११/०७

पूज्यपितृचरणयोः

सादरं प्रणामः

इह कुशली अस्मि । तत्र सपरिवाराः भवन्तोऽपि स्वस्थाः कुशलिनश्च सन्ति इति विश्वसीमि । वार्धक्यं प्राप्ताया उदरपीडया सर्वदा पीडिताया मातुः अवस्था अत्र मां विशेषतो दुःखीकरोति । यदा पुत्रैः मातापितरौ सेवनीयौ तदाहम् आत्मजीविकां मार्गयन् व्यापारप्रसङ्गे आगतोऽस्मि । कृषिकर्म विधाय तेनैव माध्यमेन परिजनानां पालनं कर्तुं मया इच्छिता किन्तु भूमिसेचनबीजमलादेः समस्यया तामिच्छां परित्यज्य व्यापाराय मनः अकरोत् । गृहं ग्रामं भवतः परिजनान् च

परित्यज्य तेह्रथुमजनपदात् रमणीयग्राममागत्य मया कृतो व्यापारः प्रतिदिनं वृद्धिं गच्छन् अस्ति तथापि भवतः असहायान् विधाय आगतोऽस्मि इति खेदमनुभवामि । पूज्याः पितरः ! आगामिनि नववर्षस्यावसरे अहं गृहमागमिष्यामि । तदैव उपचारार्थं मातरमपि इह आनेष्यामि ।

भवतां चरणसेवकः पुत्रः

निर्मलः

**प्रश्नाः**

(क) निर्मलः इदानीं कुत्र वसति ?

(ख) पत्रमिदं केन कस्य कृते लिखितमस्ति ?

(ग) निर्मलः किं विश्वसीति ?

(घ) निर्मलं किंप्रयोजनाय गृहाद् दूरस्थोऽभवत् ?

(ङ) निर्मलस्य माता कया समस्यया पीठितास्ति ?

(च) निर्मलस्य मातापितरौ कुत्र निवसतः ?

(छ) केन हेतुना निर्मलः खेदमनुभवति ?

(ज) निर्मलः कदा गृहं गमिष्यति ?

(झ) पत्रमिदं कदा लिखितम् ?

(ञ) निर्मलः इदानीं किं करोति ?

२. **नारीशिक्षाविषये पाठप्रदत्तं पद्यं सलयं वाचयित्वा शिक्षकस्य साहाय्येन भावार्थं प्रकाशयत ।**

३. **मित्रद्वयं मिलित्वा पाठस्य संवादं साभिनयं पठित्वा श्रावयत ।**

४. **कोष्ठकस्थसङ्केतानुसारं रिक्तस्थानं पूरयत**

(क) जगति सज्जना दुर्जनाश्च ........................ भवन्ति ।(मनुष्य, प्रथमाबहुवचनम्)

(ख) कोऽपि जनः ............... सज्जनो दुर्जनो वा न भवति ।(जन्मन्, पञ्चम्येकवचनम्)

(ग) सत्सङ्गेन मुनष्यः ....................... जायते । (विवेकवत्, प्रथमैकवचनम्)

(घ) इदानीं .................. प्रायेण सज्जनानाम् अभावो दृश्यते । (समाज, सप्तम्येकवचनम्)

(ङ) ............. सतां सङ्गत्यै प्रयासः करणीयः । (अस्मत्, तृतीयाबहुवचनम्)

## ५. सस्वरपठनं कुरुत

अस्माभिः परितः दृष्टं भूजलवातादि सर्वं वस्तुजातं पर्यावरणं निगद्यते । प्राणिनः जीवनाय पर्यावरणशुद्धिः अपेक्षते । इदानीं समग्रेऽपि जगति पर्यावरणं दूषितं विलोक्यते । दूषितमेतत् मानवादिजीवानां स्वास्थ्ये प्रतिकूलताम् उद्भावयति । अतोऽस्माकं पूर्वजाः पर्यावरणस्वच्छतायै विशेषतः सचेताः आसन् । ते उद्याननिर्माणं वृक्षरोपणं यज्ञानुष्ठानं च कुर्वन्ति स्म । वनविनाशेन वृष्टेरभावः प्राकृतिककोपः शुद्धवायोरभावश्चेत्यादिसमस्याः सम्प्रति वर्धमानाः सन्ति । एत्तसर्वं तदैव सुव्यवस्थितं भवति यदा पर्यावरणं स्वच्छं क्रियते ।

## ६. वाक्यस्थं क्रियापदं लृट्लकारे परिवर्त्य पठत

(क) भगिनी पत्रं लिखति ।

(ख) युवां परस्परं क्रीडथः ।

(ग) ते एकस्वरेण गीतं गायन्ति ।

(घ) वयं तु विदेशात् आगच्छामः ।

(ङ) भोजनेषु तुभ्यं तु रोटिकाः रोचन्ते ।

## ७. अनुच्छेदं पठित्वा चतुरः प्रश्नान् निर्मात ।

विश्वस्मिन् अनेकाः घटनाः प्रतिदिनं घटन्ति । तासां विवरणं वयं समाचारपत्रमाध्यमेन प्राप्नुमः । समसामयिकानां विषयाणां ज्ञानाय समाचारपत्रमत्यन्तमुपयोगि भवति । समाचारपत्रस्य महत्त्वमस्माकं दैनिकजीवनेऽपि वर्तते । यतो हि अस्मात् नवीनज्ञानानां प्राप्तिर्भवति । अस्माकं समाजे एव न, देशे विदेशेषु च कृतं नवीनमनुसन्धानम्, भूक्षयभूकम्पादिभिः जातां क्षतिम्, नवीनाविष्कारम्, घटितघटनानां विश्लेषणं च समाचारपत्रतः एव वयं जानीमः । विविधक्षेत्रेषु आगतं परिवर्तनं तद् विश्लेषणं च समाचारपत्रमधीत्य ज्ञायते । अतः अस्माभिरपि स्वज्ञानवैभववर्धनाय समाचारपत्रं प्रतिदिनं पठितव्यम् ।

## लेखनम्

### १. पदानि प्रयुज्य एकैकं वाक्यं लिखत

उपविश्य, परम्, विविधा, तदानीम्, अधुना, सर्वदा, प्राप्यते, पश्चात्, अतः

### २. उचितपदेन रिक्तस्थानं पूरयत

(क) मया रम्याणि चित्राणि .............. । (श्रुतानि, लिखितानि, रचितानि)

(ख) तेन आवां ............. आपणे । (दृष्टः, दृष्टौ, दृष्टाः)

(ग) .............. दारुकाणि खण्डय । (परशुः, परशवे, परशुना)

(घ) भवान् .............. गत्वा विद्यार्थिनः पाठयति । (पाठशालाम्, पाठशाले, पाठशाला)

(ङ) अहं त्वं भूपेन्द्रश्च ........ गच्छामः। (क्रीडनम्, क्रीडनेन, क्रीडनाय)

### ३. परस्परं योजयत

| | |
|---|---|
| सर्वत्र | नामपदम् |
| अहो | क्रियापदम् |
| शिक्षा | सर्वनामपदम् |
| महती | संयोजकपदम् |
| किन्तु | क्रियायोगिपदम् |
| ते | विस्मयादिबोधकपदम् |
| स्वपितु | विशेषणपदम् |

### ४. प्रश्नान् उत्तरयत

(क) विशाखा किं कुर्वन्ती अस्ति ?

(ख) विद्यालये किंविषयिणी स्पर्धा भविता ?

(ग) नारीशिक्षा कथं महत्त्वपूर्णा ?

(घ) इदानीं ग्रामे नगरे च दृष्टो नारीशिक्षागतो भेदः कः ?

(ङ) नार्यः पूर्वं कथं शिक्षया वञ्चिता अभवन् ?

(च) वैदिककालिकाः नार्यः कीदृशीं शिक्षां गृह्णन्ति स्म ?

(छ) काः प्राचीनाः विदुष्यः ?

(ज) नारीशिक्षा कदा न्यूनतां गता ?

(झ) अशिक्षिता नार्यः कथं दुःखिता भवन्ति ?

(ञ) नार्यः किंरूपा मन्यन्ते ?

५. **शिक्षकात् मातृभाषायामर्थं परिज्ञाय संस्कृते भावार्थं लिखत ।**

नारी प्रज्ञावती या स्यात् दक्षा शिल्पवती सदा ।
ज्ञानविज्ञानसम्पन्ना जगत्पूज्या भवेत्तु सा ॥

६. **'शिक्षया विना मानवजीवनम् अपूर्णं भवति ।' इत्यस्य भावार्थं स्फुटीकुरुत ।**

७. **नारीशिक्षां विना देशः शिक्षितो भवितुं नशक्नोतीति कथ्यते । अस्मिन् विषये तव मतं किम् ? तर्कयत ।**

८. **नारीशिक्षा नारीसशक्तीकरणे सहयोगिनी भवति । कथम् ? कारणं पुरस्कृत्य लिखत ।**

९. **अस्माकं समुदाये सम्प्रत्यपि विशाखाया पितामही इव कतिपयाः नार्यः निरक्षराः सन्ति । शिक्षया ताः शिक्षयितुं यूयं वैयक्तिकरूपेण सामूहिकरूपेण च किं किं कर्तत्रं शक्नुथ । लिखत ।**

१०. **अधस्तनम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

आकाशे श्यामा मेघमाला दृश्यते, कदाचित् सौदामिनी उद्भूय क्षणेन तत्रैव विलीयते । माता प्रकोष्ठवातायनात् यदा कदा बहिः पश्यन्ती शयनकक्षे एव स्थिता अस्ति । भगवान् भास्करः अस्तं गच्छन् वर्तते । रात्रिः सन्निकटा अभवत् । तस्याः मनः अद्य महता भयेन त्रस्तमस्ति । सा ज्वरग्रस्तस्य पुत्रस्य समीपमुपस्थाय पुनः तस्या ललाटं हस्तेन स्पृशति । पुत्रः पीडया 'मातः ! मातः !' इति कथयन् अस्ति । गृहे बालकेन पुत्रेण सह विकटे ग्रामे स्थितायाः मातुः भयं प्रतिक्षणं वर्धमानमस्ति । पुत्रस्योपचारम् इच्छन्ती अपि सा

निरीहा वर्तते । यतो हि तस्मिन् ग्रामे न तु चिकित्सालयः आसीत्, न च औषधालयः, न वा कोऽपि चिकित्सकः । अतः सा शीतजले प्लावितं वस्त्रखण्डं पुत्रस्य ललाटे संस्थाप्य मध्ये मध्ये तं परिवर्तयति । नेत्रे निमील्य मनसा च प्रार्थयति, "भगवन् भूतनाथ ! मयि आपतितं दुःखं दूरीकुरुत । पुत्रो मे स्वस्थो भूयात् ।" सा क्षणं शून्यमनस्का तिष्ठति । तदैव पुत्रः मातुः दक्षिणहस्तं स्पृश्य वदति, "मातः ! बुभुक्षितोऽस्मि । किञ्चन भोजनं मे देहि ।" पुत्रस्य वचनेन भृशं प्रसन्ना माता भगवते साधुवादान् प्रदाय भोजनकक्षायां प्रविशति ।

(क) बहिः पर्यावरणं कीदृशमस्ति ?

(ख) मातुः मनः किमर्थं त्रस्तं दृश्यते ?

(ग) मातुः प्रतिक्षणं भयवर्धने को हेतुः ?

(घ) माता किमर्थम् उपचाराय पुत्रं कुत्रापि न नयति ?

(ङ) माता सहायतायै कं प्रार्थयति ?

## व्याकरणानुशीलनम्

१. **आकारान्तस्त्रीलिङ्गिनः कलाशब्दस्य अधस्तनीं रूपावलिं पठित्वा मिश्रित रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कला | कले | कलाः |
| द्वितीया | कलाम् | कले | कलाः |
| तृतीया | कलया | कलाभ्याम् | कलाभिः |
| चतुर्थी | कलायै | कलाभ्याम् | कलाभ्यः |
| पञ्चमी | कलायाः | कलाभ्याम् | कलाभ्यः |
| षष्ठी | कलायाः | कलयोः | कलानाम् |
| सप्तमी | कलायाम् | कलयोः | कलासु |
| सम्बोधनम् | हे कले | हे कले | हे कलाः |

### मिश्रित रूपावलिः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | क्षमा | ............. | ............. |
| द्वितीया | ............. | ............. | महिलाः |
| तृतीया | ............. | चिन्ताभ्याम् | ............. |
| चतुर्थी | अवस्थायै | ............. | ............. |
| पञ्चमी | ............. | ............. | प्रभाभ्यः |
| षष्ठी | ............. | यशोदयोः | ............. |
| सप्तमी | शोभायाम् | ............. | ............. |
| सम्बोधनम् | ............. | ............. | हे नूतनाः |

### २. निर्देशानुसारेण रिक्तस्थानं पूरयत

(क) श्रीकृष्णो ................. अत्यन्तं प्रिय आसीत्। (यशोदा-चतुर्थी)

(ख) कोऽपि ................. उदाहरणं न भवतु। (दुर्घटना-षष्ठी)

(ग) ................. मनुष्या रुग्णा भवन्ति। (चिन्ता-तृतीया)

(घ) ................. सज्जनानां सद्गुणोऽस्ति। (क्षमा-प्रथमा)

### ३. विपरीतार्थकपदानि परस्परं मेलयत

| 'अ' समूहः | 'आ' समूहः |
|---|---|
| धैर्यम् | दुर्भावः |
| सद्भावः | व्याकुलता |
| अग्रः | वामः |
| तीव्रम् | परकीयः |
| दूरम् | शापः |
| दक्षिणः | पृष्ठः |
| नैजः | मन्दम् |
| आशीर्वादः | समीपम् |

## ४. एतत्-शब्दस्य रूपावलिं पठित्वा वाक्यानि परिवर्तयत

### पुंलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम् | एतौ | एतान् |
| तृतीया | एतेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

### स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम् | एते | एताः |
| तृतीया | एतया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः | एतासु |

### नपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत् | एते | एतानि |
| तृतीया | एतेन | एताभ्याम् | एतैः |

| | | | |
|---|---|---|---|
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः | एतेषु |

(अ) स्त्रीलिङ्गे परिवर्तनं कुरुत

(क) एते चालका यानानि चालयन्ति ।

(ख) एतस्मै बालकाय मिष्टान्नं यच्छ ।

(ग) एतद् अतीव मधुरम् अस्ति ।

(घ) एतस्मिन् स्नेहं कुरु ।

(आ) पुंलिङ्गे परिवर्तनं कुरुत

(क) एषा नारी विदुषी अस्ति ।

(ख) एतानि गृहं प्रति नय ।

(ग) एतासु विश्वासं कुरुत ।

(घ) एतस्याः कक्षाकार्यं शोभनं वर्तते ।

(इ) नपुंसकलिङ्गे परिवर्तनं कुरुत

(क) एतं सम्यक् पश्य ।

(ख) एतौ सुन्दरौ स्तः ।

(ग) एताः किं कुर्वन्ति ?

(घ) एषः तत्र गच्छति ?

## प्रतिभाप्रदर्शनाभ्यासः

१. द्वित्राणि पात्राणि परिकल्प्य संवादं लिखत

(क) प्रतिवेशमकस्य महत्त्वम्

(ख) उद्यानसुरक्षा

(ग) पत्रपत्रिका

## कोषानुशीलनम्

**पातालभोगिवर्गः**

॥ अथ अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे पातालभोगिवर्गः॥

अधोभुवनपातालं बलिसद्म रसातलम् ।
नागलोकोऽथ कुहरं शुषिरं विवरं बिलम् ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे सुषिरं त्रिषु ॥
अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।
ध्वान्ते गाढेऽन्धतमसं क्षीणोऽन्धतमसं तमः ॥
विष्वक्संतमसं नागाः काद्रवेयास्तदीश्वराः ।
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे ॥
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ।
अलगर्दो जलव्यालः समौ राजिलडुण्डुभौ ॥
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ।
सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥
लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा ॥
अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका ।
त्रिष्वाहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ॥
समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ।
पुंसि क्लीबे च काकोलकालकूटहलाहलाः ॥

सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ।
दारदो वत्सनाभश्च विषभेदा अमी नव ॥
विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः । ॥
॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे पातालभोगिवर्गः

## पदानुशीलनी

**पातालस्य नामानि** - अधोभुवनम् ३, पातालम् ३, बलिसद्म ३, रसातलम् ३, नागलोकः १,

**छिद्रस्य नामानि** - कुहरम् ३, सुषिरम् ३, विवरम् ३, बिलम् ३, छिद्रम् ३, निर्व्यथनम् ३, रोकम् ३, रन्ध्रम् ३, श्वभ्रम् ३, वपा २, शुषिः २,

**गर्तः** - गर्त ४, अवटः १,

**छिद्रयुक्तं वस्तु** - सुषिर ७,

**अन्धकारः** - अन्धकार ५, ध्वान्तम् ३, तमिस्रन् ३, तिमिरम् ३, तमः३,

**गाढान्धकारः** - अन्धतमसम् ३,

**ईषत्तमः** - अवतमसम् ३,

**सर्वोपरि प्रसारितं तमः** - सन्तमसम् ३,

**नाग**- नागः १, काद्रवेयः१,

**नागराजः** - शेषः १, अनन्तः १,

**सर्पराजः** - वासुकिः१, सर्पराजः१,

**गोनसः सर्पः** - गोनसः १, तिलित्सः १,

**अजगरस्य नामानि** - अजगरः १, शयुः १, वाहसः १,

**जलसर्पः** - अलगर्दः१, जलव्यालः१,

**विषहीनः सर्पः** - राजिलः १, डुण्डुभः १,

**मालुधानः सर्पः** - मालुधानः १, मातुलाहिः १,

**त्यक्तकञ्चुकः सर्पः** - निर्मुक्तः १, मुक्तकञ्चुकः १,

**सर्पाणां नामानि** - (अत्र सर्वाणि नामानि पुंलिङ्गे सन्ति)

(पुं.) सर्पः, पृदाकुः, भुजगः, भुजङ्गः, अहिः, भुजङ्गमः, आशीविषः, विषधरः, चक्री, व्यालः, सरीसृपः, कुण्डली, गूढपाद्, चक्षुःश्रवः, काकोदरः, फणी, दर्वीकरः, दीर्घपृष्ठः, दन्दशूकः, बिलेशयः, उरगः, पन्नगः, भोगी, जिह्मगः, पवनाशनः, लेलिहानः, द्विरसनः, गोकर्णः, कञ्चुकी, कुम्भीनसः, फणधरः, हरिः, भोगधरः

**सर्पशरीरम्** - भोगः १,

**सर्पस्य दन्तः** - आशिः २,

**सर्पाणां विषकञ्चुकादयः** - आहेय ७,

**फणा** - स्फटा ४, फणा ४,

**सर्पस्य कञ्चुकः** - कञ्चुकः १, निर्मोकः १,

**सर्पस्य गरलम्** - क्ष्वेडः १, गरलम् ३, विषः ५,

**विषविशेषस्य नामानि** - काकोल ५, कालकूट ५, हलाहल ५, सौराष्ट्रिकः १, शौक्लिकेयः१, ब्रह्मपुत्रः१, प्रदीपनः १, दारदः १, वत्सनाभः १,

**विषस्य चिकित्सकः** - विषवैद्यः १, जाङ्गुलिकः १,

**सर्पमादाय नृत्यविधायको नरः** - व्यालग्राही १, अहितुण्डिकः १

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽन्धतमसं तमः ॥

२. **छिद्रस्य दश नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण हरिशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | ............ | ............ |
| द्वितीया | ............ | ............ | हरीन् |
| तृतीया | हरिणा | ............ | ............ |

| | | | |
|---|---|---|---|
| चतुर्थी | ............ | हरिभ्याम् | ............ |
| पञ्चमी | ............ | ............ | हरिभ्यः |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | हरिषु |
| सम्बोधनम् | हे हरे ! | ............ | ............ |

४. "शयु:"इति कस्य नाम ?

५. तिमिरम् कस्मिन् लिङ्गे अस्ति ?

६. रिक्तस्थानं पूरयत

सर्पः .............. भुजङ्गमः ।

......................सरीसृपः ॥

७. अहि-शब्दस्य रूपावलिं लिखत ।

८. प्रदत्तैः शब्दैः वाक्यानि रचयत

छिद्रम्, भुजङ्गः, अजगरः, सर्पराजः, डुण्डुभः

९. पर्यायान् परस्परं मेलयत

| समूहः क | समूहः ख |
|---|---|
| सर्पः | स्फटा |
| फणा | रसातलम् |
| वासुकिः | उरगः |
| पातालम् | अवटः |
| गर्तः | सर्पराजः |

# यात्रावृत्तान्तः



असौ रमणीया यात्रासीत् । यात्रावसरस्य उत्साहम्, आनन्दञ्च स्मृत्वा यात्रासौ इदानीन्तनी इव अनुभूयते । ज्येष्ठमासस्य प्रथमः दिवसः आसीत्, शनिवासरीयं दिनम् । प्रातः पञ्चवादने अस्माकं यात्रा प्रारब्धा । यात्रा स्वस्य परिवारसदस्यैः प्रतिवेशिभिश्च सह मम गृहनगरात् भरतपुरात् प्रारब्धासीत् । यात्रासमूहे वयं षड्विंशतिः जनाः आस्म । तदतिरिक्तौ वसयानस्य चालकः, सहचालकश्च आस्ताम् । भगवत्याः मौलाकालिकायाः मन्दिरमस्माकं गन्तव्यस्थलमासीत् । तच्च मन्दिरं नवलपरासी-जनपदस्य गैँडाकोट-क्षेत्रस्य उत्तरभागे पर्वतोपरि वर्तते ।

सार्धपञ्चवादने नारायणीनद्याः सेतुमतिक्रम्य गैँडाकोटक्षेत्रं प्राप्ताः वयं पादोनषड्वादने तु पर्वतस्य नीचैः प्राप्तवन्तः आस्म । तत्र विनायकस्य मन्दिरमस्ति । मन्दिरे विनायकस्य आद्यपूजां विधाय सार्धषड्वादने अस्माकं पर्वतीया पदयात्रा प्रारब्धा । ग्रीष्मर्तोः घर्मकालः, तत्र च सोपानारोहणश्रमेण निःसृताः स्वेदबिन्दवः शरीरात् पतन्तः आसन् तथापि सोपानमार्गमुभयतः स्थितस्य वनस्य मनोरमं दृश्यमस्माकं चेतः आह्लादयदासीत् । नैकेषां पक्षिणां कूजनध्वनिश्च मनः मोदयन् आसीत् । तत्र यात्रारतानां सर्वेषां भक्तजनानां पार्श्वे स्यूतेन सहैव पार्श्वकोषे एकैका जलकूपी दृश्यते स्म । विश्रामाय मार्गपार्श्वयोः जनाश्रयाः निर्मिताः आसन् । तेषु जनाश्रयेषु वटं पिप्पलञ्च रोपिते आस्ताम् । पर्वतीययात्रया श्रान्ता वयं मध्ये मध्ये जनाश्रयेषु विश्रामं कुर्वन्तः जलकूप्याः जलं पिबन्तः स्मः । कूप्यां जलभरणाय जनाश्रयाणां निकटे जलनालाश्च आसन् ।



मन्दं मन्दं वहन् शीतलः वायुः घर्मपीडितानामस्माकं स्वेदबिन्दूनां शोषणेन अस्मान् आनन्दयन् आसीत् । भगवत्याः कालिकायाः दर्शनाय अस्मन्मनःसु समुत्पन्ना समुत्सुकता च घर्मपीडामुपेक्षितुं प्रेरयन् आसीत् । एवं सार्धहोरात्मिकया यात्रया वयं भगवत्याः मन्दिरं प्राप्तवन्तः । भगवत्याः दर्शनाय भक्तजनानां समूहः पङ्क्तिबद्धः आसीत् । भगवत्याः दर्शनपूजनादिकं शीघ्रं सम्यक् व्यवस्थापयितुं तत्र स्वयंसेवकाः जनाश्च आसन् । सत्यामपि सुदीर्घायां जनपङ्क्तौ केवलं पञ्चदशाकलाभ्यन्तरे वयं भगवत्याः दर्शनमलभामहि ।

भगवत्याः प्रसादादिकं लब्ध्वा वयं सर्वे देवीस्थानात् किञ्चिद् अधोभागे समागताः । अस्माभिः सर्वैरपि यद्यत् भोज्यपेयादिकं स्वगृहात् नीतमासीत्, तत् परस्परं विनिमयेन भुक्तम् । ततः क्षणं विश्रम्य गृहं प्रत्यागताः । भगवती मौलाकाली अस्मभ्यं सर्वेभ्यः शुभाशीर्वादान् प्रयच्छतु ।

## पाठाभ्यासः

### श्रवणं भाषणं च

१. **यात्रावृत्तान्तं कक्षायां श्रुत्वा स्वमातृभाषायां श्रावयत ।**

२. **पाठस्य प्रथममनुच्छेदमाधृत्य प्रश्नोत्तराणि कथयत**

(क) यात्रा कीदृशी आसीत् ?

(ख) यात्रादिने कः वासरः अवर्तत ?

(ग) यात्रा कतिवादने प्रारब्धा ?

(घ) यात्रासमूहे कति जनाः आसन् ?

३. **शिक्षकात् पदानि श्रुत्वा अनुवाचयत**

नारायणीनद्याः, प्राप्तवन्तः आस्म, विनायकस्य, आद्यपूजा, सार्धषड्वादने, पदयात्रा, घर्मकालः, सोपानारोहणश्रमेण, निःसृताः, स्वेदबिन्दवः, मनोरमम्, पक्षिणाम्, कूजनध्वनिः, यात्रारतानाम्, भक्तजनानाम्, पार्श्वकोषे, जलकूपी, जनाश्रयाः, पर्वतीययात्रया, जलभरणाय, जनाश्रयाणां निकटे ।

४. **पाठस्य एकैकरूपेण साभिनयं वाचनं कुरुत ।**

५. **पाठस्य शब्दान् प्रयुज्य निर्मितानि नवीनानि वाक्यानि श्रावयत–**

(क) घोटकः शीघ्रं धावति ।

(ख) वायुः सर्वेषां प्राणिनां जीवनाधारः अस्ति ।

(ग) देवदेवीनां दर्शनाय वयं मन्दिरं गच्छामः ।

(घ) भगवती सर्वेषां भक्तजनानां मनोरथं पूरयतु ।

(ङ) मम गृहस्य निकटे भगवतः शिवस्य मन्दिरं वर्तते ।

६. **शिक्षकात् अधस्तनं श्लोकं तस्य शास्त्रसन्दर्भञ्च शृणुत**

लोकानां दर्शनायैव जाता श्रद्धा ममोरसि ।

देवानां दर्शनं पुण्यं दुर्लभं हि सुमानुषैः ॥ (पद्मपुराणम् २/८२/५)

(क) अस्य श्लोकस्य सामूहिकवाचनं कुरुत ।

(ख) शिक्षकसाहाङ्ग्येन श्लोकस्य अन्वयं श्रावयत ।

(ग) श्लोकस्य भावविस्तारं कृत्वा श्रावयत ।

## पठनम्

### १. बोधपाठं पठत

मौलाकालिकायाः मन्दिरम्, यत् नवलपरासीजनपदस्य गैँडाकोटस्थाने पर्वतशिखरे विद्यमानमस्ति । महेन्द्रराजमार्गात् चतुःकिलोमिटरपरिमितं दूरं समुद्रतटात् ५६१ मिटरपरिमिते उच्चस्थाने चेदं विराजते । मन्दिरं परितः पर्वतीयं वनमस्ति । मन्दिरं प्राप्तुं साम्प्रतं यावत् यानमार्गः निर्मितः नास्ति । तत्र केवलं सोपानमार्गः वर्तते । सम्प्रति रज्जुयाननिर्माणाय योजना अग्रेसारिता वर्तते ।

देशाद् विदेशाच्च श्रद्धालवः दर्शनार्थिनः अत्र भगवत्याः दर्शनार्थमागच्छन्ति । वनस्यान्तः निर्मिते सोपानमार्गे पदयात्रया पर्वतारोहणमनुभवस्य अपूर्वतां भावयति । वनस्य प्राकृतिकदृश्यानामवलोकनेन सहैव शीतलवायुस्पर्शः पर्यटकानां मनोमोदनं करोति ।

षोडशशताब्द्याः प्रारम्भे पाल्पाराज्यस्य शासकस्य मणिमुकुन्दसेनस्य सन्दर्भः मौलाकालिकाया मन्दिरस्य ऐतिहासिकी पृष्ठभूमिः मन्यते । तदानीं मणिमुकुन्दसेनस्य सैन्यबलेन भगवत्याः

पूजनार्थं तत्र मौलोस्तम्भं प्रकल्प्य भगवत्याः कालिकायाः स्वरूपां शिलाञ्च स्थापयित्वा पूजनं कृतमासीत्। कालान्तरे १९९० वैक्रमाब्दस्य भूकम्पेन तत् स्थलं लुप्तमासीत्। गैँडाकोटनिवासिनः काशीनाथ-पौडेलनामकस्य कस्यचन वयोवृद्धस्य स्वप्ने भगवती समायाता। भगवत्या निर्देशानुसारेण तत् स्थलं प्राप्य अन्वेषणेन मौलोस्तम्भः भगवत्याः शिला, घण्टाश्च प्राप्ताः। ग्रामीणैः सह मिलित्वा तत्रैव मृत्पाषाणैः काशीराजेन मन्दिरं निर्मितम्। पश्चात् समये समये मन्दिरस्य पुनर्निर्माणपूर्वकं साम्प्रतिकं विशालं सुदृढञ्च मन्दिरं सञ्जातमस्तीति ज्ञायते। भगवती भक्तमनोरथं पूरयतीति जनविश्वासः वर्तते। प्रायः सर्वदैव दर्शनार्थिनां गमनं तत्र दृश्यते। शारदीयनवदुर्गापूजावसरे अत्र विशेषा मेला भवति। धार्मिकपर्यटनदृष्ट्या च मन्दिरमिदमत्यन्तं महत्त्वपूर्णमस्ति।

## २. बोधपाठस्य आधारेण प्रश्नान् उत्तरयत

(क) मन्दिरं परितः किमस्ति ?

(ख) कस्य स्वप्ने भगवती समायाता ?

(ग) तत्र कीदृशः जनविश्वासः वर्तते ?

(घ) किं पर्यटकानां मनोमोदनं करोति ?

(ङ) मन्दिरं गन्तुं कीदृशः मार्गः निर्मितः वर्तते ?

(च) मौलाकालिकायाः मन्दिरं कुत्र विद्यमानमस्ति ?

(छ) भगवत्या निर्देशानुसारेण तत्र किं किं प्राप्तम् ?

(ज) श्रद्धालवः दर्शनार्थिनः भगवत्याः दर्शनार्थं कुतः आगच्छन्ति ?

(झ) वनस्यान्तः सोपानमार्गे पदयात्रया पर्वतारोहणं किं भावयति ?

(ञ) मौलाकालिकाया मन्दिरस्य केन सम्बद्धा ऐतिहासिकी पृष्ठभूमिः वर्तते ?

## ३. बोधपाठस्य मौनपठनं कृत्वा पाठसारांशं कथयत।

## ४. बोधपाठात् प्रथमस्य अनुच्छेदस्य द्रुतपठनं कृत्वा मित्राणि श्रावयत।

## ५. बोधपाठाधारेण विलुप्तानि पदानि वदत

ग्रामीणैः सह .......... तत्रैव मृत्पाषाणैः .......... मन्दिरं ..........। पश्चात् .......... मन्दिरस्य पुनर्निर्माणपूर्वकं .......... विशालं सुदृढञ्च .......... सञ्जातमस्तीति ज्ञायते। .......... भक्तमनोरथं पूरयतीति .......... वर्तते। प्रायः सर्वदैव .......... गमनं ..........

दृश्यते । शारदीयनवदुर्गापूजावसरे .......... विशेषा मेला भवति । धार्मिकपर्यटनदृष्ट्या च .......... इदम् .......... महत्त्वपूर्णमस्ति ।

६. **पर्यटनप्रवर्धनदृष्ट्या देव्याः मन्दिरस्य महत्त्वमाधृत्य बोधपाठं विमृशत ।**

## लेखनम्

१. **पाठाधारेण पूर्णवाक्येन प्रश्नान् उत्तरयत**

(क) कस्य दृश्यं मनोरममासीत् ?

(ख) सोपानारोहणश्रमेण के निःसृताः ?

(ग) यात्रिणां गन्तव्यस्थलं किमासीत् ?

(घ) पर्वतस्य नीचैः कस्य मन्दिरमस्ति ?

(ङ) मौलाकालिकायाः मन्दिरं कुत्र वर्तते ?

(च) विश्रामाय मार्गपार्श्वयोः के निर्मिताः आसन् ?

(छ) कस्मिन् समये तेषां पर्वतीया पदयात्रा प्रारब्धा ?

(ज) कूप्यां जलभरणाय जलनालाः केषां निकटे आसन् ?

(झ) नैकेषां पक्षिणां कूजनध्वनिश्च किं मोदयन् आसीत् ?

(ञ) यात्रिभिः कतिवादने नारायणीनद्याः सेतुः अतिक्रान्ता ?

२. **पाठस्य अन्तिमस्य अनुच्छेदस्य श्रुतलेखनं कुरुत ।**

३. **पाठात् अन्विष्य पर्यायपदानि लिखत**

(क) सुखम् – आनन्दः

(ख) देवालयः – ...........

(ग) शैलः – ...........

(घ) अरण्यम् – ...........

(ङ) पानीयम् – ...........

(च) चित्तम् – ...........

## ४. दशाभिर्वाक्यैः पाठसारांशं लिखत ।

## ५. पाठाधारेण कथनस्य औचित्यानौचित्ये सङ्केतय

(क) शीतलः वायुः मन्दं मन्दं वहन् आसीत् । (  )

(ख) सूर्यस्य प्रकाशः घर्मपीडितानां स्वेदबिन्दून् शोषयति । ( )

(ग) सार्धहोरात्मिकया यात्रया यात्रिणः भगवत्याः मन्दिरं प्राप्तवन्तः । ( )

(घ) भगवत्याः दर्शनाय भक्तजनानां समूहः पङ्क्तिबद्धः आसीत् । ( )

(ङ) तत्र स्वयंसेवकाः जनाः न आसन् । ( )

## ६. स्वविहितां काञ्चन यात्रां सङ्क्षेपेण वर्णयत ।

## व्याकरणानुशीलनम्

## १. उदाहरणानुसारेण पाठे प्रयुक्तानां धातूनां सरणिं निर्मात

**परस्मैपदम्**

| **भू-धातुः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः पुरुषः | भवतु/भवतात् | भवताम् | भवन्तु |
| मध्यमः पुरुषः | भव/भवतात् | भवतम् | भवत |
| उत्तमः पुरुषः | भवानि | भवाव | भवाम |

**आत्मनेपदम्**

| **सेव्-धातुः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः पुरुषः | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यमः पुरुषः | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तमः पुरुषः | सेवै | सेवावहै | सेवमहै |

**पाठे प्रयुक्ताः धातवः** – परस्मैपदम् – अस्, दाण् (यच्छ्)

आत्मनेपदम् – वृत्, लभ्

२. **अधः प्रदत्तानां पाठे प्रयुक्तानां क्रियापदानां धातु-लकार-पुरुष-वचनानि निर्दिशत**

| | |
|---|---|
| यथा– | आसीत् |
| धातुः | अस् |
| लकारः | लङ् |
| पुरुषः | प्रथमः |
| वचनम् | एकवचनम् |
| क्रियापदानि– | आस्म, वर्तते, स्मः, अलभामहि, प्रयच्छतु । |

३. **उदाहरणानुसारेण मञ्जूषायाः धातून् प्रयुज्य लोट्लकारे पूर्णां वाक्यतालिकां रचयत**

| परस्मैपदम् | आत्मनेपदम् |
|---|---|
| १. सा आदिकाव्यं रामायणं पठतु । | १. वायुना वृक्षशाखा कम्पताम् । |
| २. ........ | २. ........ |

**मञ्जूषा**

| |
|---|
| परस्मैपदिनः – पठ्, लिख्, हस्, खाद्, नम्, चल्, गम्, दृश्, नृत् । |
| आत्मनेपदिनः – कम्प्, ईक्ष्, कूर्द्, क्षम्, बाध्, भाष्, भिक्ष्, मुद्, यत् । |

## रचनात्मकः अभ्यासः

१. **मञ्जूषाधारेण रिक्तस्थानं पूरयत**

गीता : ............., सीते ..

सीता : शुभप्रभातम्, कुशली असि ?

गीता : .......... अस्मि । किं पश्यसि ?

सीता : सूर्योदयं पश्यामि ।

गीता : सूर्यः सदा उदेति ?

सीता : .............. ।

गीता : ............... ।

सीता : अधुना समयः कः ?

गीता : .............. ।

सीता : अहो .. नित्कर्मस्य समयो जातः । अहं गच्छामि ।

(शुभप्रभातम्, षड्वादनम्, समीचीनम्, प्रातःकाले, कुशली)

२. **विद्यायाः महत्वम् इति विषये लघुसंवादरचनां कृत्वा शिक्षकं दर्शयत ।**

**शब्दार्थाः**

**(मूल पाठको तल मिलाएर राख्ने ।)**

| | |
|---|---|
| ग्रामान्तरम् | : अन्यं ग्रामम्, अर्को गाउँमा |
| यात्रा | : भ्रमणम्, घुमघाम |
| आनन्दः | : सुखम्, आनन्द |
| दिवसः | : घस्रः, दिन |
| जनाः | : मनुष्याः, मानिसहरू |
| वसयानम् | : लोकयानम्, बस |
| मन्दिरम् | : देवाशाला, मन्दिर |
| गन्तव्यस्थलम् | : प्राप्तव्यस्थानम्, पुग्नुपर्ने ठाउँ |
| जनपदः | : मण्डलम्, जिल्ला |
| पर्वतः | : शैलः, पहाड |
| नीचैः | : अधः, तल |
| आद्यपूजा | : प्रथमपूजनम्, पहिलो पूजा |
| पदयात्रा | : पदविन्यसना यात्रा, खुट्टाले हिँड्ने यात्रा |
| सोपानम् | : निःश्रेणी, खुट्किला |
| वनम् | : विपिनिम्, जङ्गल |
| पक्षी | : खगः, चरा |
| जलकूपी | : जलपात्रम्, पानीको बोतल |
| जनाश्रयः | : जनस्थानम्, चौतारो |
| वायुः | : पवनः, हावा |
| घर्मः | : आतपः, गर्मी |
| विनिमयः | : आदान-प्रदानम्, लिने दिने |

## कोषानुशीलनम्

**अथ अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे नरकवर्गः॥**

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।
तद्भेदास्तपनावीचिमहारौरवरौरवाः ॥
सङ्घातः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः ।
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ॥
विष्टिराजूः कारणा तु यातना तीव्रवेदना ।
पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ॥
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् । ॥
॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे नरकवर्गः॥

**॥ अथ अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे वारिवर्गः॥**

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ॥
रत्नाकरो जलनिधिर्यादःपतिरपाम्पतिः ।
तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।

## पदानुशीलनी

**नरकवर्गः**

**नरकस्य नामानि** - नारकः १, नरकः १, निरयः१, दुर्गतिः २,

**नरकस्य भेदाः** - तपनः १, अवीचिः१, महारौरवः १, रौरवः १, सङ्घातः १, कालसूत्रम् ३,

**नरकवासी** - नारकः १, प्रेतः १,

**नरकनदी** - वैतरणी २,

**नरकावस्था** - निर्ऋतिः २,

**नरके झटिति पतनम्** - विष्टिः २, आजू २

**अतिदुःखम्** - कारणा २, यातना २, तीव्रवेदना २,

**दुःखम्** - पीडा २, बाधा २, व्यथा २, दुःखम् ३,

**आमनस्यम्** - आमनस्यम् ३, प्रसूतिजः३,

**शारीरिकी पीडा** - कष्टम् ३, कृच्छ्म् ३, आभीलम् ३,

**समुद्रस्य नामानि**

(पुं.) समुद्रः, अब्धिः, अकूपारः, पारावार, सरित्पतिः, उदन्वत्, उदधिः, सिन्धुः, सरस्वत्, सागरः, अर्णवः, रत्नाकरः, जलनिधिः, यादःपति, अपाम्पतिः

**क्षीरसमुद्रः** - क्षीरोदः १,

**क्षारसमुद्रः** - लवणोदः १,

**जलस्य नामानि** (अत्र सर्वाणि नामानि नपुंसकलिङ्गे सन्ति)

(नपुं.) आपः (स्त्री), वार्, वारि, सलिलम्, कमलम्, जलम्, पयम्, कीलालम्, अमृतम, जीवनम, भुवनम, वनम, कबन्धम, उदकम, पाथम, पुष्करम, सर्वतोमुखम, अम्भः, अर्णः, तोयम्, पानीयम्, नीरम्, क्षीरम्, अम्बु, शम्बरम्, मेघपुष्पम्, घनरसः १,

**जलोद्भवं वस्तु** - आप्यय ७, अम्मय ७,

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
पयः कीलालममृतं जीवनं भुवनं वनम् ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्

२. **जलस्य सर्वाणि नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण वारि-शब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | ............. | ............. | ............. |
| तृतीया | वारिणा | ............. | ............. |
| चतुर्थी | वारिणे | ............. | ............. |
| पञ्चमी | ............. | ............. | ............. |
| षष्ठी | ............. | ............. | ............. |
| सप्तमी | वारिणि | ............. | ............. |
| सम्बोधनम् | हे वारि / वारे! | ............. | ............. |

४. **"रत्नाकरः" इति कस्य नाम ?**

५. **'विष्टिः' शब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

समुद्रोऽब्धि .... .............. सरित्पतिः।
................................सागरोर्णवः॥

७. **वार्-शब्दस्य रूपावलिं लिखत।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

दुर्गतिः, सिन्धुः, यातना, जीवनम् , वैतरणी

९. **पर्यायान् परस्परं मेलयत**

| समूहः क | समूहः ख |
|---|---|
| तोयम् | अर्णवः |
| सागरः | बाधा |
| नारकः | कृच्छ्रम् |
| पीडा | निरयः |
| कष्टम् | पानीयम् |

दशमः पाठः

# जीवनोत्सर्गिणी राजेश्वरी

राजेश्वरी रणबहादुरस्य ज्येष्ठा राज्ञी आसीत् । सन्तानहीना सत्यपि सा ममतामयी माता आसीत् । सा सुन्दरस्य समुन्नतस्य च नेपालस्य भविष्यं चिन्तयति स्म । राजनीतिकषड्यन्त्रस्य कारणाद् राजेश्वरी बहुवारं दुःखं प्राप्नोत् । एतस्मिन् क्रमे सा निर्वासनाय हेलम्बूस्थाने प्रेषिता आसीत् । अपराधं विना निर्वासनाय प्रेषणं राजेश्वर्याः उपरि अन्याय एव आसीत् । परिवारं, प्रासादं नेपालं च विचिन्त्य सा तत्र एकस्मिन् कुटीरे निवसति स्म ।

एकदा राजेश्वरी शयनाद् उत्थाय नित्यकर्म सम्पादयितुं तत्परा आसीत् । तदैव कुटीराद् बहिः सैनिकानां समूहः समागतः । सैनिकाः कुटीराद् बहिरागत्य कान्तिपुरं प्रति प्रस्थितुं राजेश्वरीं न्यवेदयन् । राजेश्वरी छलस्य आशङ्कया कान्तिपुरं गन्तुं नैच्छत् । सैनिकाः राज्ञः प्रेमसन्देशं श्रावयित्वा राजेश्वर्याः विश्वासम् अजयन् । राजेश्वरी सरलहृदया आसीत् । विश्वासेन सा कान्तिपुरं प्रातिष्ठत ।

अन्यस्मिन् दिने प्रातः राजेश्वरी इन्द्रावत्याः तटे प्राप्ता । तत्र सा राज्ञः रणबहादुरस्य निधनस्य सन्देशम् अशृणोत् । राज्ञः प्रेमसन्देशः कृत्रिम आसीत् इति च सा तत्रैव अबुध्यत । सा अतीव दुःखिता अभवत् । उपायहीना राजेश्वरी वैशाखस्य प्रतप्ते घर्मे कान्तिपुरं प्रति सततम् अचलत् ।

पदयात्रायाः द्वितीये दिवसे राजेश्वरी सा”खुस्थाने वासम् अकरोत् । सा वज्रयोगिनीं प्रपूज्य देव्यै माङ्गलिकदण्डं च आर्पयत् । ततः राजेश्वरी वाग्वत्याः तटे प्राप्ता । सैनिकानां समूहः तस्याः कान्तिपुरप्रासादं प्रति प्रस्थानं न्यरोधयत् । राजेश्वरी सपत्न्याः पुत्रं गीर्वाणं मेलितुम् ऐच्छत्, परं सा तम् अवसरं च न प्राप्तवती ।

आर्यघट्टे रणबहादुरशाहस्य चिता निर्मिता आसीत् । तात्कालिक्याः परम्परायाः अनुसारेण पुरोहितः सतीधर्मं पालयितुं राजेश्वरीं प्रेरितवान् । राजेश्वरी पारिवारिकं स्नेहं नेपालं च स्मृत्वा जीवनदानम् अयाचत । बालको गीर्वाणोऽपि प्रासादे राजेश्वर्याः आगमनस्य प्रतीक्षां कुर्वन् आसीत् । सर्वे अमात्याश्च राजेश्वर्यै प्रासादं गन्तुम् अनुमतिं न प्रादुः ।

आर्यघट्टं परितः सहस्रशो जनानां सन्निधौ राजेश्वरी सतीगमनम् अकरोत् । जनाः राजेश्वर्याः उपरि विहितम् अन्यायं प्रति क्रुद्धाः अभवन् ।

पञ्चविंशत्याः वर्षाणामेव अल्पे वयसि विहितेन प्राणत्यागेन राजेश्वरी अमरत्वं प्राप्नोत् । तस्याः कारुण्यभरितं चरितं लोकजीवने साहित्यिकग्रन्थेषु च मुहुर्मुहुः गीयते । सम्प्रति नेपाले सतीगमनस्य विकृता परम्परा नास्ति । इयं मानवतायाः विरोधी कलङ्कः आसीत् । राजेश्वरी अस्या एव विकृतायाः परम्परायाः कारणाद् यौवनावस्थायामेव प्राणान् अत्यजत् । राजेश्वर्याः एष प्रसङ्गः समाजस्य विकृतिं निरस्तुं नः निरन्तरं प्रेरयति ।

**शब्दार्थाः**

सन्तानहीना - सन्तान नभएकी
षड्यन्त्रम - जालझेल
निर्वासनाय - निर्वासनका लागि
कुटीरे - कुटीमा
न्यवेदयन् - निवेदन गरे
प्रातिष्ठत - प्रस्थान गरिन्
तटे - किनारमा
अबुध्यत - बुझिन्
घर्मे - घाममा
प्रपूज्य - पूजा गरेर
सपत्न्याः - सौताको
न्यरोधयत् - रोक्यो
सतीधर्मम् - सती जाने नियमलाई
अयाचत - मागिन्
अमात्याः - मन्त्रीहरू
सन्निधौ - नजिक, सामुन्ने
मुहुर्मुहुः - बारम्बार
कलङ्कः - बदनामी
निरस्तुम् - हटाउन
नः - हामीलाई

## अभ्यासः

### श्रवणं भाषणं च

१. **कथायाः मौनपठनं कुरुत । ततः शिक्षकस्य वाचनं श्रुत्वा पाठम् अनुवाचयत ।**

२. **अधो लिखितानि पदानि शुद्धमुच्चारयत**

ज्येष्ठा, राज्ञी, कर्माणि, प्रेमसन्देशः, श्रावयित्वा, प्रातिष्ठत, इन्द्रावत्याः, आर्पयत्, प्रासादः, सतीधर्मम्, साहित्यिकग्रन्थेषु, सम्प्रति, प्राणान्, प्रेरयति ।

३. **समस्तानि पदानि श्रावयत**

नाम, सन्तानहीना, प्रेमसन्देशम्, विना, क्रमे, वासम्, माङ्गलिकदण्डम्, सतीगमनम्, गीयते, लोकजीवने, कथा, नः, प्राणत्यागः ।

४. **पाठस्य प्रथमानुच्छेदं पठित्वा एकेन वाक्येन उत्तरं वदत**

(क) राजेश्वर्याः पतिः कः आसीत् ?

(ख) राजेश्वरी किं चिन्तयति स्म ?

(ग) राजेश्वरी कीदृशी माता आसीत् ?

(घ) राजेश्वरी कुत्र प्रातिष्ठत ?

५. **सन्धियुतपदानि सन्धिविच्छेदपदानि च श्रुत्वा सखिभिस्सह विमृशत**

| **सन्धिपदम्** | **सन्धिविच्छेदः** | **सन्धिनाम** |
|---|---|---|
| सत्यपि | सती + अपि | स्वरसन्धिः |
| बहिरागत्य | बहिः + आगत्य | विसर्गसन्धिः |
| न्यवेदयन् | नि + अवेदयन् | स्वरसन्धिः |
| नैच्छत् | न + ऐच्छत् | स्वरसन्धिः |
| तत्रैव | तत्र + एव | स्वरसन्धिः |
| अतीव | अति + इव | स्वरसन्धिः |
| अवसरोऽयम् | अवसरः + अयम् | विसर्ग/स्वरसन्धिः |
| अमात्याश्च | अमात्याः + च | विसर्गसन्धिः |
| नास्ति | न + अस्ति | स्वरसन्धिः |

## पठनम्

### १. अधस्तनगद्यांशं पठित्वा प्रश्नान् उत्तरयत

'मुद्राराक्षस' नाटकस्य कथायां नन्दराजः पर्वतराजस्य मलयकेतोः मारणार्थं विषकन्यां प्रेषयति । यः ताम् आलिङ्ग्य चुम्बति सः मरणं प्राप्नोति स्म । प्रतिदिनं तस्यै आहारत्वेन किञ्चित् किञ्चिद् विषं दीयते स्म । एवं प्रतिदिनं विषस्य सेवनात् सा विषमयी जाता आसीत् । वयम् अन्नं, रोटिकां, फलं, शाकं, क्षीरं च भुञ्ज्महे । एतेषु वस्तुषु कतिचिद् विषयुक्तानि सन्ति । वयं मेलाथियान्, आल्ड्रिन् डैयोल्ड्रिन् इत्यादीनि विषमयानि कृमिनाशकानि वस्तूनि अपि खादामः । अत एव वयं यत् खादामः, यत् पिबामः तत् सर्वं विषांशयुक्तमेव । इदानीं मुखे विषांशरहितस्य कवलस्य स्थापनमेव असाध्यं जातमस्ति । अनिच्छुकाः सन्तोऽपि वयं विषमानवत्वं प्राप्नुवन्तः स्मः ।

**प्रश्नाः**

(क) नन्दराजः किमर्थं विषकन्यां प्रेषयति ?

(ख) वयं कथं विषमानवत्वं प्राप्नुवन्तः स्म ?

(ग) वयं कानि कृमिनाशकानि खादामः ?

(घ) विषांशरहितस्य कलवस्य प्राप्तये किं कर्तव्यम् ?

### २. पाठस्य कथां पठित्वा प्रश्नान् उत्तरयत

(क) राजेश्वरी किमर्थं दुःखं प्राप्नोत् ?

(ख) सैनिकाः राजेश्वरीं किं न्यवेदयन् ?

(ग) इन्द्रावत्याः तटे राजेश्वरी किम् अशृणोत् ?

(घ) राजेश्वरी सा"खुस्थाने किमकरोत् ?

(ङ) राजेश्वरी कं मिलितुम् इच्छति स्म ?

(च) जनाः किमर्थं क्रुद्धाः अभवन् ?

(छ) राजेश्वर्याः चरितं कुत्र गीयते ?

(ज) कीदृशं कार्यं कलङ्कः भवति ?

३. **अधो लिखितानि नामपदानि पठित्वा सत्कार्यम् असत्कार्यं वा भिन्नं कुरुत**

परोपकारः, परपीडनम्, बालविवाहः, वृद्धाश्रमस्य निर्माणम्, विभेदप्रदर्शनम्, अपाङ्गेभ्यः सहयोगः, भूतविद्यायाः आचरणस्य आरोपः, वनविनाशः, वृक्षरोपणम्

| सत्कार्यम् | कलङ्कः |
|---|---|
| .......... | .......... |
| .......... | .......... |

## लेखनम्

१. **कथाया अन्तिमानुच्छेदस्य समस्तपदानि, क्रियापदानि अव्ययपदानि च पृथक्कृत्य लिखत ।**

२. **शब्दं प्रयुज्य वाक्यं रचयत**

राज्ञी, समुन्नतस्य, प्रेषणम्, नैच्छत्, कृत्रिमः, प्रदत्तः, चिता, पुरोहितः, वयसि, गीयते, त्यक्तुम्, निरन्तरम् ।

३. **रिक्तस्थानं पूरयत**

(क) सा ममतामयी ........... आसीत् । (राज्ञी/माता)

(ख) राजेश्वर्याः ........... मार्मिकं वर्तते । (जीवनचरितम्/निर्वासनम्)

(ग) ........... राजेश्वरीं न्यवेदयन् । (जनाः/सैनिकाः)

(घ) गीर्वाणः ........... आसीत् । (बालकः/युवकः)

(ङ) सतीगमनं ........... आसीत् । (विकृतिः/संस्कृतिः)

४. **विपरीतार्थकान् शब्दान् मेलयत**

| 'अ'खण्डः | 'आ'खण्डः |
|---|---|
| दिनम् | सन्तानवती |
| सन्तानहीना | अनुमतिः |
| प्रेषिता | मुहुर्मुहुः |
| निषेधः | रात्रिः |
| एकवारम् | आनीता |
| तप्तः | सम्प्रति |
| पुरा | शीतलः |

## ४. दशभिर्वाक्यैः कथायाः सारांशं लिखत ।

## ५. रेखाङ्कितपदाधारेण प्रश्नार्थकवाक्यानि रचयत

यथा- गोपालः चलचित्रं पश्यति ।

कः चलचित्रं पश्यति ?

(क) राजेश्वरी रणबहादुरस्य ज्येष्ठा राज्ञी आसीत् ।

(ख) गणेशः पार्वत्याः पुत्र आसीत् ।

(ग) शिक्षकस्य पुरतः छात्राः सन्ति ।

(घ) ताः कक्षायाः अन्तः प्रविशन्ति ।

(ङ) वृक्षस्य अधः मुनिः तपति ।

(च) सरोवरस्य मध्ये कमलानि सन्ति ।

## व्याकरणानुशीलनम्

**पदसङ्गतिः**

| | |
|---|---|
| पुंलिङ्गम् | सैनिकः अगच्छत्/गतवान् । |
| स्त्रीलिङ्गम् | राजेश्वरी अगच्छत्/गतवती । एकवचनम्/प्रथमपुरुषः/भूतकालः |
| नपुंसकलिङ्गम् | मित्रम् अगच्छत्/गतवत् । |

वाक्येषु प्रयुक्तानां पदानां मध्ये परस्परं मेलनम् आवश्यकं भवति । पदानां मेलनं विना अर्थबोधो न भवति, अनर्थो वा सम्भवति । व्याकरणिकानाम् अवयवानां मेलनं समन्वयो वा पदसङ्गतिर्भवति ।

लिङ्ग-काल-पुरुष-वचनादीनां परस्परं मेलनाद् वाक्येषु पदसङ्गतिर्भवति ।

पदान्वयः पदमेलनं पदसम्बन्धश्च पदसङ्गतेरेव नामान्तराणि सन्ति । उपरि प्रदर्शितम् उदाहरणम् अनुसृत्य काल-वचन-पुरुषाणां पदसङ्गतेः स्वरूपाणि अवगन्तुं शक्यन्ते ।

## १. वचनपरिवर्तनं कृत्वा रिक्तस्थानं पूरयत

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| (क) | बालकः पठितवान् । | बालकौ पठितवन्तौ । | बालकाः पठितवन्तः । |
| (ख) | सः गतवान् । | ....................। | ....................। |
| (ग) | ....................। | ....................। | छात्राः दृष्टवन्तः । |

| | | | |
|---|---|---|---|
| (घ) | ....................। | युवकौ आगतवन्तौ । | ....................। |
| (ङ) | मुनिः कथितवान् । | ....................। | ....................। |
| (च) | बालिका पठितवती । | बालिके पठितवत्यौ । | बालिकाः पठितवत्यः । |
| (छ) | सा गतवती । | ....................। | ....................। |
| (ज) | ....................। | कन्ये दृष्टवत्यौ । | ....................। |
| (झ) | ....................। | .................... । | युवत्यः आगतवत्यः । |
| (ञ) | शिक्षिका कथितवती । | .......................। | .......................। |
| (ट) | यानं गतवत् । | याने गतवती । | यानानि गतवन्ति । |
| (ठ) | चक्रं भ्रमितवत् । | ....................। | .......................। |
| (ड) | ......................। | ....................। | पत्राणि पतितवन्ति । |
| (ढ) | ......................। | मित्रे पठितवती । | ....................। |
| (ण) | .....................। | ....................। | पुष्पाणि विकसितवन्ति । |

२. **लिङ्गपरिवर्तनं कुरुत**

| | | |
|---|---|---|
| (क) | छात्रः उक्तवान् । | (स्त्रीलिङ्गे) |
| (ख) | ताः गतवत्यः । | (नपुंसकलिङ्गे) |
| (ग) | महिले दृष्टवत्यौ । | (पुंलिङ्गे) |
| (घ) | एत्त् भ्रमितवत् । | (पुंलिङ्गे) |
| (ङ) | बालकाः पृष्टवन्तः । | (स्त्रीलिङ्गे) |

## अनुप्रयोग

१. **अधोलिखिताः पदावलीः आधृत्य सङ्क्षिप्तां कथां लिखत**

नागार्जुनः रसायनशास्त्रज्ञः प्रसिद्धः चिकित्सकश्च

नागार्जुनाय एकस्य सहायकस्य आवश्यकता

'योग्यानां युवकानाम् आवश्यकता' इति विज्ञापनम् प्रकाशितम्

साक्षात्काराय अनेके युवकाः समुपलब्धाः

तेषु द्वौ उत्कृष्टौ युवकौ

युवकौ विद्याभ्यासे समानौ

एकः सेवाभावनायुक्तः, अपरः कार्ये एव समर्पितः

नागार्जुनेन सेवाभावनायुक्तः युवकः सहायकरूपेण नियुक्तः

'सेवाभावनां विना चिकित्सकः न भवति' इति मतं स्थापितम्

२. **आत्मभिः ज्ञातां सङ्क्षिप्ताम् ऐतिहासिकीं कथां कक्षायां श्रावयत ।**

३. **धूमपानस्य दुर्व्यसनं निराकर्तुं विद्यार्थिनः किं कर्तुं शक्नुवन्ति ? सखिनां मध्ये विमृश्य कार्यसूचीं निर्मात ।**

## कोषानुशीलनम्

**वारिवर्गः**

भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ।
पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।
कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥
पारावारे परार्वाची तीरे पात्रं तदन्तरम् ।
द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥
तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् ।
निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ॥
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः ।
आतरस्तरपण्यं स्याद्द्रोणी काष्ठाम्बुवाहिनी ॥
सांयात्रिकः पोतवणिक्कर्णधारस्तु नाविकः ।
नियामकाः पोतवाहाः कूपको गुणवृक्षकः ॥
नौकादण्डः क्षेपणी स्यादरित्रं केनिपातकः ।

अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रं तु सेचनम् ॥
क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु ।
त्रिष्वागाधात्प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ॥
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ।
अगाधमतलस्पर्शे कैवर्ते दाशधीवरौ ॥

## पदानुशीलनी

**जलतरङ्गः** - भङ्गः १, ऊर्मिः ४, वीचि ४,
**विशालतरङ्गः** - उल्लोलः १, कल्लोलः १,
**अम्भसो भ्रमः** - आवर्तः१,
**जलबिन्दोर्नामानि** - पृषन्तिः १, बिन्दुः१, पृषतः १, विप्रुट् २,
**जलाना वक्रता** - वक्र ५, पुटभेदः १,
**जलनिर्गमः** - भ्रमः १, जलनिर्गमः १,
**तीरस्य नामानि** - कूलम् ३, रोधः १, तीरम् ३, प्रतीरम् ३, तट ७,
**गङ्गायाः पारम्** - पारम् ३,
**गङ्गायाः अवारम्** - अवारम् ३,
**अवारपारयोर्मध्यस्थानम्** - पात्रम् ३,
**द्वीपस्य नाम्नी** - द्वीप ५, अन्तरीप ५,
**तोयोत्थितं स्थानम्** - पुलिनम् ३,
**सिकतामयम्** - सैकतम ३, सिकतामयम् ३,
**पङ्कस्य नामानि** - निषद्वरः १, जम्बालः १, पङ्क ५, शादः १, कर्दमः १,
**जलनिर्गमनम्ः** - जलोच्छ्वासः १, परीवाहः १,
**कूपकस्य नाम्नी** - कूपकः १, विदारकः १,
**नौतार्य नदीस्थानस्य नाम** - नाव्य ७,
**तरणेर्नामानि** - नौः २, तरणिः १, तरिः २,
**सामान्या तरणिः** - उडुपम् ३, प्लवः १, कोलः १
**जलस्य मूलम्** - स्रोतः ३,
**नद्याः सन्तारणाय प्रदत्तं द्रव्यम्** - आतरः १, तरपण्यम् ३,
**काष्ठाम्बुवाहि** - द्रोणी २,

**पोतवणिक्** - सांयात्रिकः १, पोतवणिक् १,

**नाविकः** - कर्णधारः १, नाविकः १,

**नियन्ता** - नियामकः १, पोतवाहः१,

**मध्यभागे स्थितं कीलकम्** - कूपकः १, गुणवृक्षकः १,

**नौकादण्डः** - नौकादण्डः १, क्षेपणी २,

**चालनकाष्ठम्** - अरित्रम् ३, केनिपातकः १,

**काष्ठकुद्दालम्** - अभ्रिः २, काष्ठकुद्दालम् १,

**जलनिष्काशनभाण्डम्** - सेकपात्रम् ३, सेचनम् ३,

**उडुपस्यार्धभाग** - अर्धनावम् ३,

**पारङ्गतं वस्तु** - अतिनुः ७,

**स्वच्छस्य नाम्नी** - प्रसन्नः ७, अच्छः ७,

**कलुषस्य नामानि** - कलुषः ७, अनच्छः ७, आविलः ७,

**गभीरस्य नामानि** - निम्नः ७, गभीरः ७, गम्भीरः ७,

**गभीरविपर्ययः** - उत्तानः ७,

**अतिगभीरम्** - अगाधः ७, अतलस्पर्शः ७,

**धीवरस्य नामानि** - कैवर्तः १, दाशः १, धीवरः १,

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः ।
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ॥

२. **तीरस्य पञ्च नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण नौशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नौः | ............ | ............ |
| द्वितीया | ............ | ............ | नावः |

| | | | |
|---|---|---|---|
| तृतीया | नावा | ............ | ............ |
| चतुर्थी | ............ | नौभ्याम् | ............ |
| पञ्चमी | ............ | ............ | नौभ्यः |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | नौषु |
| सम्बोधनम् | हे नौः! | ............ | ............ |

४. **"कर्दमः"इति कस्य नाम ?**

५. **वणिज्शब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

उडुपं तु ............. म्बुसरणं संवतः।
आतर .....................काष्ठाम्बुवाहिनी॥

७. **गोशब्दस्य रूपावलिं लिखत।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

धीवरः, उडुपः, गभीरम् , पुलिनम्, पारम्

९. **पर्यायान् परस्परं मेलयत**

| **समूहः क** | **समूहः ख** |
|---|---|
| भङ्गः | कूलम् |
| बिन्दुः | धीवरः |
| तटम् | ऊर्मिः |
| शादः | पृषतः |
| दासः | पङ्कः |

# काव्यात्मकपद्यानि

संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ॥१॥
न मातरि न दारेषु न सोदर्ये न चात्मजे ।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥२॥
वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥३॥
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि हर्म्येषु नोच्छिद्यन्ते कदाचन ॥४॥

**सरलार्थः**

१. जगद् विषस्य वृक्ष इव वर्तते । अत्र द्वे एव रसभरिते फले स्तः । तयोः एकः काव्यस्य सुधामयः रसः, अपरः सज्जनैः सह सङ्गतिः । एत्त् फलद्वयं जगतः विषम् अपहरति ।

२. जनानां स्वाभाविके सुहृदि यादृशः दृढः विश्वासः भवति तादृशः विश्वासः जनन्यां, पत्न्यां, सहोदरभ्रातरि पुत्रे च न भवति । सन्मित्रे विहितः विश्वासः सर्वोपरि वर्तते ।

३. यदा वह्निः वनानि यदति तदा मारुतः तस्य वनदाहकर्मणि सखा भवति । मारुतः वनानि दहितुं अग्नेः सहयोगं करोति । परं स एव मारुतः दीपनाशाय अपि कारणं भवति । दीपस्य कृशत्वात् मरुतः सहयोगस्य वैपरीत्येन दीपमेव नाशयति, अतः अवनतेः अवस्थायां कोऽपि सुमनसा सहाय्यं न करोति, अपितु विनाशाय एव कारणं भवति ।

४. सज्जनानां गृहेषु वस्तुम् आसनस्य, विश्रान्त्यै भूमेः, पातुं जलस्य मधुरभाषणस्य च कदापि अभावः न भवति । सज्जनाः एतानि वस्तूनि समर्प्य सदैव मधुरगिरा अतिथीनां सेवां कुर्वन्ति ।

| | | |
|---|---|---|
| संसरविषवृक्षस्य | : | संसाररूपी विष वृक्षका |
| सङ्गमः | : | मेल |
| मारुतः | : | हावा |
| कृशे | : | कमजोर |
| सूनृता | : | मधुर |
| हर्म्येषु | : | घरमा |

## अभ्यासः

### श्रवणं भाषणं च

१. **शिक्षकात् पाठस्य वाचनं श्रुत्वा गतियतिसंयोजनेन अनुवाचयत ।**

२. **अधोलिखितान् शब्दान् शुद्धमुच्चरयत**

संसारविषवृक्षस्य, रसवत्फले, काव्यामृतरसास्वादः, सङ्गमः, सौदर्ये, यादृङ्मित्रे, स्वभावजे, सौहृदम्, भूमिरुदकम्, वाक्चतुर्थी, सतामेतानि, हर्म्येषु, नोच्छिद्यन्ते ।

३. **शब्दार्थान् वदत**

सुजनैः, मातरि, चात्मजे, पुंसाम्, वह्नेः, कस्यासिति, तृणानि, सूनृता, कदाचन ।

४. **श्लोकं पठित्वा एकस्मिन् वाक्ये उत्तरं वदत**

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

(क) कषां कालः काव्यशास्त्रविनोदेन गच्छति ?

(ख) मुर्खणां समयं कथं गच्छति ?

(ग) व्यसनेन इति शब्दस्य को..र्थः ?

(घ) श्लोके क्रियापदं किम् ?

## पठनम्

१. **अधोलिखितौ श्लोकौ पठित्वा प्रश्नान् उत्तरयत**

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥
मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥

(क) पुराणस्य लक्षणानि कति ?

(ख) पुराणस्य पञ्चलक्षणम् किम् ?

(ग) पुराणानि कति ?

(घ) पुराणनामानि कानि ?

२. **अधस्तने अनुच्छेदे पठित्वा प्रश्नोत्तराणि लिखत**

वेदाः प्रभुसम्मितवाक्य सन्ति । अतस्तेषु आख्यानानामुपाख्यानानां वा प्रयोगो नास्ति । परं पुराणेषु तेषां प्रयोगो विहितः । पुराणकथनं वेदकथनमूलमेवास्ति । यथा ऋग्वेदे इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् इत्यादि रूपेण वर्णिता वामनावतारकथा वामनभागवतादिपुराणेषु विस्तरेण वर्णिता अस्ति । केनोपनिषदि ब्रह्मविद्याया हैमवत्या उमारूपेण प्राकट्यं वर्णितमस्ति । तदाश्रित्य श्रीमद्भागवतादिषु भगवत्याः पार्वत्या उमारूपेण जन्मग्रहणकथा उल्लिखिता दृश्यते । एवमेव अथर्ववेदे महाजस्य पृथोः पृथ्वीदोहनं संक्षेपेण वर्णितमस्ति । परं श्रीमद्भागवते तदेव सविस्तरं वर्णितमस्ति ।

पुराणानि अष्टादश एव, तानि यथा मत्स्य-मार्कण्डेय-भविष्य-भागवत-ब्रह्माण्ड-ब्रह्मवैवर्त-ब्राह्म-वामन-वराह-विष्णु-वायु-अग्नि-नारद-पद्म-लिङ्ग-गरुड-कूर्माख्याणि ।

(क) के प्रभुसम्मित वाक्यरूपाः सन्ति ?

(ख) पुराणेषु केषां प्रयोगो विहितो..स्ति ?

(ग) वामनावतारकथा केषु पराणेषु वर्णिता अस्ति ?

(घ) केनोपनिषदि कस्याः प्राकट्यं वर्णितमस्ति ?

३. **अधोलिखितान् श्लोकान् पठित्वा स्वमतं वर्णयत**

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापायः परपीडनम् ॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखः ।
सुखं दुःखं मनुष्याणां चक्रवत् परिवर्तते ॥
सर्वलक्षणहीनोऽपि यः सदाचारवान् भवेत् ।
श्रद्धधानोऽनसूयश्च शतं वर्षाणि जीवति ॥

## लेखनम्

१. **शब्दान् संशोध्य अभ्यासपुस्तिकायां लिखत**

वीषवृक्षः, रसाश्वादः, तादृसः, पुसाम्, षखा, त्रिणानि, भुमिः, यतानि, उत्छिद्यन्ते ।

२. **सङ्क्षेपेण उत्तरयत**

(क) संसारविषवृक्षे के फले स्तः ?

(ख) कस्मिन् विहितः विश्वासः सर्वोपरि भवति ?

(ग) केषु सुहृद्तुल्यः विश्वासः न भवति ?

(घ) मारुतः कस्मै सहयोगं करोति ?

(ङ) सज्जनानां गृहे केषां अभावो न भवति ?

३. **परस्परं मेलयत**

| | |
|---|---|
| वनानि दहतो वह्नेः | वाक्चतुर्थी च सूनृता । |
| स एव दीपनाशाय | नोच्छिद्यन्ते कदाचन ॥ |
| तृणानि भूमिरुदकम् | सखा भवति मारुतः । |
| सतामेतानि हर्म्येषु | कृशे कस्यास्ति सौहृदम् ॥ |

## ४. रिक्तस्थानं पूरयत

संसारविषवृक्षस्य .......... एव .......... ।
.......... सङ्गमः सुजनैः .......... ॥
न मातरि .......... दारेषु न .......... न चात्मजे ।
विश्वासस्तादृशः .......... यादृङ्मित्रे .......... ॥

## ५. विपरीतार्थकानि पदानि परस्परं मेलयत

| अखण्डः | आखण्डः |
|---|---|
| विषः | वनेषु |
| विश्वासः | दुर्जनानाम् |
| दीपनाशाय | अमृतम् |
| सज्जनानाम् | अविश्वासः |
| हर्म्येषु | अन्धकारनाशाय |

## ६. सरलार्थं लिखत

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥

## ७. पाठस्थश्लोकान् शुद्धतया विलिख्य शिक्षकं दर्शयत ।

### अनुप्रयोग

## १. गीतं पठत सरलार्थं लिखत च

मा कुरु दर्पं मा कुरु गर्वम्, मा भव मानी मानय सर्वम् ।
मा भज दैन्यं मा भज शोकम्, उदितमना भव मोदय लोकम् ॥
मा वद मिथ्या मा वद व्यर्थम्, न चल कुमार्गे न कुरु अनर्थम् ।
पाहि अनाथं पालय दीनम्, लालय जननी(जनक(विहीनम् ॥ (वासुदेवशास्त्री)

## २. आत्मभिः पठितस्य काव्यस्य त्रीन् श्लोकान् लिखत ।

## व्याकरणबोधः

**ऋकारान्तपुंलिङ्गीशब्दः पितृशब्दस्य रूपाणि**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितृन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितृणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः ! | हे पितरौ ! | हे पितरः ! |

**कर्तृशब्दस्य रूपाणि**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | कर्ता | कर्तारौ | कर्तारः |
| द्वितीया | कर्तारम् | कर्तारौ | कर्तृन् |
| तृतीया | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| चतुर्थी | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| षष्ठी | कर्तुः | कर्त्रोः | कर्तृणाम् |
| सप्तमी | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बोधनम् | हे कर्तः ! | हे कर्तारौ ! | हे कर्तारः ! |

### १. रिक्तस्थानं पूरयित्वा रूपावलिं लिखत

| **शब्दाः** | **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| नेतृ | प्रथमा | ....... | ....... | ....... |
| श्रोतृ | द्वितीया | ....... | ....... | ....... |
| वक्तृ | तृतीया | ....... | ....... | ....... |

| | | | | |
|---|---|---|---|---|
| विधातृ | चतुर्थी | ....... | ....... | ....... |
| गन्तृ | पञ्चमी | ....... | ....... | ....... |
| क्रेतृ | षष्ठी | ....... | ....... | ....... |
| भर्तृ | सप्तमी | ....... | ....... | ....... |
| दातृ | सम्बोधने | ....... | ....... | ....... |

## २. रूपावलिं लिखत

**श्रोतृ-शब्दस्य रुपावलि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | श्रोता | ............ | ............ |
| द्वितीया | ............ | ............ | ............ |
| तृतीया | ............ | ............ | ............ |
| चतुर्थी | ............ | ............ | ............ |
| पञ्चमी | ............ | ............ | ............ |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | ............ |
| सम्बोधनम् | ............ | ............ | ............ |

**दातृ-शब्दस्य रुपावलि**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ............ | ............ | ............ |
| द्वितीया | ............ | ............ | ............ |
| तृतीया | ............ | ............ | ............ |
| चतुर्थी | ............ | ............ | ............ |
| पञ्चमी | ............ | ............ | ............ |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | ............ |
| सम्बोधनम | ............ | ............ | ............ |

## कोषानुशीलनम्

**वारिवर्गः**

आनायः पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ।
मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम् ॥
पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।
विसारः शकुली चाथ गडकः शकुलार्भकः ॥
सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ।
नलमीनश्चिलिचिमः प्रोष्ठी तु शफरीद्वयोः ॥
क्षुद्राण्डमत्स्यसङ्घातः पोताधानमथो झषाः ।
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥
तिमिङ्गलादयश्चाथ यादांसि जलजन्तवः ।
तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ॥
स्यात्कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।
ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता ॥
गण्डूपदः किञ्चुलको निहाका गोधिका समे ।
रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥
मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात्कम्बुरस्त्रियौ ।
क्षुद्रशङ्खाः शङ्खनखाः शम्बूका जलशुक्तयः ॥
भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।

## पदानुशीलनी

**जालस्य नाम्नी** - आनायः १, जालम् ३,
**जालविशेषस्य नामानि** - शणसूत्रम् ३, पवित्रकम् ३,
**मत्स्याधान्याः नामानि** - मत्स्याधानी २, कुवेणी २,
**मत्स्यवेधनस्य नाम्नी** - बडिशम् ३, मत्स्यवेधनम् ३,
**मत्स्यस्य नामानि** - पृथुरोमा १, झषः १, मत्स्यः १, मीनः १, वैसारिणः १, अण्डजः १, विसारः १, शकुली १,

**मत्स्यविशेषस्य नाम्नी** - गडकः १, शकुलार्भकः १,

**सहस्रदंष्ट्रस्य मत्स्यस्य नाम्नी** - सहस्रदंष्ट्रः १, पाठीनः१,

**मत्स्यविशेषौ** - उलूपी १, शिशुकः १,

**पङ्केऽवस्थितो मत्स्यः** - नलमीनः१, चिलिचिमः१,

**मत्स्यप्रकारौ** - प्रोष्ठी ४, शफरी ४,

**लघुमत्स्यानां समूहः** - पोताधानम् ३,

**मत्स्यजातीनां नामानि** - झषः १, रोहितः १, मद्गुरः १, शालः १, राजीवः१, शकुलः १, तिमिः१, तिमिङ्गिलः १,

**जलजन्तोर्नाम्नी** - यादः ३, जलजन्तुः १,

**जलजन्तुविशेषाः** - शिशुमारः १, उद्रः १, शङ्कः १, मकरः १,

**कर्कटकस्य नाम्नी** - कुलीरः१, कर्कटकः १,

**कूर्मस्य नामानि** - कूर्मः १, कमठः १, कच्छपः १,

**ग्राहस्य नाम्नी** - ग्राहः१, अवहारः१,

**ग्राहविशेषौ** - नक्रः १, कुम्भीरः १,

**गण्डुपदस्य नामानि** - महीलता २, गण्डूपदः १, किञ्चुलकः १, निहाका २, गोधिका २,

**जलौकायाः नामानि** - रक्तपा २, जलौका २, जलौकसः १ (स्त्री ३),

**मुक्तायुक्ता शुक्तीः** - मुक्तास्फोटः१, शुक्तिः २,

**शङ्खस्य नाम्नी** - शङ्ख ५, कम्बु ५,

**क्षुद्रशङ्खस्य नाम्नी** - क्षुद्रशङ्खः१, शङ्खनखः १,

**जलशुक्तेः नाम्नी** - शम्बूकः १, जलशुक्तिः २

**भेकस्य नामानि** - भेकः १, मण्डूकः १, वर्षाभूः१, शालूरः १, प्लवः १, दर्दुरः १,

## अभ्यासः

**१. अधस्तनं पद्यं शुद्धमुच्चारयत ।**

रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥
तिमिङ्गलादयश्चाथ यादांसि जलजन्तवः ।

**२. मत्स्यस्य सप्त नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण जन्तुशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ............. | ............. | जन्तवः |
| द्वितीया | ............. | ............. | ............. |
| तृतीया | जन्तुना | ............. | ............. |
| चतुर्थी | ............. | जन्तुभ्याम् | ............. |
| पञ्चमी | ............. | ............. | जन्तुभ्यः |
| षष्ठी | जन्तोः | ............. | ............. |
| सप्तमी | ............. | ............. | जन्तुषु |
| सम्बोधनम् | हे जन्तो ! | ............. | ............. |

४. **"कुलीरः"इति कस्य नाम ?**

५. **कम्बुशब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

क्षुद्रशङ्खाः ............. जलशुक्तयः ।
भेके ...............................दर्दुराः ॥

७. **वर्षाभूशब्दस्य रूपावलिं लिखत ।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

भेकः, शङ्खः,कच्छपः, मकरः, जालम्

९. **पर्यायान् परस्परं मेलयत**

| समूहः क | समूहः ख |
|---|---|
| जालम् | कमठः |
| मत्स्याधानी | मीनः |
| झषः | कुवेणी |
| जलजन्तुः | आनायः |
| कूर्मः | यादः |

# दृढप्रतिज्ञा

"पुत्र ! विद्यालयाय कालोऽभवत् । भोजनार्थं झटिति भोजनकक्षे आयाहि ।" मातुर्निदेशं श्रुत्वा मूलद्वाराद् बहिः निर्मनस्को स्थितो भवदेवः सचेतोऽभवत् । "पुत्र ! शीघ्रं कुरु; आयाहि ।" भवदेवः पुनर्निर्मन्त्रणेनापि नागच्छत् । माता तम् आनेतुं स्वयं बहिरगच्छत् । भवदेवः कपोलयोः हस्तौ संस्थाप्य अधोमुखः स्थितः आसीत् ।

"किमभवत् पुत्र, आगच्छ; भोजनं कुरु । नो चेत् विद्यालयाय विलम्बो भवति ।" सा पुत्रस्य हस्तं गृहीत्वा तम् उदस्थापयत् ।

"मातः ! दूरस्थं हिमालयं पश्यसि ? अद्य तु तदुपरि मेघमालापि दृश्यते । कियत् सुन्दरं दृश्यम् !"

"मया बहुबारं तद् दृश्यमवलोकितम् ।" माता प्रत्युदतरत् ।

"चित्रलेखनाय एतावन्तं सुन्दरं हिमालयम् इतः पूर्वं अहं दृष्टवान् न आसम् ।" स भोजनाय तृणपीठिकायाम् अवसत् । हेमा पुत्राय स्थालिकायां भोजनं अददात् ।

भवदेवः सुदूरपश्चिमस्य पर्वतीयग्रामे मात्रा हेमया सह वसति स्म । गणतन्त्रप्राप्तये जनक्रान्तिं कुर्वन् तस्य पिता आहतोऽभवत् । धनगढीचिकित्सालये उपचारोऽभवत् । उपचारे बहूनां धनानां व्ययोऽभवत् । उपचारक्रमे क्षेत्राणामपि विक्रयमभवत् किन्तु चिकित्सा सफला नैवाभवत् । वर्षत्रयानन्तरं स वीरगतिम् अलभत । मृते भर्तरि निर्धनाया हेमायाः जीवने अनेकानि दुःखानि आपतन् । पितृहीनः भवदेवः तदानीं पञ्चहायनः बालः आसीत् । सोऽपि मात्रा सहैव दुःखभागी अभवत् । धनार्जनस्य स्रोतः किमपि नासीत् । हेमा प्रतिवेश्मकस्य क्षेत्रेषु कृषिकार्यं विधाय भवदेवस्य पालनपोषणादि अकरोत् । सः परेषां कार्यं विधाय यत्केनापि उपायेन पुत्रं सर्वकारीयविद्यालये अपाठयत् ।

भवदेवः प्रथमच्छात्ररूपेण सप्तमकक्षायां प्राप्त आसीत् । विद्यालये अधीतपाठानां गृहे पुनः अध्ययनम्, दत्तस्य गृहकार्यस्य सम्पादनं मातुः आज्ञां विनैव स स्वयमेव करोति स्म ।

तल्लिखितानाम् अक्षराणां सौन्दर्यं प्रशंसनीयम् आसीत् । चित्रकलायां तस्य महती रुचिः अवर्तत । तेन निर्मितं स्वपितुः चित्रं गृहस्य भित्तौ स्थापितम् अवर्तत । तद् दृष्ट्वा सर्वेऽपि प्रेक्षकाः भवदेवस्य चित्रकारितां प्रशसन्ति स्म । चित्रलेखनप्रतियोगितायां बहुबारं स प्रथमो भूत्वा पुरस्कृतः अभवत् । विद्यालये गुरुभिरपि स भूयान् अभिनन्दितः आसीत् । तेन च भवदेवोऽपि प्रसन्नः आसीत् । सर्वत्र प्रसंशितम् अध्ययने रममाणं स्वपुत्रं गतमासात् हठात् परिवर्तितं विलोक्य हेमा दुःखिता आसीत् ।

विद्यालयगमने विलम्बो माभूत् इतिविषये सचेतो भवदेवः इदानीं भोजनेऽपि रुचिं नैव प्रादर्शयत् । "शीघ्रं खाद । विद्यालयवस्त्राणि अपि परिधातव्यानि ।"

मातः ! अद्य हिमालयस्य दृश्यं चित्रलेखनाय अत्युपयुक्तं मन्ये । हिमकूटोपरि श्वेततरा मेघमालापि शोभिता वर्तते ।" हेमा पुत्रस्य एकालापं मौनीभूय अशृणोत् । "अद्याहं विद्यालयं न गच्छामि । गृहम् उपस्थाय चित्रलेखनं करोमि ।" भवदेवः गृहाद् बहिः हस्तक्षालनाय अगच्छत् ।

"विद्यालयस्तु त्वया गन्तव्यः एव । नो चेत् अहं त्वयि कुप्यामि ।" सापि भोजनादिकार्यं समाप्य प्रतिवेश्मकाणां गृहेषु श्रमं कर्तुं गन्तुकामा अभवत् । प्राङ्गणे भवदेवः हिमालयस्य चित्रलेखनं कुर्वन् अदृश्यत । दूरस्थं हिमकूटं तदन्तिकस्थं च पर्यावरणं विलोक्य स चित्राङ्कने मनोयोगेन संलग्नः आसीत् । पुत्रस्य चित्रकारितायाम् एधमानां रुचिं विलोक्य सा वात्सल्यविह्वला जाता । अतः श्रमाय गमनोद्यतापि पुत्रस्य निकटे एव अवसत् ।

"मातः ! अत्र पश्य; मत्कृतं चित्रं कीदृशमभवत् ? ब्रूहि ।" सा क्षणं मौनमेव अवसत् ।

"किमभवत् ? कीदृशमस्ति चित्रम् ?" मातुः प्रतिक्रियायाम् अप्राप्तायां भवदेवः पुनः अपृच्छत् ।

"पुत्र ! तव चित्रकलाया अहमपि प्रशंसिका अस्मि । एतावत् सुन्दरं त्वत्कृतं चित्रं विलोक्य अहं हर्षिता अभवम् । साधु पुत्र साधु ।" सा पुत्रस्य शिरसि स्वहस्तं व्यनसत् ।

"किन्तु रङ्गभरणं कृतं नास्ति अत्र । तद्विना चित्रं कथं सुन्दरं भवेत् मातः ?"

"तर्हि रङ्गभरणं कुरु । तत्र का समस्या ?"

भवदेवः मौनताम् आकलयत् । हेमापि निर्मनस्का इव विचारमग्ना अभवत् । क्षणान्तरं भवदेवः स्वनिर्मितं हिमालयाङ्कितं चित्रं विलोक्य अवदत्, "मम पार्श्वे रङ्गलेखन्यः अभविष्यन् तर्हि चित्रमिदं इतोऽपि सुन्दरम् अभविष्यत् ।"

“गते मासे मया क्रीत्वा तुभ्यं दत्ताः रङ्गलेखन्यः कुत्र सन्ति ? किंवा समाप्ताः ?” माता साश्चर्यम् अपृच्छत् ।

“ता रङ्गलेखनीः प्रतापः ह्यः एव पद्भ्यां मर्दयित्वा व्यनाशयत् ।” भवदेवस्य आकृतौ वैवर्ण्यं चक्षुषोश्च दैन्यं दृश्यते । हेमा पुत्रस्य पीडया स्वामपि व्यथिताम् अन्वभवत् । ईषत्क्रुद्धा विस्मिता च सा दीर्घस्वरेण अवदत्, “किम् !”

“एवं मातः ! अहं चित्रलेखनं न कुर्याम् इति प्रतापः इच्छति । परह्यः मया निर्मितं कपोतयुग्मस्य चित्रं स शतशः खण्डेषु खण्डितवान् ।” भवदेवः नेत्रयोः अश्रुबिन्दून् रोद्धुं असमर्थोऽभवत् ।

पुत्र ! मा रुदिहि । भवतु, अद्य त्वं गृहे एव तिष्ठ । त्वं मनोयोगेन अन्यान्यपि यथेच्छं चित्राणि लिखत । मम पुत्रः चित्रलेखनं कदापि न त्यक्ष्यति । तव पिता त्वया कृतं चित्रं विलोक्य कियत्प्रसन्नः आसीत् । स्मरसि किम् ? त्वम् एकदा सफलः चित्रकारः भविष्यसि इति स मां त्वां च प्रायः कथयति स्म ।”

भवदेवः वर्णलेखनीं हस्तात् अपरहस्ते गृहीत्वा मातुः मुखम् अपश्यत् । पितुः वचनं स्मृत्वा तस्य मुखे किञ्चित् ज्योतिः प्रकाशितमभवत् । “भवदेव, विलम्बोऽभवत् । भोजनालये स्थाल्याम् अल्पाहारः स्थापितः अस्ति । यथाकालं तत्र गत्वा खाद । अहं प्रतिवेश्मकानां कार्याणि समाप्य सायम् आगमिष्यामि । आगत्य च त्वत्कृतचित्राणि द्रक्ष्यामि ।” भवदेवः स्वीकृतिं सूचयितुं शिरोऽकम्पयत् ।

खाद्यान्नव्यापारिणः पुत्रः प्रतापः तस्मिन् एव शैक्षिकसत्रे सप्तमकक्षायां प्रवेशं गृहीत्वा आगतो नवीनच्छात्रः आसीत् । तस्य अहङ्कारिस्वभावेन कक्षायाः अन्येऽपि छात्राः पीडिताः आसन् । चित्रलेखने सोऽपि निपुणः आसीत् । विद्यालयस्य वार्षिकोत्सवसन्दर्भे चित्रकलाप्रतियोगिता अभवत् । तस्यां प्रतियोगितायां भवदेवः प्रथमोऽभवत्; आत्मानं प्रथमं मन्वानः प्रतापस्तु द्वितीयः । अतः स भवदेवस्य विरुद्धोऽभवत् । सोऽकारणं भवदेवं पीडयितुम् आरब्धवान् ।

प्रतापः केषाञ्चन छात्राणां साहाय्येन अन्यान् पिपठीषून् छात्रान् हेलयति स्म । चित्रकलायाः प्रतिस्पर्धी भवदेवः विशेषतः तस्य कोपभाजनोऽभवत् । भवदेवस्य पुस्तकानां गुप्तीकरणम्, उत्तरपुस्तिकानां छिन्नीकरणम्, दुर्वचसा दुःखीकरणं च प्रतापस्य दैनन्दिनं कृत्यम् अभवत् । हृष्टमनसा विद्यालयं जिगमिषुः भवदेवः शनैः शनैः पठने मन्दोऽभवत् । प्रथमद्वितीयत्रैमासिकपरीक्षायाः च परिणामोऽसन्तोषकरः दृष्टः । पुरा तस्य आकृतौ वर्तमाना

उत्साहरेखा क्रमशः विलीना अभवत् । विद्यालयं प्रति तस्मिन् अरुचिः एधमाना अभवत् । एत्त् सर्वम् अज्ञातवती हेमा पुत्रस्य परिवर्तितं व्यवहारं विलोक्य चकिता आसीत् ।

घटना परह्यस्तनीया । विद्यालयस्य अल्पाहारसमये कक्षायाम् एव उषित्वा भवदेवः चित्रलेखनं कुर्वन् आसीत् । द्वित्रैः मित्रैः सह हठात् कक्षायां प्रविश्य प्रतापः भवदेवस्य चित्राङ्कितं कर्गजं खण्डितवान् । "किमर्थं खण्डितवान् मया महता प्रयासेन निर्मितं चित्रम् ?" उद्विग्नं तं विलोक्य हसन् स अकथयत्, "न जानासि, मनोरञ्जनाय । पश्य इतोऽपि खण्डयामि ।" स खण्डितानि अपि चित्राङ्कितकर्गजानि भूमितः उत्थाय पुनः अखण्डयत् ।

"पश्य, तव दुष्कृत्यविषये अहं गुरून् श्रावयामि । त्वां दण्डयामि ।" भवदेवस्य कथनेन क्रुद्धः स तस्य हस्तात् लेखनीः बलाद् गृहीत्वा अभेदयत् । तद् दृष्ट्वा भवदेवः अरोदीत् । सः कार्यालयं गत्वा कक्षाशिक्षकं प्रति सर्वं वृत्तान्तम् अकथयत् । अन्यकार्यनिरतः शिक्षकः तदानीम् एव प्रतापं दण्डयितुं कालाभावात् नाशक्नोत् । अपरेद्युः शिक्षकः प्रतापस्य उपद्रवविषयं विस्मृतवान् । परपीडनकर्म विधाय अपि अदण्डितस्य प्रतापस्य उपद्रवः भवदेवोपरि प्रतिदिनं वर्धमानोऽभवत् ।

हेमा सन्ध्याकाले गृहं प्रत्यागच्छत् । "पुत्र" । मातुः आह्वानं श्रुत्वा भवदेवः बहिरागच्छत् । स मातृहस्तं गृहीत्वा तां शयनप्रकोष्ठम् अनयत् । खट्वायां मातरं संस्थाप्य दिवाकाले कृतानि चित्राणि अदर्शयत् । त्रीणि चित्राणि आसन् । प्रथमं प्रातः निर्मितं हिमालयस्य चित्रम्, द्वितीयं कण्टकमध्ये पुष्पितस्य पुष्पस्य चित्रम्, तृतीयं च विद्यालयेऽपहेलितस्य कस्यचन विद्यार्थिनः चित्रम् । तृतीयं चित्रं विलोक्य हेमा स्वपुत्रस्य व्यथया पुनः व्यथिता अभवत् ।

"मातः, चित्राणि कीदृशानि ?"

"मनोरम्याणि । किन्तु पुत्र अत्र यथोचितानि रङ्गाणि नैव दत्तानि । दातव्यानि आसन् ।"

"प्रतापः ह्यः एव मम सर्वाः रङ्गलेखनीः खण्डितवान् इति अहं प्रातः एव भवतीम् अकथयम् । विस्मृतवती ?"

"तथापि एतेषु चित्रेषु रङ्गसमायोजनं कर्तव्यम् । अतः मया रङ्गलेखन्यः तव प्रयोजनाय क्रीत्वा आनीताः सन्ति ।" सा स्वकट्यां स्थापितायाः पोटलिकायाः रङ्गलेखनीम् अपसृत्य पुत्राय अददात् । परमप्रीतः भवदेवः सर्वरङ्गमयीं रङ्गलेखनीं गृहीत्वा अवदत्, "मातः ! अहम् एतेषु चित्रेषु रङ्गसमायोजनं सम्प्रति एव करोमि ।" प्रातःकालिकः दीनः मलिनमुखः भवदेवः सम्प्रति प्रसन्नो जातः । स उत्थाय मातुः हस्तौ गृहीत्वा अवदत्, "मातः ! अहं निर्भयः भूत्वा

पठामि लेखामि च । इत्येव न, पितुः मनोरथं पूरयितुम् अहम् अवश्यं सफलः चित्रकारश्च भविष्यामि ।” भवदेवः रङ्गलेखनीः गृहीत्वा अपरकोष्ठम् प्राविशत् । अद्य माता प्रथमबारं स्वपुत्रस्य प्रतिज्ञायां दृढताम् अन्वभवत् । सा भित्तौ स्थापितं पुत्रनिर्मितं मृतस्य पत्युः चित्रं निर्निमेषं विलोक्य दीर्घं निःश्वसितवती ।

**शब्दार्थाः**

| | |
|---|---|
| प्रत्युदतरत् | : प्रत्युत्तरम् अददात्, जवाफ फर्काइन् |
| तृणपीठिकायाम् | : घासनिर्मितासने, परालको पिर्कामा |
| पञ्चहायनः | : पञ्चवर्षीयः, पाँच वर्षको |
| प्रतिवेश्मकस्य | : प्रतिवासिनः, छिमेकीको |
| विचारमग्ना | : मनोगतचिन्तने एकान्विता, मानसिक कुरामा डुबेकी |
| वर्णलेखनीम् | : अङ्कनीम्, सिसाकलम |
| प्रेक्षकाः | : दर्शकाः, हेर्ने मानिसहरू |
| अभिनन्दितः | : प्रशंसितः, प्रशंसा गरिएको |
| परिधातव्यानि | : परिधेयानि, लगाइनुपर्छ |
| तदन्तिकस्थं | : तस्य निकटे वर्तमानं, उसको नजिकमा रहेको |
| वात्सल्यविह्वला | : प्रेमभावेन विवशा, प्रेमका कारण विवश भएकी |
| रङ्गलेखन्यः | : रङ्गकलमान्, अनेक रङका अक्षर लेख्ने कलमहरू लाई |
| परह्यः | : गतदिनस्य पूर्वदिनम्, अस्ति |
| अल्पाहारः | : ईषद्भोजनम्, खाजा |
| पिपठीषून् | : पठितुम् इच्छुकान्, पढ्न चाहनेहरूलाई |
| जिगमिषुः | : गन्तुम् इच्छुकान्, जान चाहनेहरूलाई |
| उद्विग्नम् | : चिन्तितम्, चिन्तामा परेको |
| अपरेद्युः | : अपरस्मिन् दिने, अर्को दिन |
| पुष्पितस्य | : फुल्लितस्य, फुलेको |
| उपद्रवः | : उत्पातः, फट्याइँ |

## अभ्यासः

### श्रवणं भाषणं च

१. **मित्रेभ्यः प्रश्नान् श्रुत्वा सङ्क्षिप्तमुत्तरं वदत**

(क) भवदेवो बहिः कथं स्थितः आसीत् ?

(ख) भवदेवस्य गृहं कुत्र वर्तते ?

(ग) हेमा किं कृत्वा भवदेवस्य पालनम् अकरोत् ?

(घ) रङ्गलेखन्यः कथं विनष्टाः ?

(ङ) भवदेवस्य पिता किं कथयति स्म ?

(च) प्रतापः कः आसीत् ?

(छ) मित्रैः सह कक्षायां प्रविश्य प्रतापः किम् अकरोत् ?

(ज) शिक्षकः प्रतापं किमर्थं न अदण्डयत् ?

(झ) भवदेवकृतं तृतीयं चित्रं कस्य आसीत् ?

(ञ) प्रातः मलिनः भवदेवः सायं कथं प्रसन्नोऽभवत् ?

२. **अधो लिखितानि पदानि उच्चारयत**

पुनर्निमन्त्रणेनापि, वर्षत्रयान्तरम्, प्रथमच्छात्ररूपेण, तदन्तिकस्थम्, हिमालयाङ्कितम्, ईषत्क्रुद्धा, अश्रुबिन्दून्, साहाय्येन, सर्वरङ्गमयीम् ।

३. **शिक्षकात् श्रुत्वा पदानां विभक्तिं कथयत**

मातः !, परह्यस्तनीया, रङ्गलेखनीः, द्वित्रैः, भवतीम्, हृष्टमनसा, पार्श्वे, भवदेवाय, मातुः, शिरसि, पद्भ्याम्, आकृतौ, पुष्पितस्य

४. **शिक्षकात् पाठस्य प्रथमानुच्छेदं श्रुत्वा तत्र प्रयुक्तानि अव्ययपदानि श्रावयत ।**

५. **अधोलिखितं संवादं श्रुत्वा उत्तरयत**

(मार्गे सख्योः राधावसुधयोः सङ्गमो भवति ।)

वसुधा - राधे ! वस्त्रपुटके किं गृहीत्वा आगच्छन्ती असि ?

राधा - अस्वस्थस्य पितुः कृते फलानि क्रीत्वा आगता अस्मि ।

वसुधा - अस्वस्थस्य कृते फलैः किम् भवति ? तदर्थं तु औधषालयेषु काचकूपनिहिताः पोषणरसाः (भिटामिन) प्राप्यन्ते । तेऽस्वस्थानां कृते उपयुक्ताः भवन्ति ।

राधा - नहि भो, सर्वेषाम् अस्वस्थानां कृते ते काचकूपस्थाः पोषणरसाः नोचिताः ।

वसुधा - किं वदसि राधे ? स्वयं चिकित्सकाः पोषणरसानां सेवनाय अस्वस्थान् जनान् निर्दिशन्ति ।

राधा - नर्दिशन्ति ते, किन्तु सर्वेषां कृते न । येषां शरीरे पोषणस्य मात्रा अत्यन्तं न्यूना अस्ति, तेषां कृते झटिति पोषणस्य आवश्यकता भवति । तदर्थं चिकित्सकाः पोषणरसस्य सेवनाय निर्दिशन्ति । अन्येषां कृते न ।

वसुधा - एवम् अस्ति ! तर्हि अन्येषां कृतेऽपि पोषणस्य आवश्यकता तु भवति किल । तैः किं सेवितव्यम् ?

राधा - श्रुणु, अन्यैः स्वस्थजनैः पोषणस्य कृते फलानि खादितव्यानि । अतः एव चिकित्सकाः फलानां नियमितसेवनाय सर्वान् कथयन्ति । ये नियमितं फलसेवनं कुर्वन्ति, तेषां कृते आपणीयानां पोषणरसानाम् आवश्यकता नास्ति । अतः अहम् अल्पाहाररूपेण प्रत्यहं फलानि खादामि । अस्वस्थस्य पितुः अन्येषां परिजनानां कृते च फलानि एव क्रीणामि ।

वसुधा - उत्तमः विचारः । पोषणरसविषये मदीयः संशयः त्वया निवारितः । धन्यवादः । अधुना गच्छामि ।

राधा - भवतु, अहम् अपि गच्छामि ।

(द्वे एव स्वं स्वं गृहं प्रति गच्छतः)

(क) कयोः मार्गे सङ्गमोऽभवत् ?

(ख) राधा कुतः किं क्रीत्वा आगता अस्ति ?

(ग) अस्वस्थानां कृते कस्य सेवनम् अनुचितम् ?

(घ) चिकित्सकाः पोषणरसस्य सेवनाय कान् निर्दिशन्ति ?

(ङ) पोषणरसस्य प्रयोजनं किम् ?

## पठनम्

१. **अधो लिखितां लघुकथां पठित्वा प्रदत्तान् प्रश्नान् उत्तरत**

पुरा एकस्मिन् राज्ये कश्चन राजा आसीत् । जनप्रियः विकासप्रेमी स नागरिकान् एव स्वसन्ततीः मनुते स्म । एकदा दुर्भाग्यवशात् तस्य प्रासादे अग्निदाहोऽभवत् । अग्निज्वालया राजा राजमहिषी बालको राजकुमारः अन्ये च राजपरिजनाः अम्रियन्त । राजपरिवारस्य अकालमृत्युना राज्यसञ्चालनाय महती समस्या प्रादुरभवत् । विशेषतः आत्मानं राजसिंहासने स्थापयितुं मन्त्रिणः परस्परं वैरम् अकुर्वन् । राजपदप्राप्तये मन्त्रिमण्डलेषु जायमानेन वैरेण नागरिकेषु किंकर्तव्यता किं भविष्यतीति आशङ्का च वर्धमाना आसीत् । देशाटनं कुर्वन् कश्चन मनस्वी साधुः तदेव एव राज्यम् आगच्छत् । स नागरिकैः मन्त्रिभिश्च अभिनन्दितोऽभवत् । मन्त्रिणः राजपरिवारस्य मृत्युना राज्ये दृष्टां समस्यां साधुं प्रति अकथयन् । साधु किञ्चित् विचार्य अवदत्, "श्वः प्रभाते सर्वे मन्त्रिणः राजप्रासादस्य प्राङ्गणे एकत्रिताः भवन्तु । अहं समस्यायाः समाधानं तत्रैव अन्वेष्यामि ।

अपरेद्युः सर्वे मन्त्रिणः राजप्रासादाङ्गणे सङ्गठिताः अभवन् । तान् संबोधयन् साधुः अवदत्, "भो मन्त्रिणः ! इह भोजनप्रतियोगिता आयोजिता वर्तते । भवन्तः एकस्मिन् समूहे द्वौ मन्त्रिणौ भूत्वा तिष्ठन्तु । एकसमूहस्थौ मन्त्रिणौ एकत्र उषित्वा भोजनं कुरुताम् । एवंरीत्या भवन्तः सर्वे मन्त्रिणः स्वस्वसमूहे युग्मीभूय भोजनं कुर्वन्तु परन्तु भोजनप्रसङ्गे कूर्परः तिरश्चीनः नैव भवेत् । कूर्परं ऋजुं विधाय एव सर्वैः समूहैः भोजनं करणीयम् । यः समूहः तथा कृत्वा भोजनं कर्तुं शक्नोति, तस्यैव समूहस्य वयसा ज्येष्ठः राजा कनिष्ठश्च महामन्त्री भविष्यति ।" मन्त्रिणः स्वेच्छया समूहं निर्माय भोजनाय सज्जीभूताः परन्तु कूर्परं चिरश्चीनम् अविधाय भोजनं कर्तुं नैव अशक्नुवन् । सर्वेषां समूहाणां मन्त्रिणः असमर्थाः अभवन् परन्तु एकस्मिन् समूहे वर्तमानौ मन्त्रिणौ परस्परं स्वाभिमुखम् उपविष्टौ आस्ताम् । तयोः मध्ये एकः कूर्परं ऋजुं विधाय अन्यं मन्त्रिणं भोजयन् आसीत् । एवम् अपरश्च मन्त्री तं मन्त्रिणं तथैव कृत्वा भोजयन् आसीत् । साधुः भोजनप्रतियोगितायां तौ विजेतारौ घोषयित्वा तयोः मध्ये ज्येष्ठं राजपदे कनिष्ठं च महामन्त्रिपदे न्ययोजयत् ।

(क) राजपरिजनानां मृत्युः कथम् अभवत् ?

(ख) राजाभावे नागरिकाणां स्थितिः कीदृशी आसीत् ?

(ग) प्रतियोगिता कुत्र समायोजिता आसीत् ?

(घ) भोजनप्रतियोगितायां कीदृशः नियमः स्थापितः ?

(ङ) विजेतारौ मन्त्रिणौ कथं भोजनम् अकुरुताम् ?

(च) कः राजा कश्च महामन्त्री नियुक्तः ?

(छ) कथया कः सन्देशः लभ्यते ?

२. **कोष्ठकाद् उपयुक्तं चिह्नं संयोज्य पठत ?**

उद्यानम्, पाठशाला, प्रज्ञा, चित्रकाराः, दानम्

(क) धारणावती बुद्धिः ........................ कथ्यते ।

(ख) वस्तुनि स्वाधिकारस्य त्यागपूर्वकं पराधिकारसम्पादनं .............. अस्ति ।

(ग) यत्र विद्यार्थिनः पठनाय गच्छन्ति सा ....................... वर्तते ।

(घ) चित्राणां निर्मातारः .................. कथ्यन्ते ।

(ङ) अनेकविधपुष्पाणां पुष्पितं स्थलम् ............. अस्ति ।

३. **सस्वरपठनं कुरुत**

मनुष्याः इव सर्वे प्राणिनः सुखं कामयन्ते परन्तु सुखं सर्वैः न प्राप्यते । ये सुखं प्राप्नुवन्ति तेषां सुखम् अपि स्थिरं न भवति । तर्हि मनुष्यः सर्वदा सुखी कथं भवेत् ? प्रश्नस्तु उद्भवति एव । दुःखस्य निवारणेन सुखं प्राप्तं भवति । दुःखनिवारणस्य च भैषज्यं सुखविषयिण्याः चिन्तायाः परित्यागः एव अस्ति । यावच्चिन्ता तावद्दुःखम् भवति । अतः चिन्तापरित्यागेन सर्वदा सुखी भवितुं शक्यते ।

४. **वाक्यस्थं क्रियापदं लोट्लकारे परिवर्त्य पठत**

(क) त्वं सर्वता सत्यं वदसि ।

(ख) विमला संस्कृतेन भाषते ।

(ग) मन्त्रिणः राजकार्यं कुर्वन्ति ।

(घ) युवां परस्परं प्रश्नान् पृच्छतः ।

(ङ) वयं काष्ठमण्डपं भ्रमामः ।

५. **अनुच्छेदं पठित्वा एकतृतीयांशे सारांशं लिखत ।**

नेपालः वनबहुलो देशः अस्ति । अतः 'हरितवनं नेपालस्य धनम्' इति उक्तिः अत्र बहुप्रचलिता श्रूयते । अत्र पर्वतीये उपत्यकायां चुरेक्षेत्रे तराईक्षेत्रे च बहुत्र घनानि

वनानि सन्ति । नेपाले वर्तमानेषु वनेषु औषधीयगुणवन्तः वनस्पतयः सन्ति । सम्प्रति अत्र सप्तशतप्रजातीनां वनस्पतयः औधषरूपेण प्रयुज्यमाणाः सन्ति । कर्णालीप्रदेशस्तु औषधस्य भण्डारः एव वर्तते । तराईक्षेत्रे मेन्था, केमोमाइल, सिट्रोनेला, कुरिलो, सर्पगन्धा, पर्वतीयक्षेत्रे रिट्ठा, चिराइतो, टिमुर, घोडताप्रे, पुदिना तथा हिमालयक्षेत्रे जटामसी, पाँचऔंले, कुट्टी, अतिस इत्यादयः औषधीयाः वनस्पतयः लभ्यन्ते । एते वनस्पतयः सर्वविधरोगाणां निवारणाय औषधरूपेण प्रयुज्यन्ते । अत्रत्यानाम् औषधीयवनस्पतीनां नेपालचिनादिदेशेषु निर्यातो भवति ।

## लेखनम्

### १. पदानि प्रयुज्य एकैकं वाक्यं लिखत

बहुवारम्, स्रोतः, रममाणम्, मौनीभूय, साधु, तर्हि, ह्यः, दैनन्दिनम्, प्रातः, निर्निमेषम्

### २. उचितपदेन रिक्तस्थानं पूरयत

(क) तुभ्यं .............. रङ्गलेखन्यः कुत्र सन्ति ? (दत्तः/दत्तानि/दत्ताः)

(ख) नो चेत् विद्यालयाय ............ भवति । (विलम्बः/बिलम्बी/विलम्बम्)

(ग) सा क्षणं मौनमेव .............. । (अवसः/अवसत्/अवसन्)

(घ) त्वं .............. सफलः चित्रकारः भविष्यसि । (ह्यः/अद्य/एकदा)

(ङ) अहं निर्भयः भूत्वा पठामि लिखामि ........ । (च/एवम्/तर्हि)

### ३. परस्परं योजयत

| | |
|---|---|
| विद्यालयः | चित्रम् |
| नेत्रयोः | भवदेवः |
| उद्दण्डः | गन्तव्यः |
| पिपठिषुः | व्यवहारः |
| सुन्दरम् | प्रतापः |
| परिवर्तितः | अश्रुबिन्दवः |

### ४. प्रश्नान् उत्तरयत

(क) भवदेवस्य पिता कथं वीरगतिम् अलभत ?

(ख) मातुः आज्ञां विनैव भवदेवः किं करोति स्म ?

(ग) प्रारम्भे भवदेवः किमर्थं प्रसन्नः आसीत् ?

(घ) भवदेवः कीदृशं हिमालयस्य दृश्यं चित्राङ्कनाय उपयुक्तम् मनुते ?

(ङ) श्रमाय गन्तुकामा हेमा पुत्रस्य निकटे किमर्थम् अवसत् ?

(च) भवदेवस्य रोदने कः हेतुः ?

(छ) प्रतापः कथं भवदेवस्य विरुद्धोऽभवत् ?

(ज) विद्यालये प्रतापस्य दैनन्दिनं कृत्यम् किम् आसीत् ?

(झ) परह्यः कक्षायां किम् अभवत् ?

(ञ) भवदेवस्य कां प्रतिज्ञां श्रुत्वा हेमा दीर्घं निःश्वसितवती ?

५. **विद्यालयगमनाय अनिच्छुकस्य भवदेवस्य कीदृशं मनोविज्ञानं कथायां प्रस्तुतमस्ति ? विश्लेषणं कुरुत ।**

६. **दारिद्र्यदुःखेन दुःखितया विधवया भुक्ता पारिवारिकसमस्या कथायां कथं वर्णिता ?**

७. **ग्रामीणसमाजस्य सामाजिकपक्षः कथायां कया रीत्या प्रदर्शितः ? व्याख्यां कुरुत ।**

८. **स्वकीयं कार्यं परित्यज्य अन्यमनस्कस्य बालकस्य जीवनं सन्मार्गे प्रत्यानेतुम् अभिभावकस्य भूमिका कीदृशी भवितव्या ? कथां च आधारीकृत्य लिखत ।**

९. **यदि त्वं भवदेवस्य स्थाने अभविष्यः, तर्हि आत्मानं पीडयितुम् उद्यतं प्रतापं प्रति कीदृशं व्यवहारम् अकरिष्यः ? तार्किकम् उत्तरं लिखत ।**

१०. **भवदेवः कीदृशः बालकः अस्ति ? तस्य चरित्रं च चित्रयत ।**

११. **कथायाः प्रमुखघटनाः यथाक्रमं सूत्रशैल्यां लिखत ।**

१२. **अधस्तनम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरयत**

प्राचीनकवीनां गणनाप्रसङ्गे कालिदासस्य नाम अग्रे आयाति । एतस्य जन्म भारतस्य उज्जयिनीक्षेत्रे अभवत् इति अनुमीयते । महाराजस्य विक्रमादित्यस्य सभापण्डितः असौ

विश्वकविरूपेण प्रसिद्धोऽस्ति। कालिदासः मूलतः कविः तदनु नाटककारश्च आसीत्। काव्येषु अयं रघुवंशम्, कुमारसम्भवं चेति महाकाव्यद्वयं मेघदूतम्, ऋतुसंहारञ्चेति खण्डकाव्यद्वयं च अरचयत्। मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं चेति त्रीणिनाटकानि एत्तकृतानि प्रसिद्धानि सन्ति। प्रसादगुणयुक्तायां शैल्यां काव्यानि रचयन् असौ प्रकृतेः रम्यं वर्णनम् अकरोत्। चरित्रस्य स्वाभाविकं चित्रणं कर्तुं निपुणः कालिदासः विशेषतः उपमाप्रयोगे ख्यातिम् अलभत। अतः तं प्रशंसन्तः समीक्षकाः 'उपमा कालिदासस्य' इति कथयन्ति। अस्य कृतिषु काव्यसौन्दर्यं सर्वत्र अनुभूयते। असौ संस्कृतसाहित्ये कविकुलशिरोमणिः इत्युपाधिना सम्मानितः अस्ति।

(क) कालिदासस्य जन्म कुत्र अभवत् ?

(ख) कालिदासस्य नाटकानि कानि ?

(ग) साहित्ये कालिदासः कां शैलीम् अङ्गीकृतवान् ?

(घ) समीक्षकाः किं कथयन्ति ?

(ङ) कालिदासः कथं सम्मानितः ?

## व्याकरणानुशीलनम्

### १. केलि-शब्दस्य सर्वाणि रूपाणि लिखत

### २. समुचितेन शब्देन रिक्तस्थानं पूरयत

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भोगी | ........... | भोगिनः |
| द्वितीया | ........... | भोगिनौ | ........... |
| तृतीया | भोगिना | ........... | भोगिभिः |
| चतुर्थी | ........... | भोगिभ्याम् | भोगिभ्यः |
| पञ्चमी | भोगिनः | ........... | भोगिभ्यः |
| षष्ठी | ........... | भोगिनोः | भोगिनाम् |
| सप्तमी | ........... | भोगिनोः | ........... |
| सम्बोधनम् | हे भोगिन्! | हे भोगिनौ ! | ........... |

**३. वपा-शब्दस्य रूपावलिं लिखत ।**

**४. प्रदत्तैः पदैः वाक्यानि रचयत**

विवरम्, नटनम्, तमः, अधोभुवनम्, व्यालः

## प्रतिभाप्रदर्शनाभ्यासः

१. अधोदत्तघटनाः संयोज्य लघुकथां विलिख्य शीर्षकं च दत्त ।

वने मुनिवरः तपसि लीनः ... केचन लुण्ठकाः व्यापारिणं लुण्ठयितुम् तं अनुधावमानाः ... व्यापारी मुनेः आश्रमं प्राप्तः ... तेन गुप्तो भवितुम् आश्रमे स्थानावलोकनम् ... आश्रमस्य अन्तःप्रकोष्ठं गत्वा आत्मानं प्रच्छन्नीकरणम् ... मुनिः सत्यवदने दृढप्रतिज्ञः... व्यापारिविषये लुण्ठकानां मुनिं प्रति जिज्ञासा ... मुनिना प्रच्छन्नस्य व्यापारिणः यथार्थकथनम् ... मुनेः पुरतः लुण्ठकैः व्यापारिणः धनानि लुण्ठनं हननं च ... व्यापारिवधस्य पापेन मुनिः विचलितः ... मुनिना पश्चात्तापकरणम् ... सत्यवदनस्य परिणामं विचार्य लोककल्याणं करणीयमिति सन्देशः ।

## कोषानुशीलनम्

**वारिवर्गः**

शिली गण्डूपदी भेकी वर्षाभ्वी कमठी डुलिः ॥<br>
मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोशिका ।<br>
जलाशयो जलाधारस्तत्रागाधजलो ह्रदः ॥<br>
आहावस्तु निपानं स्यादुपकूपजलाशये ।<br>
पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥<br>
नेमिस्त्रिकास्य वीनाहो मुखबन्धनमस्य यत् ।<br>
पुष्करिण्यां तु खातं स्यादखातं देवखातकम् ॥<br>
पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः ।<br>
वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका ॥<br>
खेयं तु परिखाधारस्त्वम्भसां यत्र धारणम् ।

स्यादालवालमावालमावापोऽथ नदी सरित् ॥
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा ॥
कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती ।
गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ।
कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥

**पदानुशीलनी**

**गण्डुपद्याः नाम्नी** - शिली २, गण्डूपदी २,

**भेक्याः नाम्नी** - भेकी २, वर्षाभ्वी २,

**कमठ्याः नाम्नी** - कमठी २, डुलिः२,

**मत्स्यायाः नाम** - शृङ्गी २,

**युकाविशेषस्य जलचरस्य नाम्नी** - दुर्नाम १, दीर्घकोशिका २,

**जलाशयस्य नाम्नी** - जलाशयः १, जलाधारः१,

**गभीरजलाशयस्य नाम** - ह्रदः १,

**निपानस्य नाम्नी** - आहावः१, निपानम् ३,

**कूपस्य नामानि** - अन्धुः१, प्रहिः१, कूपः १, उदपान ५,

**त्रिकायाः नाम्नी** - नेमिः २, त्रिका २,

**तडागस्य भित्तिका** - वीनाहः १,

**पुष्करिण्याः नाम्नी** - पुष्करिणी २, खातम् ३,

**स्वयं निर्मितस्य तडागस्य नाम्नी** - अखात ५, देवखातकम ३,

**कमलयुक्तायाः पुष्करिण्याः नाम्नी** - पद्माकरः १, तडाग ५,

**तडागस्य नामानि** - कासारः १, सरसी २, सरः ३,

**अल्पसरसोर्नामानि** - वेशन्तः१, पल्वलः ५, अल्पसरः ३,

**वाप्याः नाम्नी** - वापी २, दीर्घिका २,

**परिखायाः नाम्नी** - खेयम् ३, परिखा २,

**जलाधारस्य नाम** - आधारः १,

**आलवालस्य नामानि** - आलवालम् ३, आवालम् ३, आवापः १,

**नद्याः नामानि**

(स्त्री.) नदी, सरित्, तरङ्गिणी, शैवलिनी, तटिनी, ह्रादिनी, धुनी, स्रोतस्विनी, द्वीपवती, स्रवन्ती, निम्नगा, आपगा, कूलङ्कषा, निर्झरिणी, रोधोवक्रा, सरस्वती,

**भागीरथ्याः नामानि** - गङ्गा, विष्णुपदी, जह्नुतनया, सुरनिम्नगा, भागीरथी, त्रिपथगा, त्रिस्रोतस्, भीष्मसू, यमुनागङ्गायाः नामानि - कालिन्दी, सूर्यतनया, यमुना, शमनस्वसा,

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती ।
गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ ङ्ग

२. **नद्याः सर्वाणि नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण वापीशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वापी | ............ | ............ |
| द्वितीया | ............ | ............ | वापीः |
| तृतीया | वाप्या | ............ | ............ |
| चतुर्थी | ............ | वापीभ्याम् | ............ |
| पञ्चमी | ............ | ............ | वापीभ्यः |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | वापीषु |
| सम्बोधनम् | हे वापि ! | ............ | ............ |

४. “खातम्“इति कस्य नाम ?

५. कमठीशब्दः कस्मिन् लिङ्गे अस्ति ?

६. रिक्तस्थानं पूरयत

भागीरथी .............. भीष्मसूरपि।

कालिन्दी ..............समनस्वसा॥

७. कालिन्दीशब्दस्य रूपावलिं लिखत ।

८. प्रदत्तैः शब्दैः वाक्यानि रचयत

जलाधारः, कूपः, पद्माकरः, सरित्, ह्रदः

९. पर्यायान् परस्परं मेलयत

| समूहः क | समूहः ख |
|---|---|
| यमुना | आवापः |
| नदी | सरसी |
| आवालम् | दीर्घिका |
| वापी | तरङ्गिणी |
| सरः | कालिन्दी |

# सम्पत्संरक्षणम्

अष्टसिद्धि-मातृसमूहस्य दशमवार्षिकोत्सवो वर्तते । अस्मिन् समूहे क्रियाशीला महिलाः सन्ति । ता ग्रामस्य विकासाय बहूनि कार्याणि कर्तुमिच्छन्ति । ग्रामे एको बौद्धविहारोऽस्ति । संरक्षणस्य स्वच्छीकरणस्य चाभावेन विहारोऽयं जीर्णतां प्राप्तो वर्तते । तत्र किं कर्तव्यमिति विषये विचारणा आयोजिताऽस्ति । छात्राद्वयं विचारं प्रकटयति प्रबुद्धमहिलानां पुरतः ।

नलिनी :

मातरः, भगिन्यश्च !

वयं समाजस्य सचेष्टा नागरिकाः स्मः । समाजे किं जायमानमस्ति तत्रास्माभिर्गभीरेण विलोकनीयं चिन्तनीयं च । समाजस्य सौन्दर्यं सभ्यता चास्माकं कर्मभिः प्रदर्श्येते । अस्माकं मनः कीदृशम्, चिन्तनञ्च कथंविधमिति अस्माकं सामाजिककार्यैरेव स्फुटीभवति । भवत्यो विलोकयन्ति यदस्माकं ग्रामे प्राचीनबौद्धविहारो वर्तते । अयं न केवलमस्माकं ग्रामस्य अपि तु राष्ट्रस्यैव गौरवमातनोति । विहारोऽयं पुरातात्त्विकवस्तूनां विपुलनिधिरस्ति । वयं प्रतिदिनं दर्शनाय, पूजायै प्रार्थनायै च तत्र गच्छामः परं विहारस्य भौतिकीं दशां प्रति दृष्टिं न दद्मः । तस्य छदिर्जीर्णतां प्राप्ता वर्तते । भित्तिर्बहुत्र बिलवती जाता । द्वारवातायनानां काष्ठानि इदानीमेव पतन्तीव भान्ति । विहारं परितोऽवकरराशिर्दृश्यते येन एतस्य महत्त्वं क्षीणतां गतमस्ति । किं बहुना, कुक्कुरशूकरादयः पशवश्चात्रैव मलमूत्रोत्सर्जनं कुर्वन्ति । एके जना मूलद्वारे एव कन्थां शोषयन्ति । किमस्ति एत्त् सर्वं शोभनम् ?

अत्र वयं विना व्ययेन बहूनि कार्याणि कर्तुं शक्नुमः । सर्वाणि कार्याणि न केवलं वित्तेन एव अपि तु इच्छाशक्त्या एकतया च सम्पद्यन्ते । वयं मिलित्वा विहारं स्वच्छीकर्तुं शक्नुमः । पशून् तत्र प्रवेशनाद् रोद्धुं प्रभवामः । कन्थां न शोषयित्वा सभ्यतां दर्शयितुं शक्नुमः । भौतिकीं दशां समुल्लिख्य सर्वकारीयकार्यालयाय पत्रं प्रेषयितुं शक्यते । सति सम्भवे अधिकारिण आहूय विहारस्य दशा दर्शनीया । अधुना अस्माकं स्थानीया निकाया विधिनैव आधिक्येन

अधिकारसम्पन्नाः कारिताः सन्ति । एते नानोपायैः करं गृह्णन्ति । एते विहारस्य सम्भाराय वित्तमावण्टयितुं विशेषेण अनुरोद्धव्याः । समाजस्य सर्वे वर्गा अस्य सम्भाराय संरक्षणाय च जागरुका विधातव्याः । विद्यार्थिषु अयमस्माकमस्तित्वमस्तीति भावना उद्भावनीया । वयं जानीमः सर्वत्र पश्यामश्च यद् विश्वस्य नागरिकाः स्वधर्म-कला-संस्कृति-परम्परा रक्षितुं सर्वोपायान् चालयन्ति । त एतदर्थं यथाशक्ति वित्तञ्च व्ययीकुर्वन्ति । वयं वित्तस्य तु वार्तैव का ? सम्पत्संरक्षणाय स्वल्पं श्रमदानं कर्तुमपि संशयं यामः । इयं प्रवृत्तिरस्माभिः सर्वथा त्यक्तव्या । सुकार्यैरेवास्माकं कीर्तिश्चिरं जीवतीति न केनापि विस्मर्तव्यम् ।

मीरा :

सम्मान्या मातरः, आदरणीया भगिन्यः, प्रियाः सहचर्यश्च !

आदौ सकलमातृगणं प्रणमामि ।अस्य सामयिककार्यक्रमस्य आयोजनमालक्ष्य मुहुर्मुहुर्मानसं मोदते । अस्माकं न्यासरूपं विहारं विलोक्य किञ्चिद् वक्तुमुद्यताऽस्मि । अस्माभिश्चिन्तनीयमुदरपूर्तिरेव मानवजीवनस्य प्रयोजनं नास्ति । लोकस्य हिताय यथाशक्ति प्रवर्तनमपि जीवनसारं वर्तते । ग्रामस्य गौरवं वैशिष्ट्यं च निर्वहतो विहारस्य सम्भार-सम्मार्जन-संरक्षणदिकार्येषु योजनमपि लोकहितमेव मन्ये । विहारस्य दशां दृष्ट्वा नास्ति कस्यापि हृदयं विदीर्णम् ? अस्माकमाधारः कः ? के नो विश्वस्मिन् विश्वे परिचाययन्ति ? कानि तानि वैशिष्ट्यानि यानि नेपालिनां स्वत्वं स्वाभिमानं च सर्वत्र विशदीकुर्वन्ति ? अत्र विचारणा आवश्यकी वर्तते । स्थानीयसम्पदोऽस्माकं सामूहिकपरिचयमाविश्वं विस्तारयति ।

प्रतिवर्षं सहस्रशो वैदेशिकपर्यटका नेपालभ्रमणाय समायान्ति । ते किमर्थमायान्ति ? सुष्ठु विचारयाम । ते नेपालस्य कला-संस्कृति-पुरातात्त्विकसम्पदाम्, नेपालिनां जीवनचर्याया अन्यत्र दुर्लभस्य प्राकृतिकसौन्दर्यस्य चावलोकनाय इह पर्यटन्ति । अस्माकं सभ्यतायाः परिचायनाय पर्यटकानां प्रीत्यै च एतादृश्यः सम्पदः संरक्षणीयाः । यद्यस्माकं ततः पलायनं भवति तदा नागरिककर्तव्यादपि वयं च्युता भविष्यामः । सम्पदो वैदेशिकमुद्राणामर्जनस्यापि बलवत् स्रोतो वर्तते ।राष्ट्रस्य समृद्धिर्नैकेन जनेन कर्मणा वाधिगन्तुं शक्यते । देशस्य विकासः पर्यटनस्य विकासेऽपि निर्भरायते । पर्यटनस्य विकासः सम्पदां संरक्षणेन सम्भवति । पर्यन्तेऽस्माकं राष्ट्रं समृद्धं वयञ्च सुखिनो भविष्यामः । एतद् विचिन्त्य विहारस्य संरक्षणायास्माभिरधुनैव प्रवर्तनीयमिति निवेदयामि ।

**शब्दार्थाः**

| | |
|---|---|
| विचारणा | : विचार गर्नु |
| स्फुटीभवति | : प्रकाशित हुन्छ |
| आतनोति | : फैल्याउँछ |
| निधिः | : खानी |
| छदिः | : छानो |
| बिलवती | : प्वाल भएको (स्त्रीलिङ्गे) |
| कन्था | : थाङ्ना |
| आवण्टयितुम् | : बाँड्न |
| यामः | : पुग्छौँ |
| न्यासरूपम् | : धरोहरस्वरूप |
| उदरपूर्तिः | : पेट भर्ने काम |
| विशदीकुर्वन्ति | : विस्तार गर्दछन् |
| जीवनचर्या | : जीवन बिताउने काम |
| इह | : यहाँ |
| परिचायनाय | : परिचित गराउनका लागि |

**अभ्यासः**

**श्रवणं भाषणं च**

१. **अधो लिखितानि पदानि शिक्षकात् शृणुत**

अष्टसिद्धिः, स्वच्छीकरणस्य, स्फुटीभवति, दद्मः, मलमूत्रोत्सर्जनम्, प्रभवामः, सर्वकारीयकार्यालयाय, अयमस्माकमस्तित्वमस्तीति, उद्यता, कला-संस्कृति-पुरातात्त्विकसम्पदाम्, प्रीत्यै, वैदेशिकमुद्राणामर्जनस्यापि, प्रवर्तनीयमिति ।

२. **अधो लिखितमनुच्छेदं मित्रात् श्रुत्वा अनुवदत**

आदौ सकलमातृगणं प्रणमामि । अस्य सामयिककार्यक्रमस्य आयोजनमालक्ष्य मुहुर्मुहुर्मानसं मोदते । अस्माकं न्यासरुपं विहारं विलोक्य किञ्चिद् वक्तुमुद्यताऽस्मि ।

अस्माभिश्चिन्तनीयमुदरपूर्तिरेव मानवजीवनस्य प्रयोजनं नास्ति । लोकस्य हिताय यथाशक्ति प्रवर्तनमपि जीवनसारं वर्तते । ग्रामस्य गौरवं वैशिष्ट्यं च निर्वहतो विहारस्य सम्भार-सम्मार्जन-संरक्षणदिकार्येषु योजनमपि लोकहितमेव मन्ये । विहारस्य दशां दृष्ट्वा नास्ति कस्यापि हृदयं विदीर्णम् ? अस्माकमाधारः कः ? के नो विश्वस्मिन् विश्वे परिचाययन्ति ? कानि तानि वैशिष्ट्यानि यानि नेपालिनां स्वत्वं स्वाभिमानं च सर्वत्र विशदीकुर्वन्ति ? अत्र विचारणा आवश्यकी वर्तते । स्थानीयसम्पदोऽस्माकं सामूहिकपरिचयमाविश्वं विस्तारयति ।

## ३. पदानि संयोज्य उच्चारयत

दशमः वार्षिकोत्सवः, बौद्धविहारः अस्ति, सामाजिककार्यैः एव, नाना उपायैः, व्ययी कुर्वन्ति, विशदी कुर्वन्ति, यदि अस्माकम् ।

## ४. उत्तराणि वदत

(क) कस्य समूहस्य वार्षिकोत्सवो वर्तते ?

(ख) का ग्रामस्य विकासाय बहूनि कार्याणि कर्तुमिच्छन्ति ?

(ग) छात्राद्वयं कासां पुरतो विचारं प्रकटयति ?

(घ) अस्माकं कर्मभिः किं प्रदर्श्यते ?

(ङ) बौद्धविहारस्य दशा कीदृशी वर्तते ?

(च) बौद्धविहारस्य संरक्षणाय अस्माकं कर्तव्यं किम् ?

(छ) स्थानीयनिकायाः कीदृशाः कारिताः सन्ति ?

(ज) मानवजीवनस्य प्रयोजनं किम् ?

(झ) वैदेशिकपर्यटकाः किमर्थं नेपालमायान्ति ?

(ट) राष्ट्रं समृद्धं वयञ्च सुखिनः कथं भवामः ?

## ५. मीरायाः सम्भाषणस्य प्रथमानुच्छेदस्य सारांशं कथयत ।

## ६. अधो लिखितानि सूत्राणि अनुशील्य सम्भाषणाय आवश्यकानि सूत्राणि निगदत

सम्बोधनम्, नर्तनम्, अपहसनम्, शिष्टपदोच्चारणम्, उत्प्लवनम्, अत्युच्चैः स्वरेण गर्जनम्, तर्कोपस्थापनम्, गालीप्रदानम्, सान्दर्भिकसुभाषितकथनम्, नैजवैशिष्ट्

यख्यापनम्, तथ्यानुगमनम्, विषयसङ्गतिप्रदर्शनम्, केशकण्डूयनम्, धावनम्, भीत्या कम्पनम् ।

७. **पाठस्यान्तिमानुच्छेदमनुसृत्य वैदेशिकमुद्राणामर्जनस्य अन्यान् त्रीन् उपायान् कथयत ।**

८. **शिक्षकात् अधो लिखितं गद्यांशं श्रुत्वा पञ्च प्रश्नान् पृच्छत**

भगवत्याः सहस्रशः सहचर्यः सन्ति । तासु चतुःषष्टिर्योगिन्यः प्रसिद्धा मन्यन्ते । एताभिस्सह संयोज्य शिवस्य चतुःषष्टी रूपाणि कल्प्यन्ते । चतुःषष्टिः शिवलिङ्गानि पुण्यकारीणि सन्तीति जनानां दृढविश्वासो वर्तते । एतानि परितः शिवभक्ता भ्रमन्ति । कला अपि चतुःषष्टिरेव परिगणिताः सन्ति । काश्चन कला विद्योपार्जनकौशलमाश्रयन्ते । पुस्तकवाचनमपि कलासु परिगणितं वर्तते । अक्षरैः सम्भाषणमपि कला मन्यते । कलेयमक्षरमुष्टिकाकथनमुच्यते । देशस्य भाषाणां ज्ञानमपरा कला उक्तास्ति । एतद् देशभाषाज्ञानमिति परिगण्यते । सम्पाठ्यं कलाया अपरभेदः । अन्येषां पठनं श्रुत्वा तदनुसारं पुनःपठनं सम्पाठ्यमुक्तम् । छन्दसां लयकथनञ्च कला प्रोक्ता । इयमभिधानकोशपदेन परिचिता वर्तते । कठिनपदार्थकथन-प्रहेलिकाकथाकथनान्ताक्षरयोजन-श्लोकवाचनादीनि वाक्छिल्पान्यपि कला मताः । काव्यकवितारचनं श्रवणञ्च कलाभेदो मन्यते । न हि एतदेव, कलाविज्ञैर्वाचनकलाभिवर्धनञ्च कला उदीरिता वर्तते । कलाभेदानां गणनया भाषायाश्चत्वारि शिल्पानि कलारूपाणि सिद्ध्यन्ति ।

## पठनम्

१. **सन्धिं विच्छिद्य पठत**

तत्रास्माभिर्गभीरेण, यदस्माकम्, छदिर्जीर्णताम्, परितोऽवकरराशिः, पशवश्चात्रैव, सर्वोपायान्, सुकार्यैरेवास्माकम्, परिचयमाविश्वम्, किमर्थमायान्ति, समृद्धिर्नैकेन, वाधिगन्तुम्, संरक्षणायास्माभिरधुनैव ।

२. **पाठस्य मौनपठनं कृत्वा तार्किकवाक्यानि विचित्य सस्वरं पठत ।**

३. **नलिन्याः सम्भाषणस्य प्रथमानुच्छेदे प्रयुक्तानि बहुवचनबोधकानि पदानि पठत ।**

४. **अधो लिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरयत**

अस्माकं शास्त्रेषु प्राचीनकालादेव कालगणना विहिता वर्तते । कालो हि निरवधिरस्ति । कालं वशीकर्तुं न कोऽपि प्रभवति । भवभूतिः सत्यं वदति, " कालो ह्ययं निरवधिः" इति । कालोऽखण्ड एव तदपि व्यवहारस्य सौकर्याय कालगणना विधीयते । अत्र युगशब्दोऽपि प्रचलितो दृश्यते । पुराणेषु वर्णितस्य कालस्य दीर्घावधिर्युगशब्देन प्रसिद्धो वर्तते । युगाश्चत्वारः सन्ति - सत्य-त्रेता-द्वापर-कलिनामधेयैः । हरविंशपुराणे चतुर्णां युगानां वर्षगणना विहिताऽस्ति । सत्ययुगः सप्तदशलक्षाणामष्टाविंशतेः सहस्राणाञ्च वर्षाणां भवति । त्रेतायुगो द्वादशलक्षाणां षण्णवतेः सहस्राणाञ्च वर्षाणां मन्यते । द्वापरयुगस्यावधिरष्टलक्षाणां चतुःषष्ट्याः सहस्राणाञ्च वर्षाणां निर्धारितोऽस्ति । कलियुगश्चतुर्णां लक्षाणां द्वात्रिंशतः सहस्राणाञ्च वर्षाणां मतः । कालगणनायां मन्वन्तरस्यापि प्रसङ्ग आयाति । मन्वन्तरं हि पुराणस्य सूर्यसिद्धान्तस्य चानुसारेण एकस्मिन् कल्पे चतुर्दशमनूनामधिकारकालो वर्तते । चतुर्दशमन्वन्तराणामेकः कालो भवति । चतुर्णामब्जानां द्वात्रिंशतः कोटीनाञ्च वर्षाणामवधिर्ब्रह्मणो दिनैकं भवति । ब्रह्मणो दिनं कल्प उच्यते । त्रिंशतः कल्पानां ब्रह्मणो मासैकं भवति । ब्रह्मण आयुः शतवर्षाणां मन्यते । पूर्वार्धस्य पञ्चाशद् वर्षाणि व्यतीतानि । इदानीं परार्धस्य श्वेतवाराहकल्पः सञ्चलन्नस्ति ।

## प्रश्नाः

(क) भवभूतिः किं कथयति ?

(ख) कालगणना किमर्थं विधीयते ?

(ग) युगस्य कोऽर्थः ?

(घ) सत्ययुगे कति वर्षाणि भवन्ति ?

(ङ) मन्वन्तरं किम् ?

(च) ब्रह्मणो दिनं किमुच्यते ?

(छ) इदानीं कः सञ्चलन्नस्ति ?

५. **रमायाः सम्भाषणस्य द्वितीयानुच्छेदस्य द्रुतपठनं कुरुत ।**

६. **अधो लिखितान् अङ्कान् अक्षरेषु परिवर्त्य पठत**

९,७६५६३, २,०७४६५, ११, ९४०, ३०,४०५१०, ९५, १४४६५, १,०२०३० ।

७. **पाठस्यान्तिमानुच्छेदे प्रयुक्तानि उपसर्गवन्ति क्रियापदानि पठत ।**

८. **पाठाधारेण बौद्धविहारस्य दशादर्शीनि सूत्राणि निर्माय पठत ।**

## लेखनम्

१. **अधो लिखितानि पदानि अनुलिखत**

संपत्संरक्षणम्, छात्राद्वयम्, राष्ट्रस्यैव, प्रार्थनायै, भित्तिर्बहुत्र, सर्वोपायान्, कीर्तिश्चिरम्, मुहुर्मुहुर्मानसम्, वैशिष्ट्यानि, मुद्राणाम्, पर्यन्तेऽस्माकम् ।

२. **पदानि प्रयुज्य वाक्यानि रचयत**

अष्टसिद्धिः, विचारणा, कथंविधम्, निधिः, व्ययीकुर्वन्ति, सम्मार्जनम्, लोकहितम्, स्वत्वम्, परिचायनाय, पलायनम्, बलवत्, निर्भरायते, प्रवर्तनीयम् ।

३. **कोष्ठस्य सङ्केतानुसारेण वाक्यानि परिवर्तयत**

(क) छात्रा भागमगृह्णात् । (बहुवचने)

(ख) बौद्धविहारोऽस्ति । (भूतकाले)

(ग) बालका हसन्ति । (स्त्रीलिङ्गे)

(घ) अहमुद्यानं विलोकयामि । (कर्मवाच्ये)

(ङ) मया सुप्तम् । (कर्तृवाच्ये)

४. **वाक्यानि संशोधयत**

(क) स्वच्छो जलं रोगं निवारयति ।

(ख) वक्तृताऽपि कला मतमस्ति ।

(ग) अस्माभिः कर्तव्यरतेन भाव्यम् ।

(घ) ग्रामे बौद्धविहारं वर्तते ।

(ङ) पर्यटका नेपालस्य सौन्दर्यं वर्णयति ।

## ५. कोष्ठे सत्यमसत्यं वा लिखत

(क) विहारो जीर्णो वर्तते । ( )

(ख) सांस्कृतिकसम्पदोऽस्मान् न परिचाययन्ति । ( )

(ग) वित्तेन विना किमपि कार्यं कर्तुं न शक्यते । ( )

(घ) पर्यटनस्य विकासेन राष्ट्रस्य समृद्धिः सम्भवति । ( )

(ङ) सांस्कृतिकसम्पदां संरक्षणमस्माकं कर्तव्यं वर्तते । ( )

## ६. उत्तराणि लिखत

(क) अष्टसिद्धि-मातृसमूहे कीदृश्यो महिलाः सन्ति ?

(ख) अस्माकं मनः कैः कार्यैः स्फुटीभवति ?

(ग) कानि इदानीमेव पतन्तीव भान्ति ?

(घ) विहारस्य मूलद्वारे जनाः किं कुर्वन्ति ?

(ङ) केषु कीदृशी भावना उद्भावनीया ?

(च) विश्वस्य नागरिकाः किमर्थं वित्तं व्ययीकुर्वन्ति ?

(छ) जीवनसारं किम् ?

(ज) नेपालिनां स्वत्वं कथं विशदीभवति ?

(झ) वैदेशिकपर्यटकानां नेपालभ्रमणस्य प्रयोजनं किम् ?

(ञ) वयं कथं नागरिककर्तव्यात् च्युता भविष्यामः ?

## ७. अधो लिखितस्य गद्यांशस्य सङ्क्षेपीकरणं कुरुत

त्रिभिर्वर्षैराविश्वं कोरोनाविषाणुस्तीव्रगत्या प्रसृतो वर्तते । विश्वस्वास्थ्यसङ्घटनेन रोगोऽयं विश्वव्यापिनी महामारीति उद्घुष्टः । अस्य रोगस्य विषाणुना कोटिशः सङ्क्रान्ता लक्षशो जना मृताश्च । पारेकोटि जना वृत्तिहीना अभवन् । वैश्विकार्थतन्त्रं सङ्कटं प्राप्तम् । अनेन रोगेण नेपालोऽपि दुष्प्रभावितोऽभवद् वर्तते च । सङ्क्रमणेन स्वदेशे विदेशेषु च सहस्रशो नेपालिनोऽम्रियन्त । लक्षाधिका युवानो वृत्तिहीनावस्थां प्राप्तवन्तः । अत्र कस्य दोषः ? कार्यकारणसम्बन्धः सर्वत्र सङ्घटते । कारणेन विना कार्यमसम्भवम् । आयुर्विज्ञाः

कोरोनारोगस्य नैकानि कारणानि कथयन्ति। परं सत्यमिदमेवेति न केनाप्यधुनावधि निश्चितं वर्तते। प्रकृतिः प्राणिनां कृतेऽपरिहार्या भवति। इयं जननीवास्मान् संरक्षति पालयति च। इयमेव वातावरणं स्वच्छीकरोति दूषणञ्च दूरीकरोति। स्वच्छवायुना, जलेन, भोजनेन च वयं निर्व्याधिनो दीर्घजीविनश्च भवामः। अधुना सर्वे स्वार्थमेव पूरयन्ति। वयं स्वार्थाय प्रकृतिं दूषयामो विनाशयामश्च उता हो दण्डयामः। ततो रुष्टा सा विविधरूपैरस्माकं कार्याणि कठोरेण प्रतिकरोति। भूस्खलन-जलविप्लवानावृष्ट्यतिवृष्टिप्रभृतिघटनाः प्रकृतेर्दण्डनमेव मन्तव्यम्। कोरोनारोगस्याविश्वं प्रसरणमपि प्रकृतेः प्रकोपस्तज्जदण्डनञ्चेति निश्शङ्कं वक्तुं शक्यते।

८. **कुशलवक्तृतायै आवश्यकानि उपादानानि निर्माय कक्षायां प्रदर्शयत।**

## व्याकरणानुशीलनम्

१. **अङ्कान् अक्षरेषु पठत**

| अङ्काः | अक्षराणि |
|---|---|
| १०० | शतम् |
| ५०० | पञ्चशतम् |
| १००० | सहस्रम् |
| १०००० | दशसहस्रम् |
| १००००० | लक्षम् |
| ५०००००० | पञ्चाशत् लक्षम् |
| १००००००० | कोटिः |
| १०००००००० | दशकोटिः |
| १०००० ००००० | अब्जम् |
| १०००००००००० | दशाब्जम् |
| १००००००००००० | खर्बः |
| १०००००००००००० | दशखर्बः |

## २. सङ्ख्यावाचि-सङ्ख्येयशब्दान् पठत

| सङ्ख्या | सङ्ख्येयशब्दाः | | |
|---|---|---|---|
| **एकः** | **पुं.** | **स्त्री.** | **नपुं.** |
| | **प्रथमः** | **प्रथमा** | **प्रथमम्** |
| द्विः | द्वितीयः | द्वितीया | द्वितीयम् |
| त्रिः | तृतीयः | तृतीया | तृतीयम् |
| चतुर् | चतुर्थः | चतुर्थी | चतुर्थम् |
| पञ्चन् | पञ्चमः | पञ्चमी | पञ्चमम् |
| षष् | षष्ठः | षष्ठी | षष्ठम् |
| सप्तन् | सप्तमः | सप्तमी | सप्तमम् |
| अष्टन् | अष्टमः | अष्टमी | अष्टमम् |
| नवन् | नवमः | नवमी | नवमम् |
| दशन् | दशमः | दशमी | दशमम् |
| एकादशन् | एकादशः | एकादशी | एकादशम् |
| द्वादशन् | द्वादशः | द्वादशी | द्वादशम् |
| त्रयोदशन् | त्रयोदशः | त्रयोदशी | त्रयोदशम् |
| चतुर्दशन् | चतुर्दशः | चतुर्दशी | चतुर्दशम् |
| पञ्चदशन् | पञ्चदशः | पञ्चदशी | पञ्चदशम् |
| षोडशन् | षोडशः | षोडशी | षोडशम् |
| सप्तदशन् | सप्तदशः | सप्तदशी | सप्तदशम् |
| अष्टादशन् | अष्टादश | अष्टादशी | अष्टादशम् |
| ऊनविंशतिः | ऊनविंशः | ऊनविंशी | ऊनविंशम् |
| विंशतिः | विंशः | विंशी | विंशम् |

## ३. शतात् सहस्रपर्यन्तं निदर्शनसङ्ख्येयशब्दान् पठत

| सङ्ख्या | अक्षरम् | सङ्ख्येयशब्दाः | | |
|---|---|---|---|---|
| | | पुं. | स्त्री. | नपुं. |
| १०० | शतम् | शततमः | शततमी | शततमम् |
| २०० | द्विशतम् | द्विशततमः | द्विशततमी | द्विशततमम् |
| ३०० | त्रिशतम् | त्रिशततमः | त्रिशततमी | त्रिशततमम् |
| ४०० | चतुश्शतम् | चतुश्शततमः | चतुश्शततमी | चतुश्शततमम् |
| ५०० | पञ्चशतम् | पञ्चशततमः | पञ्चशततमी | पञ्चशततमम् |
| १००० | सहस्रम् | सहस्रतमः | सहस्रतमी | सहस्रतमम् |

**अभ्यासः**

### १. कोष्ठे अङ्कान् अक्षराणि वा लिखत

(क) १४ ( )

(ख) सप्तदश ( )

(ग) अष्ट ( )

(घ) ४०० ( )

(ङ) ऊनविंशतिः ( )

### २. कोष्ठे निर्दिष्टस्य लिङ्गस्यानुसारेण रिक्तस्थाने सङ्ख्येयशब्दान् लिखत

(क) ५ = ................ (स्त्रीलिङ्गे)

(ख) ९ = ............... (नपुंसकलिङ्गे)

(ग) १६ = ............ (पुंलिङ्गे)

(घ) २०० = .......... (नपुंसकलिङ्गे)

(ङ) १००० =.............. (स्त्रीलिङ्गे)

### ३. कोष्ठकाद् उचितं पदं विचित्य रिक्तस्थानं पूरयत

(क) पङ्क्तौ ........ महिला सुन्दरी अस्ति । (शततमी / शततमः/ शततमम्)

(ख) ग्रन्थस्य ......... अध्यायः कठिनो वर्तते । (विंशम्/ विंशी/विंशः)

(ग) अजयः प्रतियोगितायां ....... स्थानं प्रापत् । (तृतीयः/तृतीयम्/तृतीया)

(घ) ....... आश्रमो मोक्षदायको मन्यते । (चतुर्थः/ चतुर्थी/चतुर्थम्)

(ङ) ........ चण्डी अपि कथ्यते । (सप्तशतम् /सप्तशततमी/सप्तशती)

### ४. परस्परं मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| १९ | शतद्वयम् |
| २५ | द्व्यशीतिः |
| ३३ | एकोनविंशतिः |
| २०० | दशसहस्रम् |
| ८२ | पञ्चविंशतिः |
| १०००० | त्रयस्त्रिंशत् |

## रचनात्मकः अभ्यासः

### १. शिक्षकस्य सहायतया कक्षायां सरस्वतीपूजाकार्यक्रमम् आयोजत ।

### २. अधोनिर्दिष्टाः पदावलीः प्रयुज्य पृथिव्याः विषये अनुच्छेदं रचयत

(क) पृथिवी विश्वमाता इव क्षमादायिनी भवति ।

(ख) एषा सर्वेभ्यः प्राणिभ्यो वासाधारं ददाति ।

(ग) एषा जल-खाद्यान्नौषधानि प्रयच्छति ।

(घ) एषा प्राणिभ्यः किमपि न याचते ।

(ङ) अस्याः संरक्षणाय सेवायै च जनैः तत्परैर्भाव्यम् ।

### ३. पृथिव्याः स्तुतिप्रधानां कामपि पङ्क्तिं सूक्तिं वा अन्विष्य कक्षायां श्रावयत ।

## कोषानुशीलनम्

**वारिवर्गः**

रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ।
करतोया सदानीरा बाहुदा सैतवाहिनी ॥
शतद्रुस्तु शुतुद्रिः स्याद्विपाशा तु विपाट्स्त्रियाम् ।
शोणो हिरण्यवाहः स्यात्कुल्याल्पा कृत्रिमा सरित् ॥
शरावती वेत्रवती चन्द्रभागा सरस्वती ।
कावेरी सरितोऽन्याश्च सम्भेदः सिन्धुसङ्गमः ॥
द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ।
देविकायां सरय्वां च भवे दाविकसारवौ ॥
सौगन्धिकं तु कल्हारं हल्लकं रक्तसंध्यकम् ।
स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ॥
इन्दीवरं च नीलेऽस्मिन्सिते कुमुदकैरवे ।
शालूकमेषां कन्दः स्याद्वारिपर्णी तु कुम्भिका ॥
जलनीली तु शेवालं शैवलोऽथ कुमुद्वती ।
कुमुदिन्यां नलिन्यां तु बिसिनीपद्मिनीमुखाः ॥
वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥
पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं नाला नालमथास्त्रियाम् ॥
मृणालं बिसमब्जादिकदम्बे षण्डमस्त्रियाम् ।
करहाटः शिफाकन्दः किञ्जल्कः केसरोऽस्त्रियाम् ॥
संवर्तिका नवदलं बीजकोशो वराटकः । ॥
॥ इति अमरसिंहप्रणीते नामलिङ्गानुशासने प्रथमकाण्डे वारिवर्गः॥

## पदानुशीलनी

**नर्मदायाः नामानि** - रेवा, नर्मदा, सोमोद्भवा, मेखलकन्यका,

**करतोयायाः नाम्नी** - करतोया, सदानीरा,

**बाहुदायाः नाम्नी** - बाहुदा, सैतवाहिनी,

**शतरूद्रा नदी** - शतद्रुः, शुतुद्रिः,

**व्यासनदी** - विपाशा, विपाश्,

**शोणभद्रा नदी** - शोणः १, हिरण्यवाहः १,

**जलगमनमार्गः** - कुल्या २,

**नदीविशेषस्य नामानि** - शरावती २, वेत्रवती २, चन्द्रभागा २ सरस्वती २, कावेरी २,

**वेणी** - सम्भेदः १, सिन्धुसङ्गमः १,

**जलमार्गः** - प्रणाली ४,

**देविकानदीजन्यं वस्तु** - दाविक ७,

**सरयूजन्यं वस्तु** - सारव ७,

**सन्ध्यायां फुल्लितकमलम्** - सौगन्धिकम ३, कल्हारम ३,

**सन्ध्यायां फुल्लितरक्तकमलम्** - हल्लकम ३, रक्तसन्ध्यकम ३,

**चन्द्रकमलम्** - उत्पलम ३, कुवलयम ३,

**नीलकमलम्** - नीलाम्बुजन्म ३, इन्दीवरम ३,

**श्वेतपङ्कजः** - कुमुद ५, कैरवम ३

**कमलस्य मूलभागः** - शालूकम ३,

**विशालपत्रयुक्तं कमलम्** - वारिपर्णी २, कुम्भिका २,

**शैबलः** - जलनीली २, शेवालम३, शैवलः १,

**कुमुदिन्याः नाम्नी** - कुमुद्वती २, कुमुदिनी २,

**नलिन्याः नामानि** - नलिनी २, बिसिनी २, पद्मिनी २,

**कमलस्य नामानि** - पद्म ५, नलिनम् ३, अरविन्दम् ३, महोत्पलम् ३, सहस्रपत्रम् ३, कमलम् ३, शतपत्रम् ३, कुशेशयम् ३, पङ्केरुहम् ३, तामरसम् ३, सारसम् ३, सरसीरुहम् ३,

बिसप्रसूनम् ३, राजीवम् ३, पुष्करम् ३, अम्भोरुहम् ३,

**श्वेतपङ्कजः** - पुण्डरीकम् ३, सिताम्भोजम् ३,

**रक्तपङ्कजः** - रक्तसरोरुहम् ३, रक्तोत्पलम् ३, कोकनदम् ३,

**कमलदण्डः** - नालः १, ‸ ३,

**कमलतन्तोर्नाम्नी** - मृणालम् ५, बिसम् ३,

**कमलानां समूहः** - षण्डः ५,

**कमलस्य मूलम्** - करहाटः १, शिफाकन्द ५,

**केसरस्य नाम्नी** - किञ्जल्कः १, केसर ५,

**नवीनपत्रम्** - संवर्तिका २, नवदलम् ३,

**कमलस्य बीजभागः** - बीजकोशः १, वराटकः १,

इति अमरकोशे प्रथमकाण्डः ॥

## अभ्यासः

१. **अधस्तनं पद्यं शुद्धमुच्चारयत ।**

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥

२. **कमलस्य सर्वाणि नामानि पृथक् पृथक् लिखत ।**

३. **उदाहरणानुसारेण पत्रशब्दस्य रूपावलिं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पत्रम् | ............ | ............ |
| द्वितीया | ............ | ............ | पत्राणि |

| | | | |
|---|---|---|---|
| तृतीया | पत्रेण | ............ | ............ |
| चतुर्थी | ............ | पत्राभ्याम् | ............ |
| पञ्चमी | ............ | ............ | पत्रेभ्यः |
| षष्ठी | ............ | ............ | ............ |
| सप्तमी | ............ | ............ | पत्रेषु |
| सम्बोधनम् | हे पत्र! | ............ | ............ |

४. **"नालः"इति कस्य नाम ?**

५. **केसरशब्दः कस्मिन् लिङ्गे अस्ति ?**

६. **रिक्तस्थानं पूरयत**

शरावती .............. सरस्वती।

.......................सिन्धुसङ्गमः॥

७. **कमलशब्दस्य रूपावलिं लिखत।**

८. **प्रदत्तैः शब्दैः वाक्यानि रचयत**

कुल्या, प्रणाली, उत्पलम्, पुण्डरिकम्, षण्डः

९. **पर्यायान् परस्परं मेलयत**

| समूहः क | समूहः ख |
|---|---|
| रेवा | वराटकः |
| सम्भेदः | कमलम् |
| नलिनी | नर्मदा |
| पद्मम् | सिन्धुसङ्गमः |
| बीजकोशः | पद्मिनी |